ISSN 0976-8645

# JAHNAVI SANSKRIT E-JOURNAL

*A portal of Sarasvatniketanam*




www.sarasvatniketanam.org www.jahnavisanskritejournal.in

**एकोनचत्वारिंशत्-चत्वारिंशदङ्कयोः भवतां समेषां मङ्गलाभिनन्दनम्।**



| | |
|---|---|
| **मुख्यसम्पादकः** | **विद्यावाचस्पति-डा.सदानन्दझाः ।** |
| **सम्पादकाः** | डा. मीनाक्षी, डा. वीणागौड, डा बिपिनकुमारझा, आचार्यसुमन् च । |
| **पुनर्वीक्षकाः** | डा श्लेषासचिन्द्र, डा आर्याजोशी, डा. डी-वंशीकृष्णः, श्रीश्यामसुन्दरः, |
| **विशिष्टपुनर्वीक्षकाः** | डा. प्रेमसिंहसिकरवारः, श्री-अभिषेकत्रिपाठी, डा. गिरिधारीपण्डा च । |
| **प्रकाशकः** | Dr. PK Wendabona, Department of Basic Principles, Institute of Indigenous Medicine University of Colombo, Rajagiriya Sri Lanka |
| **प्रतिनिधिः** | डा. बिपिनकुमारझा । |
| **तकनीकिप्रवन्धनसहायकः** | डा. गिरिधारीपण्डा । |



सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नलनाम्ना विश्वेऽस्मिन् प्रथितः।

## विषयानुक्रमणिका



| Sl. | शीर्षकम् | लेखकः |
|---|---|---|
| | मुख्यसम्पादकीयम् | सदानन्द झा |
| | प्रकाशकीयम् | बिपिन कुमार झा |
| 1 | Vijñānabhairava and Meditation Methods: A Brief Study | Kim Tae Hong |
| 2 | न्यायशास्त्रस्योपयोगिता न्यायाध्यापने नूतनायामाश्च | वाणी मञ्जुनाथ हेगडे |
| 3 | बङ्गभूमौ स्मृतिशास्त्रपरम्परा | गिरिधारी पण्डा |
| 4 | A Quest of Advaita philosophy in Vishnupuranam | Ishwar P Bhat |
| 5 | Concept of Illusion in the Light of Paramārthasāra | Surabhi Verma & Mr. Sougata Gosh |
| 6 | मार्कण्डेयपुराणे मोक्षस्य अवधारणा | तरणीकुमारपण्डा |
| 7 | Place of Women in the Bhavabhūi's *Mālatīmādhava* | Jintu Moni Dutta |
| 8 | Theory of Creation in the Saṁkhya Philosophy | Jumli Nath |
| 9 | शिक्षा में भारतीय मनोविज्ञान | रश्मि कुमारी |
| 10 | The Geneses of a Secular Literature in Sanskrit | Jharana Rani Tripathy |
| 11 | The social status in kālidāsa Era | Nilachal Mishra |
| 12 | Third Eye of Chatrapati Shivaji Maharaj : Bahirji Naik | Pradnya Konarde |
| 13 | अद्वैतदर्शने आत्मसाक्षात्कारसामग्र्याम् मनोविमर्शः | सुब्रह्मण्य जी. एम् |
| 14 | पुराणोत्पत्तिर्महत्त्वञ्च | मुकेशकुमारटेलरः |
| 15 | प्रतापविजयम्' में निरुपित मानवीय मूल्य | अनु कुमारी |
| 16 | श्रीभिक्षुमहाकाव्ये उदारवादिचिन्तनम् | गणेशनारायणस्वामी |
| 17 | सर्वदर्शनसङ्ग्रह में पदार्थ निरूपण | राज किशोर आर्य |
| 18 | स्मृतिशास्त्रदृष्ट्या शिक्षकचरितसमीक्षा | Gouranga Show |
| 19 | हिमाचलस्य पर्वतीयभाषायां प्राकृतप्रभावः | योगेश अत्रिः |
| 20 | लोपशास्त्रविधौ 'अतो लोप:' इति सूत्रस्य समीक्षात्मकमध्ययनम् | सैकतचौधुरी |
| 21 | पञ्चस्वरवैशिष्ट्यम् | हरिनारायणधरद्विवेदी |

## मुख्यसम्पादकीयम्

शिवशिरसि वसन्ती संविदानन्दनीरा
हृदयकलुषपुञ्जं प्रक्षिपन्ती विदूरे।
सघनतमसि दिव्यं ज्योतिरालोकयन्ती
प्रसरतु भुवि भव्या भारती काऽपि दिव्या॥

अये नानाशास्त्रपारंगताद्यनेक विरुदभूषिताः विविधविद्याविद्योतितान्तःकरणा नानाछात्रवृन्दसमुपास्यमानचरणा निर्मलमनसः पाण्डित्यपराजितसुरभारतीबद्धरतयः विद्वन्मणयः महाकवयः अनारतभगवतीभारत्याः चरणानुरागिणः सहृदयपाठकाश्च।

संसारस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिक जाह्नव्याः एकोनचत्वारिंश-चत्वारिंशसंयुक्ताङ्कं भवादृशानां सुरभारती सतत समुपासकानां नानाशास्त्रकाननविहरणकेशरिणां श्रीमतां तत्र भवतां करकमलयोः साञ्जलिं प्रस्तुवन् मोमुद्यते मे चेतः।

विदाङ्कुर्वन्त्वेव भवन्तः पत्रिकायाः प्रारम्भकालादेव संस्कृतप्रचारप्रसाराय एकापरम्परा अस्माभिः सञ्चालिता । तत्परम्परा निर्वहणाय देशे-विदेशे पत्रिकायाः लोकार्पणः कार्यक्रमः संचालितः । यत्र अमेरिकास्थ-अटलाण्टाप्रभृतिस्थानेषु कार्यक्रमः सम्पन्नः।

एतत्परम्परायां कलिकातास्थमेदिनीपुरनगरे विविध-प्राशासनिककार्यक्रमव्यस्तेनापि स्वनामधन्येन चतुरस्र-वैदुष्यमण्डितेन प्राचार्यपदममलङ्कुर्वता तत्र भवता श्रीमता डा. गोपालचन्द्रबेरामहाभागेन पत्रिका-लोकार्पणकृते स्वकीयानुमतिः प्रदत्ता। एतदर्थं सादरं स्तोतुमीहामहे वयम्।

जाह्नव्याः प्रारम्भकालादेवसंकलन-सम्पादनमुद्रणादिभारः विभिन्नराज्यस्थितानां विद्वन्मुकुटमणीनां सारस्वतसाधकेषु न्यस्तः तेषु एतेषां विद्वत्प्रवराणां विशेषानुरोधेन धुरिनियोजितः सोत्साहं निष्पक्षभावेनाहं स्वीकृतवान्। मदीया पत्रिका गुणगौरवमहिम्नामण्डिता । परिणामतः अधुनापि पत्रिकेयं विश्वविद्यालयानुदानायोगेनान्तराष्ट्रियपत्रिका रूपेणाङ्गीकृता। मदीयेयं पत्रिका राजनीतिविमुखा संस्कृतशास्त्रसंरक्षणे बद्धपरिकरा । प्रस्तुताङ्के विभिन्नराज्येभ्यः कृतभूरिपरिश्रमाणां शास्त्ररसिकानां शोधपूर्णाः एकविंशतिसङ्ख्याकाः आलेखाः प्रकाशिताः तेषु 'न्यायशास्त्रस्योपयोगिता न्यायाध्यापने नूतनायामाश्च, बङ्गभूमौ स्मृतिशास्त्रपरम्परा, Concept of Illusion in the Light of Paramārthasāra, Place of Women in the Bhavabhūi's *Mālatīmādhava*, The Geneses of a Secular Literature in Sanskrit, अद्वैतदर्शने आत्मसाक्षात्कारसामग्र्याम् मनोविमर्शः, श्रीभिक्षुमहाकाव्ये उदारवादिचिन्तनम्, स्मृतिशास्त्रदृष्ट्या शिक्षक-चरितसमीक्षा, Vijñānabhairava and Meditation Methods: A Brief Study, हिमाचलस्य पर्वतीयभाषायां प्राकृतप्रभावः' प्रीतिवर्धकाः वर्तन्ते।

पत्रिकाप्रकाशनाय संरक्षकमण्डलशोधचयनसमीति-सदस्येभ्यः जाह्नवीसकलपरिवारेभ्यश्च मदीयां हार्दिकीं कृतज्ञतां प्रकटयामि तथा च प्रत्यक्षतया परोक्षतया च ये महानुभावाः साहाय्यं कृतवन्तस्तेभ्यः महापुरुषेभ्यः धन्यवादाः निवेद्यन्ते। आशासे पत्रिकामिमामवलोक्य अवश्यमेव शास्त्ररसिकाः गवेषकाः संस्कृतप्रचार-प्रसारबद्धपरिकराः लाभान्विताः भविष्यन्ति इति मे द्रढीयान् विश्वासः। अन्ते सकलजाह्नवीपरिवारः बद्धकराञ्जलिः समेषां प्राणिनां दीर्घायुष्ट्वबलपुष्टि-नैरुज्यप्राप्तिपूर्वकसकलमनोरथसsिद्ध्यर्थं सुभद्रासहितं साग्रजमनाथनाथं श्रीजगन्नाथं प्रार्थयते।





विद्वच्चरणचञ्चरीकः
झोपाख्यः सदानन्दः

लखनौरम्, मधुबनी
गुरुगोविन्दसिंहजयन्त्युत्सवः

## प्रकाशकीयम्

श्रुतिध्वनिमनोहरा मधुरसा शुभापावनी
स्मृताप्यतनुतापहृत् समवगाहसौख्यप्रदा।
निषेव्यपदपङ्कजा सुकृतमूर्तिमान्याऽमला
समस्तजगतीतले प्रवहतादियं जाह्नवी॥

वस्तुतः कस्यापि राष्ट्रस्य उन्नतौ तच्छिक्षणव्यवस्थैव हेतुभूता भवति। उत्तमशिक्षण व्यवस्था शिक्षितादीक्षिताश्च तत्रत्या नागरिकाः तद्राष्ट्रोन्नतौ समर्थाः भवन्ति एषैव भारतीया व्यवस्था भारतं विश्वगुरुपदे प्रतिष्ठापयत्। भारतीयशिक्षणसंस्थानेषु भवन्ति अद्यत्वे अनेकानि शोधपरककार्याणि तद्विषयमेवाधारीकृत्य जाह्नवी अनवरतं प्रकटयति विदुषां तत्र भवतां पुरस्तात् स्वविचारान्। अद्यतनकाले संस्कृतविषयमधिकृत्य शोधनिबन्धाः प्रकाशपथमायान्ति तेषु गुणवत्ता स्थितेः मूल्यांकनमस्माभिः कर्तव्यमेव। संस्कृतजगति पुरातनविषयमेवादाय प्रायः शोधकार्याणि भवन्ति। नवीनविषया प्रायः गौणीभूताः भवन्ति एतस्य कारणमिदमेव यत् प्रायः आधुनिक कवीनां विदुषां लक्षणग्रन्थकाराणां वा पुरातनविषयस्य एव पिष्टपेषणं नूतनशैल्या शब्दान्तरैर्वा भवन्ति। अत्र विशिष्य अस्मिन् सन्दर्भे अस्माकं दृष्टिः वर्तत एव। किन्तु इह जगति किंचिदपि कार्यं सहयोगं बिना न सम्भवति। गीतायां श्रीकृष्णः कथयति-

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम्॥

अन्ते सम्पादन-पुनर्वीक्षणकर्मसु ये प्रत्यक्षाप्रत्यक्ष-सहायकाः तेषां हार्दं धन्यवादान् ज्ञापयामि।

विद्वच्चरणचञ्चरीकः
झोपाख्यः बिपिनकुमारः।
गुरुगोविन्दसिंहजयन्त्युत्सवः

Since 2009
ISSN- 0976-8645
UGC RN-41039

# Vijñānabhairava and Meditation Methods: A Brief Study

**Kim Tae Hong**[1]

**Keywords:** *Tantra, Bhairava, Bhairavi, upāyas, anāhata, parāśakti, mūlādhāra.*

**Abstract**

The aim of this paper is to explore the dimensions of meditation in the tantric sect of Kaśmīra Śaivism. The paper aims to present the views without the intention of comparing it and finding its similarities or dissimilarities with other systems of philosophy. This chapter intends to investigate and discuss the idiosyncratic methods and forms of the system. To escape the expansion, the article would focus on text Vijñānabhairava only, representing the approach of the system.

## Introduction

The text Vijñānabhairava is unique in the way as it is not only one of the ancient books on yoga but also describes 112 types of it extensively and intensively along with the basic principles of Śaivāgama. It has an important place in Śaivāgama philosophy. According to Swami Laksmanjoo, Vijñānabhairava is pure monistic as it is from the *Bhairava* point of view. While as Śiva Śāstras are dualistic and Rudra Śāstras are mono cum dualistic.**Invalid source specified.**[2] Vijñānabhairava is the essence of the text Rudrayāmalatantra. It is said that it is a chapter in Rudrayāmala Tantra and another chapter is the Parātriṃśikā.**Invalid source specified.**[3] The text is no more available but its many excerpts are explained and translated by Dr. Rudradeva Tripathi.**Invalid source specified.** [4] Many commentaries are written on the Vijñānabhairava.

There is an incomplete commentary 'Udyota' of Kṣemarāja. It is not known whether the writer could not complete it or some of its parts are lost. Shivopadhyaya and Bhatta Ananda have written commentaries. Many thinkers find it influenced by Śankara Vedānta.**Invalid source specified.**[5]

## Vijñānabhairava: Meditation Methods

Kṣemarāja in his Udyota, describes the meaning of *bhairava*. The term *bhairava* consists of three letters; *bha*, *ra* and *va*. 'Bha' means *bharaṇa* (maintenance of the universe), 'ra' means *ravana* (withdrawl of the universe), 'va' stands for *vamana* (manifestation of the universe). Abhinavagupta in the Tantrāloka also narrates the three aspects of the divine. From the mystical point of view, the ultimate reality is *Bhairava* in which *prakāśa* (light of consciousness) and *vimarśa* (eternal awareness of *prakāśa*), *Śiva* and *Śakti*, *Bhairava* and *Bhairavī* are identical. The essential nature of *Bhairava* is *vijñāna* and his main characteristics are *svātantrya*. In Vijñānabhairava, the absolute nature of *Bhairava* is described as free of all notions of *dik, kāla, deśa* and *uddeśa*. Words cannot describe it.**Invalid source specified.** [6] One needs to be free from all kinds of *vikalpas* (thought constructs). *Bhairavī* is *Parādevī* that is the *śakti* of *Bhairava*.

In Vijñānabhairava, *Bhairavī* asks to *Bhairava*, what are the means by which the highest state of

[1] Ph. D. Scholar, Jnu, New Delhi.

[2] Vijñānabhairava, p. 1, Swami Lakshmanjoo, MMPPL, New Delhi, 2011.

[3] Ibid.

[4] Dr. Rudradeva Tripathi, Rudrayāmalatantra, (in Hindi) Ranjan Publication, New Delhi, 1994.

[5] Vijñānabhairava, "Introduction", p. x, Jaideva Singh, MBPPL, Delhi, 1979.

[6] *Dikkālakalanonmuktā deśoddeśāviśeṣiṇī / Vyapadeṣṭum aśakyāsav akathyā paramārthataḥ* // 14 //, *Antaḥ svānubhavānandā vikalponmuktagocarā / Yāvasthā bharitākārā bhairavī bhairavātmanaḥ* // 15 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.11




Since 2009
ISSN- 0976-8645
UGC RN-41039

*Bhairava* can be known or realized? In this context, she describes the other narrated ways of attainment of *Bhairava*.

*Bhairava* replies to *Bhairavī*. Here, in Vijñānabhairava, 112 *dhāraṇās* have been described.

It is notable that the term *dhāraṇā* is technical in this context. It is quite different from the notion of dhāraṇā of Yoga philosophy. *Dhāraṇā* here in Śaivism is used in a wider sense. In Yoga philosophy of Patanjali, dhāraṇā is presented as a limb of *aṣṭāṅga yoga* and meant as "fixation of the mind on a particular spot." But here in Vijñānabhairava, it is much deeper and extensive than Pātanjala Yoga philosophy.

These 112 types of *dhāraṇā* come under four *upāyas*. These four *upāyas* are described in the Śivasūtra; *Sāmbhavopāya, Śāktopāya, Āṇavopāya,* and *Anupāya*. The basic difference between them lies in their stages of practice according to the level of the practitioner's ability to maintain consciousness. *Sāmbhavopāya* is most refined, superior and highest in order. In this *upāya*, the practitioner maintains his awareness in thoughtless-ness state. When consciousness is maintained in the realm and energy of sensory organs i.e. five sense organs and three internal organs (*manas*, *ahaṃkāra* and *buddhi*), that is *Śāktopāya*. When the practitioner depends on physical and mental activities such as breathing, reciting that is called *Āṇavopāya*. The fourth *upāya* is *Anupāya* that literally stands for 'no means'. In this state, the practitioner (who is on a very advanced level) has just to observe the nothingness in activity. It is like just being (to be) there and observe. At this high stage, the Śaiva practitioner finds himself in an unexplainable reality where he is no one else but Śiva, at this stage, he experiences that nothing is lost and nothing is gained, there is no ignorance and no liberation.

*Dhāraṇās* depicted in Vijñānabhairava are categorized in these four types of *upāyas*. Here, the *dhāraṇās* will be discussed under the *upāyas* they relate to.

### *Sāmbhavopāya Dhāraṇās*

*Parāśakti* is of the nature of creation that expresses herself upward and downward in the form of '*prāṇa*' exhalation and '*apāna*' inhalation. Through unwavering focus at the origin of these two places that is said here '*dvādaśānta*', one can know the state or nature of *Parāśakti* that is *Bhairavī*. [7]

When *Parāśakti* manifests itself through the cessation of *prāṇa* and *apāna*, and middle state develops after the dissolution of thought constructs, the state of *Bhairava* supervenes. [8]

By consistently meditating on the *Parāśakti* (reffered here as *Śakti*) that arises from the root (*mulādhāra cakra*), that shines like the rays of the sun and gets subtler and consequently dissolves, in such a state, *Bhairava* manifests.

Supreme attainment gets manifested through the *karaṅkiṇī, krodhana, bhairavī, lelihāna* and *khecarī mudrās* at the moment of intuitive perception of the universe. [9]

When the meditator fixes his sight on a gross object without blinking his eyes and makes his mind free of *vikalpas*, the meditator attains the state of Śiva.

The meditator gets filled with the bliss of infinite consciousness when he knows the three states of consciousness that is *viśva* (waking), *taijasa* (dream), and *prājña* (deep sleep). [10]

When the meditator realizes that the same consciousness is present in all without any distinction, he transcends the trans-migratory existence. And if the meditator succeeds in contemplating his overwhelming emotion that is overtaking him, he conquers and gets over the

[7] *ūrdhve prāṇo hyadho jīvo visargātmā paroccaret / utpattidvitayasthāne bharaṇādbharītā sthitiḥ* // 24 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.16

[8] *na vrajenna viśecchaktir marudrūpā vik āsite / nirvikalpatayā madhye tayā bhairavarūpatā* // 26 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.24

[9] *karaṅkiṇyā krodhanayā bhairavyā lelihānayā / khecaryā dṛṣṭikāle ca parāvāphiḥ prakāśate* // 77 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.66

[10] *kiñcijjñātaṁ dvaitadāyī bāhyālokastamaḥ punaḥ / viśvādi bhairavaṁ rūpaṁ jñātvānantaprakāśabhṛt* // 86 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, pp.86-87.

states of these emotions. [11]

Making the mind free from all though constructs and from all the supports, the state of *Bhairava* manifests in the self an absolute self. [12] When one whirls one's body and falls down on the earth; at the end of the commotion, supreme spiritual condition appears. [13]

That which is unknowable, unperceivable, void and also transcends non-existence, that all is *Bhairava*. By contemplating on him, the meditator attains enlightenment. [14]

There is no bondage or liberation. It seems so because of ignorance that appears as a reflection in *buddhi* as the sun reflects in the water. [15]

### *Śāktopāyadhāraṇā*

Meditating on *Śakti* (*Kuṇḍalinī*) that is moving upwards from one centre of energy to another, up to *dvādaśānta*, as a consequence, one experiences the magnificent rise of *Bhairava*. [16]

There are twelve higher centers of energy-related to twelve successive letters should be cautiously meditated on. Each of them, at first should be meditated on a gross level,[17] then at subtle and finally at the supreme level until one gets oneness with *Śiva*. [18]

One should free one's mind from all kinds of thought constructs by filling the *mūrdhānta* with the same *prāṇic* energy and crossing it with the help of the contraction of the eyebrows. As a result, the consciousness rises higher than *dvādaśānta* and a sense of omnipresence is experienced. [19]

The practitioner should meditate on the five voids of the five senses. It helps him to get absorbed in Absolute Void. [20]

One should sit with closed eyes and fix one's attention inside the cranium, it helps to decide the one that is most discernible. [21]

If one meditates on the medial *nāḍī* (*prāṇic* channel) that is as slender as the stem of a lotus, it helps to reveal the nature of the divine. [22]

By reciting the *praṇava* syllable *aum* and contemplating over the void to the extent, the meditator attaint the void. [23]

By the fusion of the breaths *prāṇa* and *apāna* in *dvādaśānta*, there arises a situation when there is a complete cessation of the two in the center on in *dvādaśānta*, when the meditator meditates on this void or no feeling state, he elevates himself at the level of equality. [24]

According to Vijñānabhairava, one should meditate wherever his mind wants to focus, in such a case, the true nature of the highest bliss will manifest itself. When one is about to sleep,

---

[11] *ciddharmā sarvadeheṣu viśeṣo nāsti kutracit / ātaśca tanmayaṁ sarvaṁ bhāvayanbhavajijjanaḥ* // 100 //, *kāmakrodhalobhamohamadamātsaryagocare / buddhiṁ nistimitāṁ kṛtvā tattattvamavaśiṣyate* // 101 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, pp.86-87.

[12] *nirādhāraṁ manaḥ kṛtvā vikalpānna vikalpayet / tadātmaparamātmatve bhairavo mṛgalocane* // 108 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.94

[13] *bhrāntvā bhrāntvā śarīreṇa tvatitaṁ bhuvi pātanāt / kṣobhaśaktivirāmeṇa parā saṁjāyate daśā* // 111 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.97

[14] *yadavyedyaṁ yadagrāhyaṁ yacchūnyaṁ yadabhāvagam / tadsarvaṁ bhairavaṁ bhāvyaṁ tadante bodhasaṁbhavaḥ* // 127 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.110

[15] *na me bandho name mokṣo jīvasyaitā vibhīṣikāḥ / pratibimbamidaṁ buddherjaleṣviva vivasvataḥ* // 135 // Kṣhemarāja and Shivopādhayāya, p.120

[16] *udgacchantīṁ taḍidrūpāṁ praticakraṁ kramātkramam / ūrdhvaṁ muṣṭitrayaṁ yāvat tāvadante mahodayaḥ* // 29 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.26

[17] At the gross level, this *dhārana* is counted in *Sāktopaya*.

[18] *karamadvādaśakaṁ samyag dvādaśākṣarabheditam / sthūlasūkṣmaparasthityā muktvā muktvāntataḥ śivaḥ* // 30 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.26

[19] *tayāpūryāśu mūrdhāntaṁ bhaṅktvā bhrūkṣepasetunā / nirvikalpaṁ manaḥ kṛtvā sarvordhve sarvagodgamaḥ* // 31 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.27

[20] *śikhipakṣaiścitrarūpair maṇḍalaiḥ śūnyapañcakam / dhyāyato'nuttare śūnye praveśo hṛdaye bhavet* // 32 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.27

[21] *kapālāntarmano nyasya tiṣṭhanmīlitalocanaḥ / krameṇa manaso dārḍhyāt lakṣayellakṣyamuttamam* // 34 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.29

[22] *madhyanāḍī madhyasaṁsthā bisasūtrābhar ūpayā / dhyātāntarvyomayā devyā tayā devaḥ prakāśate* // 35 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.30

[23] *praṇavādisamuccārāt plutānte śūnyabhāvanāt / śūnyayā parayā śaktyā śūnyatāmeti bhairavi* // 39 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.33

[24] *vāyudvayasya saṁghaṭṭādantarvā bahirantataḥ / yogi samatvavijñānasamudgamanabhājanam* // 64 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.52



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

the moment between waking and sleep one should meditate. In that state, the supreme goddess reveals herself. [25]

When the meditator lets go of the thought of remembered objects and makes his body supportless, the lord manifests. [26]

When the meditator fixes his attention on a particular object, voidness establishes. Contemplating this voidness that is free of thoughts, he attains tranquillity. Purity in real sense is freeing oneself from the thought constructs that are the cause of happiness. [27]

A meditator behaves a foe and friend equally. He is the same in honor and dishonor. Knowing the presence of *Brahman* everywhere, he establishes in happiness. He is free from aversion and attachment. Free from all the dualities, he develops the nature of *Brahman*. [28]

### *Āṇavopāya Dhāraṇā*

By the one-pointed awareness at the pauses of *prāṇa* and *apāna* in their *dvādaśānta* that is also known as *bahiḥ kumbhaka* and *antaḥ kumbhaka*, one finds Bhairavī manifested at those two points. [29]

When in the form of exhalation and inhalation, *Śakti* is retained at the center, as the result of this practice, *Śakti* becomes *śānta* or tranquilize and through that *Śakti* (tranquilized), *Śānta Bhairava* is revealed. [30]

When a yogi meditates either in the heart or in the *dvādaśānta*, *vikalpajāla,* the thoughts disappear and the practitioner gets absorbed in supreme consciousness. [31]

One who is engrossed in nada *Brahman* which sounds uninterruptedly in him gets identified with *Brahman*. [32]

When the meditator sits on a soft seat, leaving handsand feet without any support and sits for a long time, he attains *sāttvika* intelligence. He should fix his gaze in the armpits, when mind gets absorbed in that state, it brings immense peace. [33]

If the meditator concentrates at *dvādaśānta* repeatedly, within a few days, he finds that his mind is becoming stable. [34] And through pranayama, if he makes his *prāṇaśakti* subtle and meditated in *dvādaśānta* or in heart by entering mentally to it, he becomes liberated. [35]

The meditator should concentrate his *citta* in the middle of contraction and expansion by *vāyu*, he gets joined to the bliss that equals of sexual union. [36]

The meditator, when concentrates his sight on the space sparkling with light, the soul manifests

---

[25] *yatra yatra manastuṣṭirmanastatraiva dhārayet / tatra tatra parānandasvarūpaṁ saṁpravartate* // 74 //, *anāgatāyāṁ nidrāyāṁ praṇaṣṭe bāhyagocare / sāvasthā manasā gamyā parā devī prakāśate* // 75 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, pp.62-65

[26] *vastuṣu smaryamāṇeṣu dṛṣṭe deśe manastyajet / svaśarīraṁ nirādhāraṁ kṛtvā prasarati prabhuḥ* // 119 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.102

[27] *vastvantare vedyamāne śanaivastuṣu śūnyatā / tāmeva manasā dhyātvā vidito'pi praśāmyati* // 122 //, *kiñcijjñairyā smṛtā śuddhiḥ sā'suddhiḥ śaṁbhudarśane / na śucirhyaśuciśtasmān nirvikalpaḥ sukhī bhavet* // 123 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, pp.104-105

[28] *samaḥ śatrau ca mitre ca samo mānāvamānayoḥ / brahmaṇah paripūrṇatvāditi jñātvā sukhī bhavet* // 125 // *na dveṣaṁ bhāvayetkvāpi na rāgaṁ bhāvayetkvacit / rāgadveṣavinirmuktau madhye brahma prasarpati* // 126 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.109

[29] *maruto'ntarbahirvāpi viyadyugmānuvartan āt / bhairavyā bhairavasyetthaṁ bhairvi vyajyate vapuḥ* // 25 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.21

[30] *kumbhitā recitā vāpi pūritā vā yadā bhavet / tadante śāntanāmāsau śaktyā śāntaḥ prakāśate* // 27 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.25

[31] *dhāmāntaḥ kṣobhasaṃbhūtasūkṣmāgnitilakākṛtim / binduṃ śikhānte hṛdaye layānte dhyāyato layaḥ* // 37 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.31

[32] *anāhate pātrakarṇe'bhagnaśabde sariddrute / śabdabrahmaṇi niṣṇātaḥ paraṁ brahmādhigacchati* // 38 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.32

[33] *upaviśyāsane samyak bāhū kṛtvārdhakuñcitau / kakṣavyomni manaḥ kurvan śamamāyāti tallayāḥ* // 79 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.70

[34] *kālāgninā kālapadād utthitena svakaṁ puram / pluṣṭaṁ vicintayedante śāntābhāsastadā bhavet* // 52 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.44

[35] *"pīnāṁ ca durbalāṁ śaktiṁ dhyātvā dvādaśagocare / praviśya hṛdaye dhyāyan suptaḥ svātantryamāpnuyāt* // 55 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.45

[36] *vahnerviṣasya madhye tu cittaṁ sukhamayaṁ kṣipet / kevalaṁ vāyupūrṇaṁ vā smarānandena yujyate* // 68 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.57

Since 2009
ISSN- 0976-8645
UGC RN-41039

itself. [37]

A meditator gets dissolved in peace when he maintains the mouth wide open, fixes inverted tongue in the centre and mind in the middle of open mouth and voices vowel less ha mentally. [38]

When the meditator pierces any part of his body with a sharp needle and concentrates on that area, he gets access to the pure nature of *Bhairava*. Thus, these are the upāyas that have been narrated in Vijñānabhairava. Anupāya is the highest means and at this stage as its name suggests, a practitioner does not need to make any effort. The rest three upāyas have their own illustrations practising which the practitioner reaches at the zenith of pure consciousness and recognizes the true nature of Supreme being that is *Śiva*.

### Bibliography

LakshamanjooSwami. "Vijñānabhairava." New Delhi: MMPPL, 2011.
ShivopādhayāyaandKṣhemarāja. "Vijñānabhairava Kashmir Series of Texts and Studies No.viii." Bombay: Tatva-Viveohaka Press, 1918.
SinghJaideva. "Vijñānabhairava." Delhi: MBPPL, first edition 1979 reprint 2019.
TripathiRudradevaDr. "Rudrayāmalatantra (in Hindi)." New Delhi: Ranjan Publication, 1994.

## न्यायशास्त्रस्योपयोगिता न्यायाध्यापने नूतनायामाश्च

वाणी मञ्जुनाथ हेगडे[39]

..................................................................................................

**कूटशब्दाः**-न्यायशास्त्रोपयोगिता, न्यायशास्त्राध्ययनम्, आन्विक्षिकी, हेतुविद्या, प्रमाण, प्रमेयः

..................................................................................................

**शोधसारः-**

शोधपत्रेऽस्मिन् मया न्यायशास्त्रस्योपयोगिता न्यायाध्यापने नूतनायामाश्च इति विचारः व्यमर्शि। प्राचीनन्यायाध्ययनेन कः लाभः इति व्यचारि। अत्रापि विशिष्य नव्यन्यायशैल्याः उपयोगिता आधुनिकक्षेत्रे कथमस्तीति न्यरूपि। जगति पदार्थानां निरूपणे नैय्यायिकानां वैय्याकरणानां च महद्योगदानं वरीवर्ति। अत एव उक्तं -'**काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमि**'ति। न्यायशास्त्रस्योपयोगिता सर्वत्र शास्त्रे दरीदृश्यते। अत एव मया अत्र आदौ न्यायशास्त्रस्य महत्त्वस्य प्रतिपादनम् अकारि। प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते इत्यतः आदौ न्यायशास्त्रस्य अभिधेयं किमिति प्रतिपाद्य, व्यावहारिकजीवने न्यायशास्त्रस्य उपयोगिता कथं विद्यते इति मया अकथयि। न्यायशास्त्राध्ययनाध्यापने नूतनायामाः के भवितुमर्हन्तीति मया अस्मिन् शोधपत्रे व्यचारि। इत्थं विशिष्टचिन्तनपुरस्सरं शोधपत्रस्य उपसंहारः मया अकारि।

..................................................................................................

### न्यायशास्त्रस्य महत्त्वम्

आस्तिकदर्शनेषु न्यायवैशेषिकयोः अस्ति

[37] *tejasā sūryadipāderākāśe śabalīkṛte / dṛṣṭirniveśyā tatraiva svātmarūpaṁ prakāśate* // 76 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.65

[38] *madhyajihve sphāritāsye madhye nikṣipya centanām / hoccāraṁ manasā kurvaṁstataḥ śānte pralīyate* // 81 // Vijñānabhairava, Kṣhemarāja and Shivopādhayāya, p.70

[39] शोधच्छात्रा, राजीवगान्धिपरिसरः, मेणसे, शृङ्गेरी, चिक्कमगलूरु, कर्नाटक (५७७१ ३९)



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

किञ्चिद्वैशिष्ट्यम्। **"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्"** इति प्रसिद्धाभियुक्तोक्तिः। तत्र काणादपदं वैशेषिकदर्शनपरम्[40] **"अङ्गानि वेदाश्चत्वारो मीमांसा–न्याय- विस्तरः...**" इत्यादि श्लोके न्यायपदं न्यायवैशेषिकदर्शनोभयपरम्। न्यायभाष्यकारो वात्स्यायनोऽपि न्यायशास्त्रस्य महत्त्वमेवं वर्णयति-

> **"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
> **आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता"।।** [41]इति

एवं **"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्"** [42] इति वात्स्यायनभाष्योक्तदिशा अर्थप्रतिपत्तिद्वारा संवादिप्रवृत्तिजननेन प्रमाणं सफलं भवति । यथार्थ-अर्थप्रतिपत्तिश्च प्रमाणमन्तरा न सम्भवति प्रमाणतत्त्वनिरूपणपरं च न्यायशास्त्रम्। अतः न्यायशास्त्रस्य महत्येव अस्ति उपादेयता। न्यायशास्त्रस्य प्रयोजनं कथ्यते विद्वद्भिः इत्थम्-

> **मोहं रुणद्धि विमलीकुरुते च बुद्धिं**
> **सूते च संस्कृतपदव्यवहारशक्तिम्।**
> **शास्त्रान्तराभ्यसनयोग्यतया व्यनक्ति**
> **तर्कश्रमो न कुरुते कमिहोपकारम्॥**[43]

एवं मोक्षसाधनानुष्ठानेऽपि आन्वीक्षिक्यपराभिधस्य न्यायशास्त्रस्य अस्ति महान् उपयोगः। तथाहि - सकलप्राणिसमभिलषितायामात्यन्तिकदुःखनिवृत्तावात्म तत्त्वज्ञानम् अनिवार्यद्वारमिति निरचिन्वन् शास्त्रप्रणेतारो महर्षयः। तच्चात्मतत्त्वज्ञानं चतुर्विधं श्रवणं मननं निदिध्यासनं साक्षात्कारश्चेति।[44] तत्र मनने आन्वीक्षिकी उपयुज्यते। स च आन्वीक्षिक्याः उपयोगः तात्पर्यटीकाकारैः वर्णितः – 'आन्वीक्षिकी च संशयादितत्त्वज्ञापनं प्रमाणतत्त्वज्ञापनाय उपादत्ते, प्रमाणतत्त्वज्ञापनं च हेयोपादेयभेदव्यवस्थितप्रमेयतत्त्वपरिज्ञापनाय। तत्रापि आद्यन्तवर्जितदशवर्गज्ञापनेन आद्यन्तयोरेवात्मापवर्गयोः उपादेययोः तत्त्वज्ञानस्य उपकरोति' इति।[45]

### न्यायशास्त्रस्य अभिधेयम् –

न्यायदर्शनेन समानतन्त्रस्य वैशेषिकदर्शनस्य द्रव्यादिपदार्थसप्तकम् अभिधेयम्। **'धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्**[46]**'** इति वैशेषिकशास्त्रस्य अभिधेयप्रयोजनप्रतिपादकं काणादसूत्रम्। न्यायदर्शनस्य प्रमाणादिषोडशपदार्थाः अभिधेयाः। **"प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"** [47] इति न्यायशास्त्रस्य

[40] तत्र काणादपदं गौतमीयन्यायशास्त्रस्याप्युपलक्षणम्।

[41] महर्षिगौतमः,2013, न्यायसूत्रम्(न्यायभाष्यसहितं), पृष्ठसंख्या -26, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

[42] महर्षिगौतमः,2013, न्यायसूत्रम्(न्यायभाष्यसहितं), पृष्ठसंख्या -1, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

[43] विश्वगुणादर्शः-श्लोक-५५६

[44] चतस्त्रो हि प्रतिपत्तयः प्रमेये आत्मादौ। प्रथमा तावदागमाद्, यामाचक्षते श्रवणमिति। द्वितीया तु श्रुतस्य परीक्षा न्यायेनैवावस्थापनं, यामाहुर्मननमिति।...... तस्मादात्मादिसाक्षात्कारवतीं चतुर्थीं प्रमामशेषतद्गोचरवासनाविपर्यासशमनीमर्थ.....मुक्त इत्युच्यते।(न्या.वा.ता.टी.)

[45] महर्षिगौतमः,2013, न्यायदर्शनम् (न्यायभाष्यन्यायवार्तिकतात्पर्यटीकापरिशुद्धियुक्तं), पृष्ठसंख्या -68, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

[46] श्रीशङ्करमिश्रः, वि.सं.-१०७३,वैशेषिकसूत्रोपस्कारः, पृष्ठसंख्या-16,वाराणसी ,चौखम्बा प्रकाशन,

[47] महर्षिगौतमः,2013, न्यायसूत्रम्(न्यायभाष्यसहितं), पृष्ठसंख्या -9, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

[47] विश्वगुणादर्शः चम्पूकाव्यम्-श्लोक-५५६

Since 2009
ISSN- 0976-8645
UGC RN-41039

अभिधेयप्रयोजनप्रतिपादकं गौतमसूत्रम्। षोडशसु पदार्थेषु संशयादयश्चतुर्दश पदार्थाः प्रमाणोपयोगिनः। तत्र पुनः संशयादिनिर्णयान्ताः सप्त परार्थानुमानस्वरूपनिष्पत्तौ उपयुज्यन्ते। वादादिनिग्रहस्थानान्ताः सप्त प्रमाणफलस्य निर्णयस्य संरक्षणोपयोगिनः। तथा च संशयप्रयोजनदृष्टान्तसिद्धान्तादीनां चतुर्दशानां तत्त्वज्ञानेन प्रमाणानां प्रत्यक्षानुमानोपमानशब्दानां तत्त्वज्ञानम्। तेन द्वादशविधप्रमेयान्तर्गतानां शरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलानां दशानां तत्त्वज्ञानम्। तेन आत्मापवर्गयोः उपादेयप्रमेययोः तत्त्वज्ञानं भवति। तदिदानीं तादृशस्य न्यायशास्त्रस्य वर्तमानकाले का आवश्यकता? तस्य न्यायशास्त्रस्य वर्तमानकाले अध्ययनाध्यापनस्थितिः कथमस्ति? नूतनायामाः तत्र अपेक्षिताः उत न? इत्यादयः विषयाः प्रस्तुयन्ते। प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते इत्युक्त्यनुसारं प्रयोजनं फलं वा अज्ञात्वा कोऽपि कस्मिन्नपि कर्मणि न प्रवर्तते। अतः यदि न्यायशास्त्रे कस्यचित् जिज्ञासा उत्पत्यर्थं तस्य प्रयोजनमादौ ज्ञेयम्। तदेव उक्तं-

## न्यायशास्त्रस्य उपयोगिता-

1. न्यायशास्त्राध्ययनेन दैनन्दिनानुमानप्रयोगे निखरताप्राप्यते। यतः शास्त्रे हेत्वाभासं परिहृत्य अनुमानप्रयोगेन निर्दुष्टत्वम् आनयन्ति।यथा- अनुमानं यदा असत्यं भवति तदा कष्टमनुभवन्ति।

2. इतरशास्त्रेषु प्रतिपाद्यमानसिद्धान्तस्य मर्मज्ञानार्थं न्यायशास्त्रस्य प्रक्रियायाः परिचयः अपेक्ष्यते।यतः वेदान्त-मीमांसा-व्याकरण-साहित्येत्यादि शास्त्राणां वादग्रन्थाः नव्यन्यायेन बहु प्रभाविताः सन्ति।

3. न्यायशास्त्राध्ययनेन अस्माकं चिन्तनसरणिः एकरीत्या एव न भूत्वा विविधरीत्या आलोचनासामर्थ्यं प्राप्नोति। एकं विषयम् एकस्यामेव द्रष्ट्यां आलोचनेन तस्य निखरस्वरूपः ज्ञातुं न शक्यते।नानाविधया एकस्य विषयस्य चिन्तनपूर्वकं विमर्शेण तस्य विषयस्य गभीरता ज्ञातुं शक्यते।न्यायसूत्रकाराः चतुर्विंशतिविधविमर्शनप्रकारं प्राददर्शन्। तादृशविमर्शं अद्वैतसिद्धीत्यादि अनेकेषु वादग्रन्थेषु शास्त्रकाराः उपयुक्तवन्तः। न्यायलये प्रचलमान बहवः वादाः न्यायशास्त्रमाश्रयन्ति।

4. राज्यव्यवहारे तत्रापि प्रजाप्रभुत्वसंवादस्य महत्तमं स्थानम् । शासननिर्माणे, प्रयोगे, न्यायनिर्णये, अपराधशोधने, नियुक्तिकर्मणि च अनुमानमेव शरणम् । न्यायशास्त्रस्य उपयुक्ततां प्रकटीचकार स्मृतिकारः मनुः अपि।

त्रैविधेभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भाश्च लोकतः॥ इति[48]

विद्यां अन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिश्चेति चतुर्धा विभज्य अन्विक्षिक्याः प्राथम्यमाह ।

5. बुध्यवस्थापनाय न्यायः। अव्यस्थिता भवति बुद्धिः व्यसने, अभ्युदये च । तादृशावस्थायाम् अन्वीक्षिकीं बुद्धिं व्यवस्थापयति । प्रज्ञावैशारद्यं न्यायेन लभ्यते । तेन न पुनः सन्देहसम्भवः । अतः निष्कम्पप्रवृत्तिः । ततः फलावाप्तिः एवं क्रमेण सफलो भवति न्यायावलम◌्बनो जनः ।

6. वाक्संशोधनाय न्याय◌ः। वाक्यवैशारद्यं न्यायायत्तम् । यथावगतम् अवगमयितुं शक्यते न्यायविदा । यतो हि संसारः मिथः सम्बद्धः । तयोः सम्बन्धः विलक्षणः । स च सम्बन्धः सूक्ष्मतया ज्ञातुं

[48] मनुः, 2012, मनुस्मृतिः(कन्नडव्याख्यान), पृष्ठसंख्या-१२/१०६, धारवाड, समाजपुस्तकालयः



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

शक्यते न्यायशास्त्रेण । येन कारणेन न्यायशास्त्रीयभाषा अनुपमा । अत एव निरूप्यनिरूपकभावः, धर्मधर्मिभावः, विशेष्यविशेषणभावः, उद्देश्यविधेयभावः, अवच्छेद्यावच्छेदकभावः, कार्यकारणभाव◌ेत्यादयः सम्बन्धाः अनितरसाधारण्येन न्यायेनैव ज्ञायन्ते । तेन वाग्विशदा भवति । अर्थसंस्पर्शिनी हि वाक् विशुद्धा इत्युच्यते । अन्यथा अबोधः, अन्यथाबोधः, अल्पबोधो वा वाक्येन स्यात् ।तानुपहृत्य यथार्थबोधकक्षमं वाक्यं रचयितुं, यथा प्रतिपादितमेव अर्थम् अवगन्तुं न्यायशास्त्रम् उपकरोति।

7. न्यायदाने न्यायः। न्यायालये विवदादपदे वावदूकैः स्वपक्षसमर्थने कथं न्यायशास्त्रोपदिष्टः अशः अनुस्त्रियते इति स्थालीपुलाकन्यायेन सम्प्रति अवलोक्यते । गोहत्यानिषेधप्रकरणे वरिष्ठन्यायालये प्रवृत्ते वादे तृतीयः प्रश्नः परिश◌ीलनमर्हति । भारतीयसंविधाने अष्ठचत्वारंशः विधिः उल्लिखति ।

8. वर्तमानकालेऽस्मिन् न्यायशास्त्रस्य बहूपयोगिता वर्तते। उदा- **Artificial Intelligence** मध्ये उपयुज्यते। आधुनिके कालेऽस्मिन् रेबोयन्त्रमुपयुज्य अन्यान्यग्रहं च प्रेषयित्वा विज्ञानिनः खगोलस्य विषयसङ्ग्रहणं कुर्वन्ति। सुव्यवस्थितरूपेण तादृशयन्त्रस्य निर्माणे तस्य यन्त्रस्य कृते सूचना(commands) देया भवति। सूचनादाने सहकारी भवति न्याये विद्यमाना शाब्दबोधप्रक्रिया।

9. मानवे सहनशीलता विवेचनशक्तिश्च वर्धते न्यायशास्त्रपठनेन। त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्धेशो लक्षणा परीक्षा चेति।[49] उद्देश्य-लक्षणा-परीक्षैः अर्थस्य विवेचनं न्याये उपदिष्टमस्ति।

10. वस्तुनः निखरज्ञानप्राप्तिः न्यायाध्ययनेन सम्भवति। गभीरतया आलोचनाशक्तिः बुद्धितीक्ष्णतापि अनेन जायते।

11. काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमितियुक्त्यनुसारं शास्त्रान्तरस्य स्वरूपज्ञानाय न्यायशास्त्रमपेक्षितम्। रसगङ्गाधरः, अद्वैतसिद्धिः इत्यादयः ग्रन्थाः नव्यन्यायशैल्या वर्तन्ते।

12. प्राचीनन्यायशास्त्र◌े प्रमाणतः अर्थपरीक्षाप्रक्रियां निरूपयति। तदेव उक्तं –प्रमाणैः अर्थपरीक्षणं न्यायः इति। तस्य शास्त्रस्याध्ययनेन प्रमाणस्वरूपज्ञानम् अर्थस्वरूपज्ञानञ्च प्राप्यते । परीक्षाविधानमपि अवगम्यते । एवञ्च न्यायविदां प्रमाणतः परिक्षितार्थे निष्कम्पप्रवृत्तिनिवृत्ती जायते । ताभ्यां दुःखात् विमुच्यते । अतः दुःखपरिजिहीर्षूणाम◌् अतीव◌ोपयुक्तं न्यायशास्त्रम् । तदेव उक्तं- प्रमाण प्रमेय संशय प्रयोजन दृष्टान्त सिद्धान्तवयव-तर्क-निर्णय-वाद-जल्प-वितण्ड-हेत्वाभास-छल-जाति-निग्रहस्थानानाम् तत्त्वज्ञानात् निश्रेयसाधिगमः ।[50] एवमेव - दुःख जन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्गः।[51] इति

13. निस्सन्दिग्धतया निखिलनिसर्गविवेचनं कृत्वा लौकिकमलौकिकञ्च अर्थं दर्शयति ।

14. यथार्थद्रष्ठा यथार्थवचनेन लोकमनुगृह्णाति । तच्च यथार्थवचनं कौशलमपेक्षते । निरूपणाकौशलं च न्यायशास्त्राध्ययनात् अवाप्यते ।

15. अस्माकं दैनन्दिनजीवने उपयुज्यमानवस्तूनां निखरज्ञानेन सह परमाण्वादिभौतशास्त्रीयविचारः, आत्म-मोक्षेत्यादि दार्शनिकविचारः, प्रत्यक्षानुमानादिप्रमाणविचारः, शाब्दबोधविचारः च

[49] महर्षिगौतमः,2013, न्यायसूत्रम्(न्यायभाष्यसहितं), पृष्ठसंख्या - 35, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

[50] महर्षिगौतमः,2013, न्यायसूत्रम्(न्यायभाष्यसहितं), पृष्ठसंख्या - 9, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

[51] महर्षिगौतमः,2013, न्यायसूत्रम्(न्यायभाष्यसहितं), पृष्ठसंख्या - 29, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

Since 2009
ISSN- 0976-8645
UGC RN-41039

न्यायशास्त्रेन ज्ञायते। तदेव उक्तं-प्रदीपः सर्वविद्यानाम् उपायः सर्व कर्मणाम्।

आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता॥[52]

## न्यायशास्त्राध्ययनाध्यापने नूतनसम्भावनाः-

- न्यायाध्येतॄणां कृते संस्कृतसम्भाषणम् अनिवार्यं भवेत्। यतः संस्कृतसम्भाषणाभ्यासो वा संस्कृतज्ञानं वा यदि नास्ति कस्यचित् छात्रस्य सः न्यायशास्त्रस्य क्लिष्टां पारिभाषिकशब्दयुक्तभाषां कथं वा अवगच्छेत्।
- अधीतव्याकरणकाव्यकोशः अनधीतन्यायशास्त्रः बालः[53] इति इति कथयति अन्नम्भट्टः। यस्य सामान्यतया व्याकरणस्य काव्यस्य कोषस्य ज्ञानं भवति सः एव न्यायाध्ययने अधिकारी भवति। अतः न्यायाध्ययने अधिकारप्राप्त्यर्थम् आदौ व्याकरणकोषसम्बद्धपाठ्यक्रमः निश्चयेन भवेत् न्यायाध्ययनस्थलेषु।
- परस्परपूरकाणि शास्त्राणि इत्यतः शास्त्रान्तरछात्राः अपि यदि न्यायशास्त्राध्ययने उत्सुकाः तर्हि तेषां कृते अवकाशकल्पनार्थं (distance education) स्वाध्यायव्यवस्था भवेत्।यद्यपि distance education पद्धतिः व्याकरणसाहित्यादिशास्त्रे वर्तते। रा.सं.सं मध्ये । परन्तु न्याये नास्ति। अतः न्याये अपि भवेत्। तेन गृहे उपविष्टापि काचित् महिलापि न्यायाध्ययनं कर्तुं शक्नोति।
- न्यायस्य मूलग्रन्थाः ये सन्ति तर्कसङ्ग्रहादिग्रन्थानाम् अध्यापनार्थं पि.पि.टि इत्यादिनाम् उपयोगं कुर्युः। न्यायशास्त्रं लौकिकशास्त्रमित्यतः चित्रप्रदर्शनपुरस्सरं पि.पि.टि माध्यमेन बोधयितुं शक्यते। उद्ग्रन्थपाठनार्थमपि कृष्णफलकस्योपयोगः वर्तमानकाले न क्रियते। अथवा न्यूनतया एव क्रियते। अतः कृष्णफलकमुपयुज्य पाठनेन छात्राः सम्यक् अवगन्तुं शक्नुवन्ति।
- न्यायकोशग्रन्थानां निर्माणम्। यथा- आत्मा, जीवेत्यादि शब्दानां विवरणं कस्मिन् कस्मिन् ग्रन्थे वर्तते इति विवरणं तस्मिन् कोशे दातव्यम्।
- न्यायशास्त्राध्ययनात् पूर्वं प्रवेशपरीक्षा भवेत्। तेन न्यायाध्ययने ये योग्याः भवन्ति ते एव चिताः भवन्ति। ते अग्रे सम्यक् अध्ययनं च कुर्वन्ति।
- प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रह स्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः[54] इति सूत्रानुसारं न्यायशास्त्रस्य मुख्यं लक्ष्यं भवति निःश्रेयसप्राप्तिः । तत्र कारणं भवति तत्त्वज्ञानं यथार्थज्ञानं वा । तादृशतत्त्वज्ञानस्य प्राप्त्यर्थं मनसः निग्रहः अत्यावश्यकः। मनसः निग्रहः च ध्यानेन भवति। अतः ध्यानक्रेन्द्राणि न्यायविद्यालये भवयुः। अद्यत्वे वैदुष्यप्रदर्शनाय न्यायशास्त्रस्य उपयोगः बहुत्र दृश्यते। तन्निवारणाय ध्यानाभ्यासः अत्यावश्यकः। न्यायशास्त्रज्ञाः यथा लोकमोहे शास्त्रमोहे न पतेयुः तदर्थम् आरम्भात् एव छात्राणां कृते न्यायशास्त्रस्य मुख्यलक्ष्यस्य ज्ञानं देयम्।
- पूर्वपक्षसिद्धान्तयुक्ताः एव ग्रन्थाः न्याये वर्तन्ते। तदवगन्तु बहु काठिण्यमनुभवन्ति छात्राः। अतः तादृशग्रन्थस्य एकं एकं भागं स्वीकृत्य सरलया भाषया यथा अवगमनं स्यात् तथा सम्भाषणरूपकग्रन्थानां लेखनं भवेत्। तेन कथारूपिविषयम् अवगन्तु छात्राः उत्सुकाः भवन्ति।

---

[52] महर्षिगौतमः,2013, न्यायसूत्रम्(न्यायभाष्यसहितं), पृष्ठसंख्या - 26, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

[53] अन्नम्भट्टः,2007, तर्कसङ्ग्रहः, पृष्ठसंख्या-2, वाराणसी, चौखम्बा विद्याभवन

[54] महर्षिगौतमः,2013, न्यायसूत्रम्(न्यायभाष्यसहितं), पृष्ठसंख्या - 9, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

- अवच्छिन्नावच्छेदकयुक्ता न्यायभाषा कठिणा बोधागम्या इति भावः छात्रेषु अद्यत्वे आधिक्येन दृश्यते। अतः न्यायशास्त्रं स्वीकर्तुं भीतिं प्राप्नुवन्ति छात्राः। अतः न्यायसम्बद्धपारिभाषिकशब्दानां विवरणं सरलतया भवेयुः।
- न्यायशास्त्रस्याध्ययनेन सह पाश्चात्यदर्शनस्यापि परिचयः न्यायच्छात्राणां भवेत् अतः पाठ्यक्रमे पाश्चात्यदर्शनस्यापि परिचयः भवेत्।
- न्यायसम्बद्धान्तर्जालस्य निर्माणम् आधिक्येन भवेत्। तेन गृहे एव उपविश्य समग्रमपि न्यायसम्बद्धविषयम् अन्तर्जालात् प्राप्तुं शक्नुमः। न्यायसम्बद्धपुस्तकानां लेखनादिनां सङ्कलनम् अन्तर्जाले स्यात्।
- न्यायशास्त्राध्ययनेन छात्राणां बुद्धिसामर्थ्यं वर्धते इत्यतः केवलशास्त्रसम्बद्धकार्येषु एव गुरुः छात्रं न प्रेरयेत् अपि तु तादृशच्छात्राणां कृते IAS इत्यादि क्षेत्रेऽपि इच्छां गुरवः वर्धयेयुः। यतः न्यायाध्येतारः न्यायकरणेऽपि समर्थाः भवन्तीत्यतः समाजस्योन्नतिः अनेन भवति।
- प्राचीनन्याये निःश्रेयससम्बद्धविषयाः निहिताः सन्ति। तादृशस्य न्यायसूत्रस्य अतीवसरलतया व्याख्यानं स्वमातृभाषया कार्यम्। अनुवादः कार्यः यथा जनसामान्याः अपि तज्ज्ञात्वा स्वजीवनसाफल्यं प्राप्नुयुः।
- दूरवाण्यां न्यायशास्त्रसम्बद्ध- Application (app) निर्माणं भवेत्। उदा- न्यायसूत्राणां – Application (app) निर्मातव्यम्। तेन छात्राः बहु उपकृताः भवन्ति।
- न्यायग्रन्थानां सूची, लेखनसूची वा TEI मध्ये tag कृत्वा अन्तर्जाले स्थापनीयम्। तेन न्यायाध्येतारः सुलभेन कस्यचित् पुस्तकस्य विवरणं न्यायच्छात्राः सुलभेन प्राप्तुमर्हन्ति।
- YouTube मध्ये न्यायाध्यापकाः विद्वांसः वा सरलशैल्याद्धृतन्यायपाठस्य विडियो निर्माय स्थापयेयुः। तेन यः कोऽपि न्यायोत्सुकच्छात्रः सति सन्देहे विडियों दृष्ट्वा स्वसमस्यायाः परिहारं प्राप्तुं शक्नोति।
- यदा विद्यालये न्यायपाठः चलति तदा तस्य voice record – कृत्वा तदपि what's up समूहे Google - मध्ये वा स्थापयितुं शक्यते।
- अतीवसरलता यदि न्यायमूलग्रन्थे आनेया तर्हि अभ्यासपुस्तिकायाः निर्माणं शक्यते। अथवा cartoon- माध्यमेन लघुबालानां कृतेऽपि न्यायः बोधयितुं शक्यते। यथा आस्था चेनेल मध्ये योगशास्त्रं cartoon- माध्यमेन लघुबालानां कृते बोधयितुं शक्यते।
- दूरदर्शनादिषु अपि न्यायपाठः कर्तुं शक्यते। सद्यः प्रद्युद्मगुरुवर्यः आस्थाचेनेल् मध्ये न्यायशास्त्रं पाठयन् वर्तते।विभिन्नन्यायाभाषणानां सङ्ग्रहणं कृत्वा न्यायभाषणपुस्तकनिर्माणं कर्तुं शक्यते तेन भाषणस्पर्धादिषु छात्राणां मार्गदर्शकं भवितुमर्हति तत्पुस्तकम्।
- प्राचीनन्यायशास्त्रमारभ्य वर्तमानकालं यावत् यावतानां ग्रन्थानां लेखनं, शोधलेखनं वा न्यायशास्त्रे जातमस्ति तस्यावली निर्माय न्यायान्तर्जाले स्थापयितुं शक्यते।
- न्यायच्छात्राणां विदुषां वा What's ap group(समूहं) निर्माय तत्र शास्त्रचर्चा कर्तुं शक्यते। यथा न्यायदर्शनमिति एकः समूहः वर्तते। भारतीयविद्वत्परिषदिति Google – मध्ये शास्त्रचर्चापरकः समूहः वर्तते।
- पक्षे एकवारं न्यायच्छात्राणां कृते गोष्ठी आयोजितुं शक्यते तत्र न्यायरसप्रश्नः नाम न्यायसम्बद्धसरलप्रश्नानामावलीं कृत्वा छात्राणां परीक्षणं

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

कर्तुं शक्यते। अधीतस्य न्यायसिद्धान्तस्य व्याख्यानम् अनुवादं वा कर्तुं वक्तव्यं तस्यां गोष्ठ्याम्।युगलवाक्यार्थाभ्यासः छात्राणां कृते कारणीया।

इत्येवं क्रमेण न्यायशास्त्रस्य पठनपाठनादिषु परिवर्तनमपेक्ष्यते। कदाचित् अत्यन्ताधुनिकपद्धतिः अध्ययनस्य प्रतिबन्धकः अपि स्यात्। किन्तु छात्राणां स्तरानुसारं ताः पद्धतयः उपयोक्तव्याः।परम्पराशैल्या सह आधुनिकपद्धतिमेलनेन न्यायादिशास्त्राणां संरक्षणं श्रेष्ठतावर्धनञ्च भवति। इति शम्।

.................................................................................

## सन्दर्भग्रन्थसूची

१.महर्षिगौतमः,संस्करणवर्षः-2013,न्यायसूत्रम्(न्यायभाष्यसहितं), वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

२. महर्षिगौतमः, संस्करणवर्षः-2013, न्यायदर्शनम् (न्यायभाष्यन्यायवार्तिकतात्पर्यटीकापरिशुद्धियुक्तं), वाराणसी, चौखम्बा संस्कृत सीरीज आफिस

३.श्रीशङ्करमिश्रः, संस्करणवर्षः-वि.सं.-१०७३,वैशेषिकसूत्रोपस्कारः, वाराणसी ,चौखम्बा प्रकाशन,

४.मनुः, संस्करणवर्षः-2012, मनुस्मृतिः(कन्नडव्याख्यान), धारवाड, समाजपुस्तकालयः

५. अन्नम्भट्टः, संस्करणवर्षः-2007, तर्कसङ्ग्रहः, वाराणसी, चौखम्बा विद्याभवन

# बङ्गभूमौ स्मृतिशास्त्रपरम्परा

डा. गिरिधारी पण्डा[55]

.................................................................................

**कूटशब्दाः** बङ्गभूमिः, स्मृतिशास्त्रम्, वङ्गीयस्मृतिः

.................................................................................

**शोधसारः-**

'वेदोऽखिलो धर्ममूलम्' [56] – इत्युक्त्यनुसारेण सर्वेषां धर्माणां मूलतत्त्वस्याधारभूतो भवति वेदः। पुनश्च 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः [57] (तैतिरीयसंहिता-भाष्यभूमिका), 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते.' इत्यादिभिः उक्तिभिः ज्ञायते यत् वेदः न केवलं धर्मस्याधारः,अपि तु वेदः सामाजिक-सास्कृतिक-धार्मिक-अर्थनैतिक-राजनैतिकादिज्ञानस्य साधक इत्यत्र नास्ति कश्चित् सन्देहावकाशः, येन 'सर्वज्ञानमयो हि सः'[58]–– (मनु.2-3) इत्युक्तेः सार्थक्यं भजते। श्रुतिशास्त्ररूपेण प्रथितस्यास्य वेदस्य सर्वविधं ज्ञानं पाथेयीकृत्य समाजस्य कृते आचरणीयं विधिं नियमं च प्रतिपाद्य स्मृतिशास्त्रं स्वतनुं प्रथ्नाति। अत एवोच्यते यत्- श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः[59] (मनुस्मृतिः-2-10)। येन शास्त्रेण वेदविहितः धर्मः स्मर्यते, तदेव स्मृतिशास्त्रमित्याशयः। वैदिकसंहितायाः सूत्रसाहित्यात् समुद्भूतमिदं शास्त्रमाद्यावस्थायां धर्मसूत्रनाम्ना अभिहितम्,परन्तु परवर्त्तिनिसमये तेषां धर्मसूत्राणां छन्दोबद्धैः श्लोकैः विरच्य धर्मशास्त्ररूपेण स्मृतिशास्त्ररूपेण वा विरचितम्। विविधैः धार्मिक-सामाजिकादिनियमैः समाजे व्यवहारविज्ञानस्य सार्वजनीनतासाधनेन समाजस्योन्तिसाधनमस्य स्मृतिशास्त्रस्य प्रमुखमुद्देश्यम्। सामाजविज्ञानतत्त्वसम्बलितस्यास्य स्मृतिशास्त्रस्य विकाशधारायां भारतदेशे देशान्तरे च बहूनां विद्वद्वराणां स्मृतिशास्त्रकाराणां योगदानमनस्वीकार्यम् । तत्र वङ्गभूमेः शास्त्रकर्त्तारः अन्यतमाः ।

[55] सहायकाचार्यः, संस्कृतविभागः, मेदिनीपुरमहाविद्यालयः (स्वायत्तशासी) मेदिनीपुरम्।

[56] . मनुस्मृतिः-2-6

[57] . तै. भाष्यभूमिका

[58] . मनु.2-3

[59] . मनुस्मृतिः-2-10



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

.................................................................................

बङ्गभूमौ स्मृतिशास्त्रवृत्तेः परम्परा बहुप्राचीना । ख्रीष्टीयदशमशतकं यावत् वङ्गभूमौ स्मृतिशास्त्रपरम्परा यद्यपि उज्जीविता आसीत्, तथापि दशमशताब्द्याः परं बहवः वङ्गीयाः तेषां मौलिकग्रन्थान् टीकाः व्याख्यानग्रन्थान् च विरच्य वङ्गभूमौ स्मृतिशास्त्रपरम्परायाः विकाशं साधितवन्तः ।संस्कृतभाषाचर्च्चायां साहित्यचर्च्चायाञ्च बङ्गीयाः अप्रतिममतिसम्पन्ना आसन्। विशेषतः दशमशताब्द्याः परं मध्ययुगे सस्कृते काव्य-नाटक-अलङ्कारशास्त्र-छन्दःशास्त्र-कोष-व्याकरण-गणितविद्या-सङ्गीतविद्या-कामशास्त्र-आयुर्वेद-अध्यात्मविद्या-दर्शन- न्यायशास्त्र-वेदान्त-स्मृत्यादिषु शास्त्रेषु वङ्गीयविद्वद्वराः बहून् ग्रन्थान् विनिर्माय विशालसंस्कृतवाङ्मयस्य कलेवरं साधितवन्तः। ख्रीष्टियदशमशतके वङ्ग इत्युक्ते पूर्ववङ्ग एव अववोध्यते। वङ्गीयानां गौडीयपरम्पपरा सर्वजनप्रसिद्धा। बाण-भामह-दण्डिनां समये शास्त्रीयपरम्परायां वङ्गीयानामेषा गौडीयपरम्परा प्रतष्ठिता आसीत्। रुद्रदामन-खारवेल[60] (154-ख्री.पू.) पुलुमायी-शिलालेखषु,चन्द्रवर्मणः सुसुनिया-प्रस्तरलेखे[61] (वाङ्कुडामण्डले-360 ख्री.पू.) च गौडीयशैल्याः स्वीकृतिः लभ्यते।सप्तमशतकीये लोकनाथस्य ताम्रलेखे,भास्करवर्मणो निदानपुराभिलेखे वङ्गभूमेः तात्कालिकस्य संस्कृतस्य स्थितिः उपलभ्यते।पञ्मशतकात् सप्तमशतकमध्ये आगतानां चीनपरिव्राजकानां लेखेषु जयन्तभट्टस्य ग्रन्थे दशमशतकीये राजशेखरीयग्रन्थे,एकादशशतकीये क्षमेन्द्रग्रन्थे वङ्गीयानां च गौडीयपरम्परा परिवृंहिता दृश्यते।तदानीन्तनवङ्गीयसमाजस्य चित्रं ब्रह्मवैवर्त्तपुराणे, बृहद्धर्मपुराणे, पद्मपुराणे, विजयगुप्तस्य मानसमङ्गले च स्पष्टं चित्रं वर्तते।

तत्र सामाजविज्ञानतत्त्वैः साधितायाः वििविधसंस्कारनीतिप्रणीतायाः स्मृतिशास्त्रवृत्तेः विकाशधारायामपि बहवः बङ्गीयस्मृतिशास्त्रकाराः तेषाममूल्यकृतीः उत्सर्गीकृत्य बङ्गभूमेः नाम स्वर्णाक्षरे लिपिबद्धं कृतवन्तः। ऐतिहासिकपर्य्यवेक्षणात् प्रतीयते यत् पालवंशस्य पतनम्- सेनवंशस्योत्थानमित्यनयोः युगसन्धिक्षणे नव्यस्मृतिशास्त्रस्योत्पत्तिरभवत्। अस्मिन्नेव समये रामाई-पण्डितस्य शून्यपुराणम्,रूपराम-खेलारामयोः धर्ममङ्गलकाव्यमिति ग्रन्थद्वयं प्रतिष्ठितमभवत्।चैतन्यस्य वैष्णवधर्मस्यापि प्रचारः जातः।

यद् भवतु वङ्गभूमेः स्मृतिशास्त्रपरम्परायां येषामवदानं सुमहत्त्वपूर्णं विद्यते, तेषु एकादशख्रीष्टाब्दे आविर्भूतः भवदेवभट्टः अन्यतमः। अधुना उत्कलप्रदेशस्य ओडिशायाः वा राजधानी-भूवनेश्वरे स्थितस्य (Bhubaneswar-Capital of Odisha) अनन्तवासुदेवस्य मन्दिरगात्रे उत्कीर्णलिपौ अस्य प्रशस्तिः प्राप्यते। शिलालेखस्यास्य सम्पादनकार्यम् अध्यापककैलहोर्नमहोदयेन [62] तदीये एपिग्राफिया-इन्डिकाग्रन्थे कृतम् (VOL.VI,PP.203-07)। पुनः अस्य मुद्रणं सम्पादनं[63] च वरेन्द्रानुसन्धानसमितिचित्राध्यक्षेण श्रीयुक्तननीगोपालमजुमदारमहोदयेन साधितम्।(VOl.III, pp. 25-41)। वङ्गदेशान्तर्गतस्य राढ-इति नाम्नः सिंहल इति स्थानस्य अधिवासी आसीत्। तदानीन्तन शासकस्य राज्ञः हरिवर्मणः सान्धिविग्रहिकोऽयं भवदेवभट्टः वालवल्लभीभूजङ्ग इति उपाधिना विभूषितः। अतः अस्य जीवनकालः एकादश-द्वादशशतकयोर्मध्ये इति गवेषकैः ऐतिहासिकैश्च निरूपितः। प्रायश्चितप्रकरणमस्य प्रमुखः ग्रन्थः। नाममात्रेणैव विषयवस्तुनः परिचायकोऽयं स्मृतिग्रन्थः वङ्गभूमेः स्मृतिशास्त्रपरम्परायां अधुना उपलब्धेषु ग्रन्थेषु सर्वप्राचीनः । वाचस्पतिकविलिखिते तदीयप्रशस्तिपाठे असौ धर्मशास्त्राभिज्ञः ज्ञानजगति अगस्तिमुनिभावेन आख्यायितः। वेदान्तादिदर्शनेष्वपि तस्यापरिमितं ज्ञानमासीत्। विशेषतः अद्वैतवादिमतादर्शेणानुप्राणितोभवत्। यदुक्तं तत्र - 'असौ

[60] . रुद्रदामन-खारवेल (154-ख्री.पू.

अनुप्रवर्तते, तत् इन्द्रियविषयविकल्पने प्रवृत्त मनः अस्य यतेः प्रज्ञाम् आत्मानात्मविवेकजां नाशयति । कथम् वायुः नावम् इव अम्भसि । उदके जिगमिषतां मार्गात् उद्धृत्य उन्मार्गे यथा वायुः नावं प्रवर्तयति एवम् आत्मविषयां प्रज्ञां हृत्वा मनः विषयविषयां करोति (21)|

योगाभ्यामेन नरः मानसिकोन्नतिं एवम् आप्नोति यद्यपि विषयोपलक्षितानि विषयशछब्दवाच्यानि इन्द्रियाणि अथवा विषया एव अनाह्रियमाणविषयस्य कष्टे तपसि स्थितस्य मूर्खस्य अपि विनिवर्तन्ते देहवतः, रसः विषयेषु यः तं वर्जयित्वा । 'रसशब्दो रागे प्रसिद्धः' 'स्वरसेन प्रवृत्तो रसिको रसज्ञः' इत्यादिदर्शनात् । सः अपि रसः रसज्ञानरूपः सूक्ष्मः अस्य यतेः परं परमार्थतत्त्वं ब्रह्म दृष्ट्वा उपलभ्य अहं एव तत् इति वर्तमानस्य निवर्तते, निर्बीजं विषयविज्ञानं सपद्यते हति अर्थः । न असति सम्यग्दर्शने रसाय उच्छेदः, तस्मात सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यम् कर्तव्यम् इति अभिप्रायः (22) ।।

अमनीभावः कथं साधनीयः?

स्वात्मन्येव सदा स्थित्वा मनो नश्यति योगिनः ।
वासनानां क्षयश्चातः स्वाध्यासापनयं कुरु ।।23

कथं पुनः अमनीभावः इति । उच्यते आत्मा एव सत्यम् आत्मसत्यं, मृत्तिकावत् – वाचारम्भणं विकारो नामधेयं मृत्तिका इत्येवसत्यम् इति श्रुतेः । तस्य शास्त्राचार्योपदेशम् अन्ववबोधः आत्मसत्यानुबोधः। तेन संकल्प्याभावात् तत् न संकल्पयते दाह्याभावे ज्वलनम इव अग्नेः यस्मिन् काले, तस्मिन् काले अमनस्ताम् अमनोभावं याति। ग्राह्याभावे तत् मनः अग्रहं ग्रहणविकल्पनावर्जितं भवति (24) । मनसः अन्तर्मुखता आत्मसाक्षात्कारस्य कारणं कथं भवति इति वर्णितम् आचार्यैः -
यथा यथा प्रत्यगवस्थितं मनः तथा तथा मुच्चति वाह्यवासनाः ।
निःशेषमोक्षे सति वासनानाम् आत्मानुभूतिः प्रतिबन्धशून्या ।।
बाह्ये निरुध्ये मनसः प्रसन्नता मनः प्रसादे परमात्मदर्शनम् ।
तस्मिन् सुदृष्टे भवबन्धनाशो बहिर्निरोधः पदवी विमुक्तेः ।।25
एवं अद्वैतदर्शने आत्मसाक्षात्कारसामग्र्याम् मनोविमर्शः पर्यवसायी वर्तते।

Since 2009
ISSN- 0976-8645
UGC RN-41039

1. ब्रह्मसूत्र भाष्यम् १-१-२
2. ब्रह्मसूत्र भाष्यम्३-३-३२
3. उपदेशसाहस्री ५-४-१८-८
4. केनोपनिषद्भाष्यम् १-५
5. उपदेशसाहस्री १८-३२-३३
6. मुण्डक-उपानषद्भाष्यम् २-२-८
7. तत्तिरीय-उपनिषद्भाप्यम् २-१
8. छान्दोग्यभाष्यम् २-७-१
9. छान्दोग्यभाष्यम् ५-१-५
10. ऐतरेय-भाष्यम् ५-२
11. बृहदारण्यक भाष्यम् १-५-३
12. छान्दोग्यभाष्यम् ८-१२-५
13. कठोपनिषद्भाष्यम् ३-३
14. विवेकचूडामणिः९५-९६
15. विवेकचडामणिः१६९-१७०
16. माण्डूक्योपनिषद्भाष्यम् ४
17. छान्दोग्यभाप्यम् ६-८-१
18. माण्डूक्य-उपनिषद्भाष्यम् ७
19. अपरोक्षानुभूतिः १२४
20. विवेकचूडामणिः १७४-१७५
21. भगवद्गीता – भाष्यम् २-६०-६७
22. भगवद्गीताभाष्यम् २-५९
23. विवेकचूडामणिः २७८
24. गौडपादकारिका भाष्य ३-३
25. विवेकचूडामणिः २७७, ३३६

## सन्दर्भग्रन्थसूची

१. ब्रह्म सूत्र भाष्यम् – श्री शारदापीठम् शृङ्गेरी।
२. विवेकचूडामणिः – श्री रामकृष्णाश्रम मैसूर।
३. भगवद्गीताभाष्यम् – गीताप्रेस्, गोरखपुर।
४. अपरोक्षानुभूतिः - श्री रामकृष्णाश्रम मैसूर।
५. माण्डूक्य-उपनिषद्भाष्यम् - गीताप्रेस्, गोरखपुर।
६. छान्दोग्यभाष्यम् - गीताप्रेस्, गोरखपुर।
७. कठोपनिषद्भाष्यम् - गीताप्रेस्, गोरखपुर।
८. केनोपनिषद्भाष्यम् - गीताप्रेस्, गोरखपुर।
९. तत्तिरीय-उपनिषद्भाप्यम् - गीताप्रेस्, गोरखपुर।
१०. ऐतरेय-भाष्यम् - गीताप्रेस्, गोरखपुर।
११. बृहदारण्यक भाष्यम् - गीताप्रेस्, गोरखपुर।
१२. गौडपादकारिका भाष्यम् गीताप्रेस्, गोरखपुर।



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

# पुराणोत्पत्तिर्महत्त्वञ्च

डॉ. मुकेशकुमारटेलर:

**कूटशब्दाः-**पुराणम्, व्युत्पत्तिः, परिभाषा, पुराणोत्पत्तिः, पुराणविद्या, वेदव्यासः, कृष्णद्वैपायनः, पुराणानां महत्त्वम् , चतुर्दशविद्याः, पुराणोद्देश्यम्

**शोधसारः-**
भारतीया संस्कृतिर्हि श्रुति-स्मृति-पुराणानामाश्रयेणाद्य यावत् प्रचलति । वेदेषु यद् भारतीयाचारविचारव्यवहारस्वरूपं सङ्क्षेपत उपलभ्यते तत् स्मृतिषु पुराणेषु च कथनोपकथनद्वारा विस्तारं प्राप्यते । भगवता कृष्णद्वैपायनव्यासेन लोककल्याणाय पुराणानां रचना कृता । वेदानामुपबृंहणमेव पुराणानां मूलोद्देश्यम् । वैदिकगूढरहस्यानां सरलभाषायां जनोपयोगीकथानकानां माध्यमेन प्रकटीकरणस्य कार्यं पुराणैः सम्यक् कृतम् । अपि च भारतजनमानसे भक्ति-ज्ञान-वैराग्य-सदाचार- धर्माचरणादीनां प्रतिष्ठापनायाः कार्यमपि पुराणानां माध्यमेनैव जातम् । पुराणशब्दस्य परिभाषा विषये विद्वत्स्वपि मतवैभिन्यं दृश्यते । पुरातनपरम्पराव्यवहारघटनादिकस्य परिचायकाः ग्रन्थाः पुराणरूपे प्रसिद्धाः । अष्टाविंशतितमेन व्यासेन भगवता कृष्णद्वैपायनेन चतुर्णां वेदानां पुराणसंहितायाश्च विस्तारोऽष्टादशपुराणेषु कृतः ।

संस्कृतवाङ्मये पुराणानां विशिष्टं महत्त्वं विद्यते । प्राचीनभारतीयसंस्कृतेरध्ययनार्थं पुराणानामध्ययनमत्यन्तावश्यकं भवति । पौराणिकसाहित्यं न केवलं संस्कृतवाङ्मयस्यापितु भारतीयसंस्कृतेरमूल्यनिधिरप्यस्ति । इतिहासस्याध्ययनदृष्ट्यापि पुराणानां महत्त्वं सुविदितमेव । भगवता कृष्णद्वैपायनव्यासेन लोककल्याणाय पुराणानां रचना कृता । वेदानामुपबृंहणमेव पुराणानां मूलोद्देश्यम् । वैदिकगूढरहस्यानां सरलभाषायां जनोपयोगिनां कथानकानां माध्यमेन प्रकटीकरणस्य कार्यं पुराणैः सम्यक्कृतम् । अपि च भारतजनमानसे भक्ति-ज्ञान-वैराग्य-सदाचार-धर्माचरणादीनां प्रतिष्ठापनायाः कार्यमपि पुराणानां माध्यमेनैव जातम् ।

पुराणेतिपदस्य व्युत्पत्तिः **'पुरा भवम्'** इत्यर्थे **'सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च'**[126] इति सूत्रेण **'ट्यु'** इति प्रत्ययाद्भवति । यास्केन निरुक्ते 'पुराणम्' इति शब्दस्य निर्वचनं कृतम्-**'पुराणं कस्मात् । पुरा नवं भवति ।'**[127] इति । तात्पर्यमस्ति यत् प्राचीनं भूत्वापि नवीनं भवतीति पुराणम् ।

पुराणेष्वपि पुराणशब्दस्य व्युत्पत्तिः प्रदर्शिता । वायुपुराणे **'पुरा ह्यनति'**[128] अर्थात् प्राचीनकाले यद्विद्यमानमासीदित्यस्मिन्नर्थे व्युत्पत्तिः कृता । ब्रह्माण्डपुराणे **'पुरा ह्यभूच्चैतत्'**[129] अर्थात् प्राचीनकालेऽभवदिदमिति व्युत्पत्तिः प्रदर्शिता । पद्मपुराणे कथितम्- **'पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्'**[130] । प्राचीनकालिकीनां परम्पराणां प्रवचनं कुर्वन्त्येतस्मादेव कारणादेतानि पुराणानि प्रोक्तानीत्यर्थः ।

पुराणशब्दस्य परिभाषाविषये विभिन्नविदुषां मतान्यपि दर्शनीयानि । मधुसूदनसरस्वतीमहाभागेनोक्तं यत् विश्वसृष्टेरितिहासः पुराणं कथ्यते ।[131] सायणाचार्येणाप्यस्मिन् प्रसङ्गे कथितम्- **'जगतः प्रागवस्थामनुक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्'**[132] इति । अर्थाज्जगतः उत्पत्तेः पूर्वादिवारभ्य सृजनस्य क्रमिकविकासयात्रायाः वर्णनमेव पुराणम् ।

### (अ) पुराणोत्पत्तिः

पुराणशब्दस्य सर्वप्रथमोल्लेखः ऋग्वेदे प्राप्यते । तत्र पुराणेति शब्दस्य विभिन्नार्थेषु विभिन्नमन्त्रेषु प्रयोगोऽभवत् यथा-

**'सना पुराणमध्येम्यारान्महः पितुर्जनितुर्जामि तन्नः'**[133] , **'पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्याम्'**[134] , **'चाक्लृप्रे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे'**[135] इत्यादिषु मन्त्रेषु पुराणेति शब्दः प्राचीनतायाः द्योतकः परन्तु ऋग्वेदस्यैव **'तं गाथया पुराण्या पुनानमभ्यनूषत'**[136] इत्यस्मिन् मन्त्रे शब्दोऽयं **'गाथया'** इति पदस्य विशेषणरूपे प्रयुक्तः । एवमेव यजुर्वेदेऽपि **'ताभ्यां पतेम सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पुराणाः'**[137] , **'तदनु प्रेत सुकृतामु लोकं यत्रऽऋषयो**

[126] अष्टाध्यायी 4/3/23
[127] निरुक्तम् 3/19
[128] वायुपुराणे 1/48
[129] ब्रह्माण्डपुराणे 1/1/173
[130] पद्मपुराणे-सृष्टिखण्डे-2/54
[131] मधुसूदनसरस्वतीमहाभागस्य 'पुराणोत्पत्तिप्रसङ्गे' । पुराणरहस्ये, पृ0सं0-2
[132] आचार्यसायणेन - ऐतरेयब्राह्मणस्य भूमिकायाम् ।
[133] ऋग्वेदे 3/54/9
[134] ऋग्वेदे 3/58/6
[135] ऋग्वेदे 10/130/6
[136] ऋग्वेदे 9/99/4
[137] यजुर्वेदे 18/52

Since 2009
ISSN- 0976-8645
UGC RN-41039

**जग्मुः प्रथमजाः पुराणाः'** [138] इत्यादिषु मन्त्रेष्वपि पुराणशब्दः प्राचीनेत्यस्मिन्नेवार्थे प्रयुक्तः ।

अथर्ववेदे पुराणोत्पत्तिविषये कथितमस्ति यद्यज्ञोच्छिष्टादेव वेदाः पुराणानि देवाश्चोत्पन्नाः जाताः -

**ऋचः सामानि च्छन्दांसि पुराणं यजुषा सह ।**
**उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥**[139]

**'तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन्'** [140] इत्यथर्ववेदस्यैवैकस्मिन् मन्त्रे पुराणशब्दस्य प्रयोगः इतिहासगाथानाराशंसीत्यादिभिः पदैः साकमभूत् । अतएवात्र इदमवश्यमेव स्पष्टं भवति यदत्र पुराणेति शब्दः प्राचीनमात्रार्थद्योतक एव न प्रयुक्तः । यतो ह्यथर्ववेदोऽर्वाचीनो मन्यतेऽतस्तत्रायं शब्दः साहित्यस्यैकस्याः विशिष्टशाखायाः स्वरूपं प्राप्तः ।

ब्राह्मणसाहित्येऽपि पुराणशब्दस्योल्लेखः प्राप्यते । शतपथब्राह्मणे पुराणोदयगाथा वर्णिता- **'मध्वाहुतयो ह वा एता देवानां यदनुशासनानि विद्या वाकोवाक्यमितिहासपुराणं गाथा नाराशंस्यः स य एवं विद्वाननुशासनानि विद्या वाकोवाक्यमितिहासपुराणं गाथा नाराशंसीरित्यरहरहः स्वाध्यायमधीते मध्वाहुतिभिरेव तद्देवांस्तर्पयति त एनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन ।'** [141] गोपथब्राह्मणे पुराणैः सहितं वेदानां निर्माणस्य चर्चाऽभवत्- **'एवमिमे सर्वे वेदा निर्मिताः ससंकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सान्वाख्यानाः सपुराणाः'** ।[142]

बृहदारण्यकोपनिषदि कथितमस्ति यत् **'स यथाऽर्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि ।'** [143] अर्थाद्यथा आर्द्रकाष्ठस्य ज्वलनेन पृथक् पृथक् धूम्रं निर्गच्छति तथैव एकस्मादेव परमात्मनः पृथक् पृथक् रीत्या ऋग्वेद-यजुर्वेद-सामवेद-अथर्वाङ्गिरस-इतिहास-पुराण-उपनिषद्-श्लोक-सूत्र-व्याख्यान-अनुव्याख्यानादयः निःश्वासरूपेण निरगच्छन् । वाजसनेयिब्राह्मणोपनिषद्यपि समानार्थकं कथनं प्राप्तं भवति ।[144]

छान्दोग्योपनिषदि पुराणस्य गणना पञ्चमवेदरूपे कृता- **'स होवाचर्ग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्'** इति ।[145]

मनुस्मृत्यां धर्मशास्त्राख्यानेतिहासादिभिः सह पुराणानामपि श्रवणस्योल्लेखः प्राप्यते -

**स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि ।**
**आख्यानानीतिहासांश्च पुराणानि खिलानि च ॥**[146]

एवमेव याज्ञवल्क्यस्मृतावपि पुराणविद्यायाः गणना चतुर्दशविद्यासु कृता-

**पुराण-न्याय-मीमांसा-धर्मशास्त्राङ्गमिश्रिताः ।**
**वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्द्दश ॥**[147]

महाभारतस्यादिपर्वणि प्रदत्तोऽयं श्लोकः पुराणस्य वर्ण्यविषयस्य प्रतिपादकोऽस्ति-

**पुराणे हि कथा दिव्या आदिवंशाश्च धीमताम् ।**
**कथ्यन्ते ये पुरास्माभिः श्रुतपूर्वाः पितुस्तव ॥**[148]

पुराणानां प्राचीनतायाः विषये पुराणेष्वपि चर्चाऽभूत् । मत्स्यपुराणे कथितम्-

**पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।**
**अनन्तरं च वक्त्रेभ्यो वेदान्तस्य विनिःसृताः ॥**[149]

पद्मपुराणेऽपि समानार्थको श्लोकः प्राप्यते ।[150]

देवीभागवते पुराणं धर्मपुरुषस्य हृदयस्वरूपं मतम् -

**श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम् ।**[151]

पुराणानामुत्पत्तेर्विषये मार्कण्डेयपुराणे कथनमिदं प्राप्यते-

**उत्पन्नमात्रस्य पुरा ब्रह्मणोऽव्यक्तजन्मनः ।**

---

[138] यजुर्वेदे 18/58
[139] अथर्ववेदः 11/9/24
[140] अथर्ववेदः 15/6/11
[141] शतपथब्राह्मणम् 11/5/6/8
[142] गोपथब्राह्मणम् 1/2/9
[143] बृहदारण्यकोपनिषद् 2/4/10
[144] वाजसनेयिब्राह्मणोपनिषद् 2/4/10
[145] छान्दोग्योपनिषद् 7/1/2
[146] मनुस्मृतिः 3/232
[147] याज्ञवल्क्यस्मृतिः उपोद्घाते तृतीयः श्लोकः
[148] महाभारतम् आदिपर्वणि 5/2
[149] मत्स्यपुराणम् 53/3
[150] पद्मपुराणम् 1/45
[151] देवीभागवतम् 11/1/21



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

**पुराणमेतद्वेदाश्च मुखेभ्योऽनुविनिःसृताः ॥**[152]

तात्पर्यमस्ति यत्पूर्वकाले उत्पन्नमात्रस्याव्यक्तजन्मनः ब्रह्मणः मुखेभ्यो पुराणं वेदाश्चोद्धूताः ।

पुराणस्योद्देश्यविषये कथ्यते यद्वेदस्य गुह्यार्थस्य रोचकविधिना आख्यानोपाख्यानगाथाकल्पशुद्ध्यादीनां माध्यमेन स्पष्टीकरणाय महर्षिकृष्णद्वैपायनवेदव्यासेन वेदार्थस्य विस्तारः पुराणरूपे कृतः । यथोक्तं विष्णुपुराणे-

**आख्यानैश्चाप्युपाख्यानैः गाथाभिः कल्पशुद्धिभिः ।**
**पुराणसंहितां चक्रे पुराणार्थविशारदः ॥**[153]

पद्मपुराणेऽपि उपदशोऽभवद्यदितिहासपुराणयोः माध्यमेन वेदार्थस्य व्याख्या करणीया ।[154] समान एवोपदेशः वायुपुराणेऽपि प्राप्यते ।[155] महाभारतेऽपि एवमेवोपदेशवाक्यं प्राप्यते ।[156]

पुराणानां क्रमिकविकासविषयेऽपि विविधग्रन्थेषूल्लेखः प्राप्यते । मत्स्यपुराणे उल्लिखितं यत् कल्पान्तरे (पूर्वकाले) पुराणमेकमेवासीत् ततः वेदव्यासऋषिणा इदं शतकोटिरूपे विस्तारं प्राप्तम् -

**पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ ।**
**त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥**[157]

वेदानां व्यासकर्तारः ऋषयः **'वेदव्यास'** इति नाम्ना प्रसिद्धाः सन्ति । इमे व्यासाः एव पुराणानामपि प्रवक्तारोऽभवन् । प्रत्येकस्मिन् युगे (कालान्तरे) एतस्यां व्यासपरम्परायामनेकाः ऋषयः जाताः । (1) स्वयम्भूः ब्रह्मा (2) प्रजापतिः (3) उशना (शुक्राचार्यः) (4) बृहस्पतिः (5) सविता (सूर्यः) (6) मृत्युः (यमः) (7) इन्द्रः (8) वसिष्ठः (9) सारस्वतः (10) त्रिधामा (11) त्रिशिखः (त्रिवृषः) (12) भरद्वाजः (13) अन्तरिक्षः (14) वर्णी (15) त्र्यारुणः (16) धनञ्जयः (17) क्रतुञ्जयः (18) जयः (19) भरद्वाजः (20) गौतमः (21) हर्यात्मा (22) वाजश्रवा (23) सोमशुष्मायणः (24) तृणबिन्दुः (25) भार्गवः ऋक्षः (वाल्मीकिः) (26) शक्तिः (27) पराशरः (28) कृष्णद्वैपायनश्चेत्यादीनामष्टाविंशतिव्यासानां नाम्नामुल्लेखः श्रीविष्णुपुराणे प्राप्यते ।[158] एवमेव नामोल्लेखः वायुपुराणे [159] श्रीमद्देवीभागवते [160] चापि प्राप्यते । परन्तु तत्र किञ्चिन्नामवैभिन्यमपि प्राप्यते । परन्त्विदं सुविदितमेव यदेतस्यां व्यासपरम्परायामन्तिमव्यासस्य (अष्टाविंशतितमस्य व्यासस्य) रूपे भगवान् कृष्णद्वैपायनः एव ख्यातिं प्राप्तः ।

अतः वेदादारभ्य ब्राह्मणारण्यकोपनिषद्स्मृतिपुराणमहाकाव्यादिषु सर्वत्र पुराणविद्यायाः न केवलं परिचयः प्राप्यतेऽपितु परवर्तिषु ग्रन्थेषु तस्याः उत्तरोत्तरमुन्नतिः मानसम्मानसंवर्द्धनं चापि दृश्यते । ऋग्वेदकाले पुराणेतिशब्दः सामान्यतः प्राचीनार्थे एव प्रयुक्तः परन्त्वथर्ववेदे प्रयुक्तं 'पुराणम्' इति पदं स्पष्टरूपेणैकस्याः विद्यायाः वाचकः शब्द आसीत् । पुराणविद्या वेदानां समकालिकी विद्याऽसीत् परन्तु सा विद्या कालान्तरे प्रक्षिप्ता जाता । वैदिककाले प्रचलिता पुराणसंहिता सम्प्रत्यप्राप्या एव किन्तु वेदेषु निहितगूढज्ञानं सङ्केतमात्रप्राप्तोद्धरणाश्चैवाधुना प्राप्ताष्टादशपुराणेषूपाख्यानमाध्यमेन विस्तारं प्राप्ताः इत्यस्मिन् सन्दर्भे सर्वेषु विद्वत्सु मतैक्यं प्राप्यते । विषयेऽस्मिन् नारदीयपुराणे उक्तमपि-

**तथेदं वाङ्मयं जातं पुराणेभ्यो न संशयः ।**
**वेदार्थादधिकं मन्ये पुराणार्थं वरानने ।**
**वेदाः प्रतिष्ठिताः सर्वे पुराणेष्वेव सर्वदा ॥**[161]

## (आ) पुराणानां महत्त्वम्

पुराणानां महत्त्वविषये पद्मपुराणे उल्लिखितमस्ति-

**यथा सूर्यवपुर्भूत्वा प्रकाशाय चरेद्धरिः ।**
**सर्वेषां जगतामेव हरिरालोकहेतवे ॥**
**तथैवान्तः प्रकाशाय पुराणावयवो हरिः ।**
**विचरेदिह भूतेषु पुराणं पावनं परम् ॥**[162]

भावोऽस्ति यत् श्रीभगवान् हरिः यथा सूर्यस्य रूपं धारयित्वा सर्वस्मिन् जगति प्रकाशं करोति तथैव भगवान् हरिः स्वयं परमपावनं पुराणरूपं धारयित्वा भूतानामन्तःकरणस्यान्धकारस्य निवारणं कृत्वा ज्ञानप्रकाशस्योत्पादनार्थमत्र (अस्मिन् लोके) विचरणं करोति ।

इत्थमेव पुराणमाहात्म्यवर्णनप्रसङ्गे शिवपुराणस्योमासंहितायामपि पुराणस्य महत्त्वमेवं प्रकटितम् -

**जगद्यथा निरालोकं जायतेऽशशिभास्करम् ।**
**विना तथा पुराणं ह्यध्येयमस्मान्मुने सदा ॥**[163]

अर्थाद्यथा शशिभास्कराभ्यां विना सम्पूर्णं जगत् अन्धकारमयं भवति

---

[152] मार्कण्डेयपुराणम् 45/20
[153] श्रीविष्णुपुराणम् 3/6/15
[154] पद्मपुराणम् 2/52
[155] वायुपुराणम् 1/46
[156] महाभारतम् 1/1/204
[157] मत्स्यपुराणम् 53/4
[158] श्रीविष्णुपुराणम् 3/3/11-19
[159] वायुपुराणम् 23/111-207
[160] श्रीमद्देवीभागवतम् 1/3/26-33
[161] नारदपुराणम् 2/24/17-18
[162] पद्मपुराणम् स्वर्गखण्डे 61/61-62
[163] शिवपुराणम् उमासंहितायाम् 8/3

Since 2009
ISSN- 0976-8645
UGC RN-41039

तथैव विना पुराणाध्ययनेन सर्वत्राज्ञानान्धकार एव भवति । अतः पुराणमस्माभिः सर्वदाध्येयम् ।

धार्मिकदृष्ट्यापि पुराणानां बहुमहत्त्वं विद्यते । पुराणानि वेदविहितस्य धर्मस्यैव सरलया भावगम्यया भाषया विशदं वर्णनं कुर्वन्ति । वेदविहितान् रहस्यमयान् तत्त्वान् सर्वे जना अवगन्तुं समर्थाः न भवन्ति अतः जनसाधारणेषु वेदविहितानां गूढार्थानां सरल-सुगमभाषायामाख्यानरूपे प्रचारायैव पुराणानि विरचितानि । लोके वैदिकधर्मस्य सञ्चारणस्य कार्यं पुराणैरेव सम्पन्नमभूत् ।

एतस्मात्कारणादेव पुराणं पञ्चमवेदस्य गौरवमर्हति । छान्दोग्योपनिषदि पुराणस्य गणना पञ्चमवेदरूपे कृता- **'स होवाचर्ग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्'** इति ।[164] एवमेव स्कन्दपुराणेऽपि पुराणस्य वेदत्वं प्रतिपादितम्-

**आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता ।**
**शौनकीया च पौराणी धर्मशास्त्रात्मिका च या ।।**
**तिस्रो विद्या इमा मुख्याः सर्वशास्त्रविनिर्णये ।**
**पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम् ।।**[165]

अत्र सर्वशास्त्रविनिर्णयार्थं स्वीकृतासु तिसृसु प्रमुखविद्यासु पुराणविद्यापि गणितास्ति ।

ऐतिहासिकदृष्ट्यापि पुराणानां महत्त्वं को न जानाति? पुराणानामध्ययनेन पुराणलक्षणानुसारं सृष्टेः क्रमिकसृजनस्य सम्पूर्णप्रक्रियायाः ज्ञानं, तत्पश्चात् वंशवर्णनादितिहासज्ञानं तथा च मन्वन्तरप्रक्रियामाध्यमेन कालपरिमाणज्ञानमपि सम्भवति । प्राचीनभारतस्य सभ्यतायाः, संस्कृतेः, विद्यावैभवस्य, दर्शनस्य भारतीयजीवनस्योच्चादर्शानाञ्च सम्पूर्णज्ञानं पुराणानां माध्यमेनैव भवितुं शक्यते । मानवधर्मस्य संस्कृतेश्च वास्तविकं स्वरूपमवगन्तुं पुराणानामध्ययनं चिन्तनं मननञ्चात्यन्तावश्यकं विद्यते । भारतीयजनमानसस्य सम्पूर्णज्ञानायाद्य च विश्वमञ्चे भारतस्य विश्वगुरुरूपे पुनः प्रतिष्ठापनाय वेदैः सह पुराणानामप्यनुशीलनमत्यन्तावश्यकमस्ति ।

यदि वयं साहित्यिकदृष्ट्या चिन्तनं कुर्मः तर्हि पश्यामः यत् वैदिकसाहित्यस्यानन्तरं सम्पूर्णसाहित्यं पुराणेष्वेव सन्निहितमथवा पुराणैरेवोपकृतमस्ति । अग्निपुराणादिकेषु काव्यशास्त्रीया चर्चापि भूता । नीतिशास्त्रं, समाजशास्त्रं, दर्शनशास्त्रं, धर्मशास्त्रं, काव्यशास्त्रं, व्याकरणशास्त्रं, शिक्षाशास्त्रं, तन्त्रशास्त्रं, चिकित्साशास्त्रं, ज्योतिश्शास्त्रं, वर्णाश्रमसंस्कार-विवाहपुरुषार्थव्रतदानतपश्राद्धपूजाराजधर्मतीर्थयोगभक्त्यादिकस्य ज्ञानं किं किं न वर्णितं भगवता वेदव्यासेनाष्टादशपुराणेषु । कदाचिदेतैः सर्वैः कारणैरेव ऋषियाज्ञवल्क्येन पुराणविद्यायाः गणना चतुर्दशविद्यासु प्राथम्येन कृता-

**पुराण-न्याय-मीमांसा-धर्मशास्त्राङ्गमिश्रिताः ।**
**वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्द्दश ।।**[166]

पुराणस्याध्ययनस्यावश्यकतायाः विषये श्रीकृष्णमणित्रिपाठिमहाभागेनोल्लिखितं यत् - ''वेदेषु येषामाध्यात्मिकाधिदैविकाधिभौतिकबौद्धिकव्यावहारिकनैतिकसांस्कृतिकदेवमानुषजडचेतनात्मकानां विषयाणां सूक्ष्मरूपेण विधानं विद्यते, ब्राह्मणभागे, आरण्यके, स्मृतिग्रन्थेषु च येषां प्रतिपादनमस्ति, तेषां सर्वप्रकारकाणां पुराणेषु आकर्षकबुद्धिगम्यमनोग्राह्योपदेशप्रदकथानकरूपेण वर्णनं कृतमस्ति । पुराणेषु न केवलमाचारव्यवहारदैनिकक्रियामात्रस्योल्लेखोऽस्ति, किन्तु मानवजीवनोपयोगिनीनां विविधानां भावनानां पूर्णं विवेचनं विद्यते । अतः पुराणानामध्ययनेन वेदार्थनिधीनामुपलब्धिर्भवितुमर्हति । पुराणाध्ययनं विना यथार्थज्ञानं मानवीयजिज्ञासायाः पूर्तिश्च न सम्भवति ।''[167] त्रिपाठिमहाभागस्य टिप्पण्यानया पुराणविद्यायाः विशिष्टं महत्त्वं प्रकटितं भवति ।

अतः इदं स्पष्टमेव यत् भारतीयसाहित्यस्य संस्कृतेश्चाध्ययनार्थं पुराणानामध्ययनमत्यन्तावश्यकमनिवार्यञ्चास्ति ।

........................................................................................

## सन्दर्भग्रन्थसूची

1. ऋग्वेद संहिता, आर्य साहित्य मण्डल लि0, अजमेर, 1952
2. यजुर्वेद भाष्य, दयानन्द सरस्वती, अजमेर
3. अथर्ववेद संहिता, (आङ्ग्लानुवादः) W. D. Whitney, Harvard University, 1905
4. The Nighantu and Nirukta, L. Sarup, Motilal Banarsidass, 1967
5. शतपथब्राह्मण, Julius Eggeling, Motilal Banarsidass, Delhi, 1978
6. उपनिषद्संग्रह, सं0-प्रो0 जे0 एल0 शास्त्री, मोतीलाल बनारसीदास, दिल्ली, 1984
7. अष्टाध्यायी, महर्षि पाणिनि, वैदिक पुस्तकालय, अजमेर
8. मनुस्मृति (हिन्दी टीका सहित), भार्गव पुस्तकालय, बनारस
9. याज्ञवल्क्यस्मृति, श्री पं0 गुरुप्रसाद शास्त्री, नवलकिशोर प्रेस, लखनउ, 1929
10. वायु-पुराण, सं0-पं0श्रीराम शर्मा आचार्य, संस्कृति संस्थान, बरेली, 1967
11. The Vayu Purana, Ed. G. V. Tagare, Motilal Banarsidas, Delhi,1987
12. Vayu Purana, Anandashram Sanskrit Series, Poona, 1905.
13. Brahmanda Purana, Venkatesvara Press, Bombay, 1857
14. पद्म-पुराण, सं0-पं0श्रीराम शर्मा आचार्य, संस्कृति संस्थान, बरेली, 1968
15. पद्मपुराणम्, सं0-मनसुखरायमोर, 5, क्लाइव रॉ, कलकत्ता, 1957
16. मत्स्यपुराण, सं0-पं0श्रीराम शर्मा आचार्य, संस्कृति संस्थान, बरेली
17. Matsya Purana, Anandashram Sanskrit Series, Poona
18. मार्कण्डेय-महापुराणम्, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली
19. Markandeya Purana, Ed. by Jivananda Vidyasagar, Bhattacharya, Calcutta, 1879
20. श्रीविष्णुपुराण, गीताप्रेस, गोरखपुर, सं0 2033
21. नारदीय-महापुराणम्, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली,
22. शिव पुराण, वेंकटेश्वर स्टीम प्रेस, मुम्बई, 1920
23. The Siva Purana, Motilal Banarsidass, Delhi, 1970
24. स्कन्दपुराण, एन. के. प्रेस, लखनऊ, 1916
25. The Skanda Purana, Motilal Banarsidas Publishers Private Ltd, Delhi, 1957
26. Devi-Bhagavata Purana, Manasukharaya Mor, Calcutta, 1960
27. पुराणपर्यालोचनम्, (दोनों भाग) डॉ. श्रीकृष्णमणि त्रिपाठी, चौखम्भा प्रकाशन, वाराणसी, 1982
28. पुराणरहस्य, श्री सुरजनदास स्वामी, वैदिक यन्त्रालय, अजमेर, सं. 2044

[164] छान्दोग्योपनिषद् 7/1/2
[165] स्कन्दपुराणम् अवन्तिखण्डान्तर्गते रेवाखण्डे 1/17-18
[166] याज्ञवल्क्यस्मृतिः उपोद्घाते तृतीयः श्लोकः
[167] पुराणपर्यालोचनम् (गवेषणात्मको भागः), पृ0सं0-16



# प्रतापविजयम्' में निरुपित मानवीय मूल्य

अनु कुमारी[168]

........................................................................................

**कूटशब्द-** वातावरण, सदगुण, व्यक्तित्व |

........................................................................................

**शोधसार-**
शरीर से सभी मनुष्य मानव है परन्तु मानवता मूल्यों से ही आती है। स्नेह, परोपकार, पर हित की भावना इन सभी गुणों से मानवता स्वतः परिलक्षित होती है। मानवता की परख इन्हीं गुणों से हर क्षण होती है। नाटकीय पात्रों के सदगुण, दूसरों के प्रति सदभावना तथा उनके व्यक्तित्व से मानवीय मूल्यों का अध्ययन किया जायेगा।

याज्ञिक जी की यह रचना स्पष्ट रुप से दिखाती है कि मूल्य और परिवेश का सहज संबंध है क्योंकि मूल्यों का निर्माण और विकास परिवेश से ही होता है। परिवेश वह वातावरण है जिसमें साहित्य लिखा जाता है और मूल्य वे नैतिक मान्यताएं है,साहित्य जिनका समर्थन या विरोध करता है। साहित्य व्यक्ति के भावों और विचारों की सुक्ष्मातिसुक्ष्म अभिव्यक्ति है। साहित्य ही हमें सिखाता है कि मानव के मानव बने रहने की क्रिया मानव मूल्य है। याज्ञिक जी नाटकीय घटनाओं से दिखाते है कि अत्यंत आत्मकेन्द्रित तथा आत्मनिर्वासित क्षत्रिय राजा मुगल अधीनता स्वीकार कर भारतीय संस्कृति के ह्रास का द्वार स्वंय खोलते है। उस काल विशेष और परिवेश में लिखा गया यह नाटक महाराणा की उस विलक्षण प्रतिभा और शौर्य का वर्णन करता है जो किसी भी स्थिति में अधीनता स्वीकार न करके अपने पुर्वजों और भारतमाता के गौरव की रक्षा करते है।

जब क्षत्रियों के सिर मुगलों के समक्ष झुक जाते है,मुगल चाटुकारता को जब वह अपना जीवन मान लेते है और सहायता मांगने पर भी वह महाराणा का साथ नहीं देते है यह मानवीय मूल्यों का ह्रास है। मातृभूमि के प्रति सदभावना को समाप्त कर मुगलों की अधीनता को स्वीकार करने से प्रत्येक

[168] Research Scholar, University of Delhi, Delhi.

कर्तव्य से मुंह फेरना था। महाराणा जब प्रजा सहित पर्वत निवास के लिए जाते है तो भील लोग उनके सहायक बनते है। भील लोग महाराणा की भिन्न- भिन्न प्रकार से सहायता करते है।[169] भील लोगों का यह व्यक्तित्व उन्हें श्रेष्ठ बनाता है,उन क्षत्रियों की अपेक्षा जो अपना क्षात्र धर्म भूल गये है। महाराणा के प्रति उनकी स्वामी भक्ति,मातृभूमि से स्नेह,पर हित की भावना मेवाड विजय में सहायक बनती है। महाराणा के सभी सहयोगी पात्र प्रिय वियोग,वीरगति,साहस की परिक्षा इत्यादि अनेक परिक्षाओं से गुजरते है परन्तु उनकी सदभावना,सदगुण और सज्जनता ये गुण सदैव बने रहते है।

........................................................................................

संस्कृत साहित्य में नाटकों की अपनी एक विशिष्ट परंपरा रही है। भारतीय साहित्य की अनेक विधाओं में नाटकों की लोकप्रियता हमेशा से प्रथम रही है। नाटक का महत्व स्पष्ट करते हुए आचार्य भरतमुनि का कथन है-

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥**[170]

आचार्य भरतमुनि नाटक को पंचम वेद मानते हैं। भरतमुनि के अनुसार नाट्य नामक पचंम वेद तीनों लोकों के भावों का अनुकरण है-

**त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।**[171]

नाट्यवेद के अंतर्गत धर्म, अर्थ, काम, मोक्ष, शांति, युद्ध, क्रीड़ा, हास्यादि सभी बातों का समावेश रहता है। इसीलिए नाट्य रचनाएं अधिक लोकप्रिय रहती हैं।

मूल्य का क्षेत्र अत्यन्त व्यापक है, प्रत्येक दृष्टि के अनुसार इसका भिन्न अर्थ निकलता है।

संस्कृत कोश के अनुसार- मोल लेने के योग्य, कीमत, मोल, लागत।[172]

संस्कृत व्याकरण के अनुसार- मूलेन समो मूल्यः अर्थात् मूल के समान।[173]

साहित्य कोश के अनुसार 'मूल्य' और 'प्रतिमान' समान अर्थवाले शब्द है।दोनो ही मानव निर्मित कसौटियां है जिनके सहारे साहित्य को देखा जाता है।साहित्य के अंतर्गत संवेदनशीलता का बडा मूल्य है और मानवीय संवेदना की चरम सीमा करूणा है,जो अपने आप में महत्वपूर्ण मूल्य है। इसी साहित्यिक दृष्टिकोण के अनुसार नाट्य साहित्य मे निरुपित मानवीय मूल्यों का अध्ययन प्रस्तुत शोध पत्र में वर्णित किया जा रहा है।

संस्कृत नाट्य साहित्य एक अथाह सागर है। भास,कालिदास सदृश महान नाट्यकारों से प्रारम्भ होकर यह नाट्य धारा अद्य पर्यन्त नित प्रवाहित हो रही है। अतः शोध पत्र के विषयानुसार मानवीय मूल्यों के अध्ययन के लिए मैने वीसवीं शताब्दी में रचित मूलशंकर माणिकलाल याज्ञिक की नाट्य रचना ' प्रतापविजयम्' को लिया है। नाट्यकार तात्कालिक परिस्थितियों के अनुसार साहित्य का सृजन करते है। आधुनिक काल में मानवीय मूल्यों का अत्यधिक ह्रास हुआ है अतः आधुनिक नाट्य रचना 'प्रतापविजयम्' के माध्यम से मानवीय मूल्यों का अध्ययन किया जा रहा है।

**नाट्यकार मूलशंकर माणिकलाल याज्ञिक-**

वीसवीं शताब्दी के उस काल विशेष में दृश्य काव्य की सुदूर परंपरा का अनुसरण करते हुए आधुनिक नाट्य परंपरा में भवभूति नाम्ना प्रसिद्ध तथा काशी विद्वत् परिषद् के द्वारा मानार्ह साहित्य-मणि उपाधि प्राप्त प्रसिद्ध कवि आचार्य मूलशंकर माणिकलाल याज्ञिक जी का उदय हुआ। वीसवीं शताब्दी के पूर्वार्ध में भारत में जो प्रशिष्ट संस्कृत साहित्यकार हुए उनमें मूलशंकर माणिकलाल याज्ञिक जी अन्यतम है। वीसवीं शताब्दी की नाटकीय काव्य धारा के उज्जीवक, संस्कृत गद्य-पद्य साहित्य के लेखक अनेक ग्रंथों के प्रणेता नाटककार

169 ओझा, आर० बी० गौरीशंकर, वीर शिरोमणि महाराणा प्रतापसिंह,पृ० स० ५३.

170 नाट्यशास्त्र, १.११६.

171 नाट्यशास्त्र, १.१०७.

172 आप्टे,वामन शिवराम,संस्कृत हिन्दी कोश,पृष्ठ संख्या ८१२.

173 तिवारी,रामजी, स्वातंत्रोत्तर हिन्दी समीक्षा में काव्य मूल्य,पृष्ठ संख्या १४.





पंडित मूलशंकर माणिकलाल याज्ञिक जी गुजरात में खेड़ा जनपद के गांव के निवासी थे। उनके पिता का नाम माणिकलाल और माताजी का नाम अतिलक्ष्मी था। ३१ जनवरी १८८६ का वह पुण्यमय दिवस था, जिस दिन कविवर का जन्म हुआ।[174] नाट्यकार मूलशंकर माणिकलाल याज्ञिक जी की तीन संस्कृत नाट्य रचनाएं है- 'संयोगितास्वयंवरम्',' छत्रपतिसाम्राज्यम्' तथा 'प्रतापविजयम्'।

**'प्रतापविजयम्' नाटक का परिचय-**

याज्ञिक जी की यह संस्कृत रचना १९३१ई० में बड़ौदा प्रिंटिंग प्रेस से प्रकाशित हुई है।[175] इसमें सिसोदिया कुलभूषण महाराणा प्रताप तथा सम्राट् अकबर के मध्य हुए संघर्ष का देशभक्तिपरक तथा मर्मस्पर्शी वर्णन है। यह नाटक नौ अंको में विभक्त है।

**नायक प्रतापसिंह का व्यक्तित्व-**

वीर शिरोमणि महाराणा प्रतापसिंह राजपुताना के वह सिंह है जिनकी गर्जन हर इतिहासकार की लेखनी में है।' प्रतापविजयम्' में क्षत्रिय कुल गौरव महाराणा प्रतापसिंह नायक रुप में प्रतिष्ठित है। क्षात्र धर्म प्रतिष्ठा से मातृभूमि की स्वाधीनता के लिए प्रतापसिंह वीर योद्धा की भांति यवनों को पराजित करते है। महाराणा के सदगुणों के प्रभाव से प्रजा भी प्रतापसिंह का ही प्रतिरुप है। छल, कपट, भय से दूर प्रजा सदा महाराणा की शक्ति बनती है।

**प्रजा के प्रति महाराणा का स्नेह-**

राजा का अस्तित्व, मान और सम्मान सब प्रजा से सम्बद्ध है। मेवाड नरेश प्रजा का पालन-पोषण अपनी औरस सन्तान की भांति करते है।राजसी सुख सुविधाएं त्याग कर वह प्रजा सहित पर्वतों पर निवास करते है।मुगल सैनिकों से प्रजा की सुरक्षा के लिए हर सम्भव प्रयास करते है। प्रतापसिंह पर्वत निवास करती हुई खिन्न प्रजा की रक्षा के लिए सभी सहयोगी पात्रों को उत्साहित करते हैं। मनोविनोद के लिए एक कवीश्वर को भी पर्वत प्रदेश पर रहने की अनुमति देते है। कवीश्वर को बहुमूल्य रत्न भेंट करके उसे सम्मान दिया जाता है।[176] प्रतापसिंह प्रजा के लिए हर संभव प्रयास करते हैं ताकि पर्वतीय निवास का कष्ट साध्य जीवन सुख बन जाए। प्रजा और राजा का यह परस्पर स्नेह अत्यंत हृदयस्पर्शी है।

**पर स्त्री का सम्मान-**

मालवजनपदों पर विजय के पश्चात मुगलदल पर आक्रमण कर सेनापति की स्त्रियों को बन्दी बनाकर युवराज पर्वत प्रदेश में उनको रखते है।इस पर प्रतापसिंह स्त्रियों को राजकुलोचित आतिथ्य सत्कार से मुक्त करने का आदेश देते है।पर स्त्रियों के प्रति यह सम्मान प्रतापसिंह के व्यक्तित्व को और भी महान बनाता है। साहित्य उनके इन गुणों का समर्थन करते हुए इतिहास में उन्हें उत्कृष्ट स्थान दिलाता है।

**मातृभूमि के प्रति श्रद्धाभाव –**

महाराणा के सभी सहयोगी पात्र मातृभूमि के प्रति श्रद्धाभाव रखते है। युवराज,महिषी,राजपुत्री,अमात्य,वीर झाला सरदार,मन्त्री,सेनापति,अनुचर,सैनिक तथा भीलजन सभी महाराणा के सहायक बनते है। महाराणा की प्रत्येक स्थिति में सहायता करते है। राजादेश विना किसी प्रश्न से सहर्ष स्वीकार होता था। अमात्य नीति मार्ग से हर क्षण महाराणा का पथ प्रदर्शन करते हैं। नाटक की नायिका प्रतापसिंह की धर्मपत्नी एक आदर्श पत्नी का उदाहरण है। एक क्षत्रिय पत्नी होने के सभी गुण उनमें विद्यमान है। मानसिक रुप से सबल बनाना उन्हें अच्छे से आता है। नाटक में जब प्रतापसिंह भावुक होते हैं तब वह उनकी शक्ति और प्रेरणा बनती है। प्रतापसिंह के क्रोध में लिए गए निर्णयों को तर्क और मधुर वाणी से समझाती है।

इस नाटक में एक और स्त्री पात्र है जो पृथ्वीराज की बहन है। पृथ्वीराज मुगलों का आश्रय स्वीकार कर चुका है परंतु उसकी बहन मुगलों के समक्ष झुकने को तैयार नहीं है। इसलिए अब

174 तिवारी, दया शंकर, छत्रपतिसाम्राज्यम् : एक परिशीलन,पृष्ठ संख्या २.

175 तिवारी, दया शंकर, छत्रपतिसाम्राज्यम् : एक परिशीलन,पृष्ठ संख्या ८.

176 प्रतापविजय, पंचम अंक, पृष्ठ संख्या ९१.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

वह प्रतापसिंह के राज्य में रहती है।प्रतापसिंह उन्हें समझाते हुए कहते हैं कि बेटी पहाड़ों में निवास करना बहुत संकटपूर्ण होता है अतः वीरों से सुरक्षित होकर तुम सुख से हस्तिनापुर के लिए प्रस्थान करो। राजपुत्री इस पर कहती है कि क्षत्रिय कन्याएं

स्वभावतः स्वतंत्रता प्रेमी होती है। राजपुत्री एक वीर योद्धा भी है। पर्वत दुर्गो पर निवास करते हुए उन्होंने अनेक शत्रुओं को पराजित किया था।[177]

**वात्सल्य भाव की परिक्षा-**

स्वातंत्र्य की साधना में भौतिक सुख, युवराज तथा राजपुत्री का प्रणय, प्रतापसिंह का वात्सल्य अनेक भावनाओं की आहुति देनी पड़ती है। अष्टम अंक में कुमार प्रतापसिंह से कुंभलगढ़ किले में जाने की इच्छा करता है। कुमार कहते हैं कि उन्हें पहाड़ पर रहना पसंद नहीं है। कुमार के इस प्रकार बोलने से प्रतापसिंह दुखी हो जाते हैं तथा शत्रु समुह को मारने के लिए क्रोधित भाव से विना विचारे चल पड़ते हैं।[178]इस पर महिषी बहुत सूझ-बूझ से प्रतापसिंह को समझाती है-

“आर्यपुत्र प्रसन्न हो! इस समय साहस अंगीकार करना उचित नहीं है। इसीलिए धैर्य का सहारा लेकर आर्यपुत्र अनुकूल अवसर की प्रतीक्षा करें। क्योंकि धैर्य से ही शत्रु को जीता जा सकता है। इस समय हमारे पास युद्धवीर भी बहुत कम है।”[179]

**अमात्य का स्वामी के प्रति समर्पण-**

अकबर भेद नीति का प्रयास करते है। मोगलेश का दूत अमात्य को उत्कोच प्रस्ताव देता है परंतु अपनी मातृभूमि की सेवा के दृढ़ निश्चय से प्रस्ताव को अस्वीकार कर देते हैं-

**“प्रभंजनोत्पाटितप्रपादपं समुत्पतत्पन्नगराजिसंकुलम्।**
**हित्वोद्धवं स्वं मलयं हिरण्मयं, मेरु श्रयन्ते न हि चन्दनद्रुमाः”**
**॥**[180]

अमात्य इस उत्कोच प्रस्ताव के पश्चात सावधान हो जाते है और प्रताप सिंह को समझाते हैं कि राजधर्म से हीन मायावी मोगलेश को माया से ही हराया जा सकता है। समस्त प्रजा के साथ पर्वतीय दुर्गो पर शरण ग्रहण

करनी चाहिए। कुटनीति के प्रयोग से व्यापार के मार्ग में अवरोध डालकर शत्रु के उत्साह को कम करना चाहिए।[181] स्वामी के प्रति अमात्य का समर्पण उनके देश प्रेम को दर्शाता है।महाराणा मेवाड पर विजय प्राप्त करने में सफल होते है इसका मुख्य कारण यह भी है कि उनके जीवन में सज्जन जनों का साथ हमेशा रहा है।

**प्रजा का त्याग भाव-**

प्रजा राजादेश का सहर्ष पालन करती है।महाराणा के प्रत्येक आदेश को प्रजा मानती है।पर्वत प्रदेश जैसे कष्टसाध्य निवास को भी प्रजा स्वीकार करती है। प्रजा सब सुख सुविधाएं त्याग कर अपने राजा के साथ रहती है।मुगलों की भेद नीति भी उनकी स्वामी भक्ति के सामने टिक नहीं पाती है। हल्दीघाटी के युद्ध के पश्चात् मुगल समझ आते हैं कि केवल युद्ध कौशल से प्रतापसिंह को हराना मुश्किल होगा। सार्वभौम मेवाड प्रजा में फूट डालने की नीति बनाता है। सार्वभौम अच्छे से जानते है कि जब तक प्रजा में विरक्ति उत्पन्न नहीं की जाती तब तक प्रताप सिंह का दमन करना संदेहास्पद ही है।
मानसिंह बताते हैं कि कठिन से कठिन दंड देने पर भी नागरिक और वनवासी उसमें इस प्रकार अनुरक्त है कि प्राणदंड का भय भी उन्हें नहीं है।[182]

**प्रतापसिंह की युद्ध नीति में क्षात्र धर्म का निर्वहण-**

प्रजा सुरक्षा के लिए युद्ध करना राजा का प्रथम धर्म है।बाहु बल से ही महाराणा शत्रु को हराना जानते है।माया और छल से परे प्रतापसिंह क्षत्रिय धर्म से युद्ध लडते हैं।

[177] प्रतापविजयम् , पंचमअंक, पृष्ठ संख्या ९२
[178] प्रतापविजयम्, पंचमअंक, पृष्ठ संख्या १३२.
[179]प्रतापविजयम् , अष्ट्मअंक, पृष्ठ संख्या १३३
[180] प्रतापविजयम् ४.१
[181] प्रतापविजय, पंचम अंक, पृष्ठ संख्या ६६.
[182] प्रतापविजयम्, तृतीय अंक, पृष्ठ संख्या ५०.



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

**क्षमा भाव (मित्र पृथ्वीराज को माफ करना)-**

मेवाड़ भूमि और क्षत्रिय गौरव की मर्यादा दोनों युद्ध में प्रतापसिंह का साथ देते हैं। मेवाड़ भूमि के पर्वतीय दुर्ग हमेशा शत्रुओं से प्रताप सिंह की रक्षा करते हैं। प्रताप सिंह के अदम्य साहस से परतंत्र जीवन जी रहे राजा पृथ्वीराज भी प्रभावित होते हैं ।पश्चाताप करते हुए पृथ्वीराज प्रताप सिंह से पत्र द्वारा माफी मांगते हैं, और अकबर की अग्रिम युद्ध नीति का रहस्योद्घाटन भी करते हैं।[183]

**प्रियजनों के वियोग में धैर्य की परिक्षा-**

हल्दी घाटी युद्ध में प्रिय अश्व चेतक पर बैठे हुए प्रताप सिंह ने तीक्ष्ण भाले से मानसिंह का हृदय बेंध देते है। इस प्रहार के पश्चात भी मानसिंह अपने आत्म रक्षा करने में सफल हो जाता है। शत्रु के तीक्ष्ण प्रहार से चेतक का पिछला पांव घायल हो जाता है। महाराणा प्रताप को शत्रुओं से बचाता हुआ घायल चेतक सैन्य-शिवर में पहुंचाता है।[184]
घाव की तीव्र पीडा से चेतक अपने प्राण छोड देते हैं। महाराणा प्रताप अपने प्रिय अश्व के लिए दैव से प्रश्न करते हैं-
“ऊंचे-ऊंचे पर्वतों की चोटी और नदियों को लांघने में वीर, शत्रु के व्यूह भेदन में चतुर, युद्ध भूमि में मेरे सहायक, मेरे स्पर्श से पुलकित होने वाला, मेरे गुड् से गुड् अभिप्राय को समझने वाला प्रिय अश्व क्यों छिन्न लिया गया?”[185]

प्रिय अश्व चेतक के दुःख से अभी मेवाड नरेश अभी उभर भी नहीं पाए थे कि अनुचर उन्हें झाला सरदार की वीरगति प्राप्त होने की सूचना देते हैं। शोकातुरमन से प्रतापसिंह वीर झाला सरदार को स्मरण करते हैं-

“यह कैसी अनोखी परंपरा है जो निर्मल हृदय के वीरों पर विपति आ पड़ी है। झाला वंश में उत्पन्न यह राष्ट्रभक्त राष्ट्र की सेवा में तत्पर धरती पर यश विस्तार करते हुए मृत्यु को प्राप्त हो गए।”[186]

इस प्रकार महाराणा प्रिय वियोग भी सहते है। प्रिय वियोग के समय में भी प्रतापसिंह धैर्य नहीं छोडते है और शत्रु समुदाय का नाश करते है।

.................................................................................................

## सन्दर्भग्रन्थसूची


१. छत्रपतिसाम्राज्यम्-याज्ञिक, मूलशंकर माणिकलाल, शिवशंकर त्रिपाठी (हिन्दी अनुवादक) देवभाषा प्रकाशन, इलाहाबाद,द्वितीय संस्करण,वि०स० २०२६.
२. प्रतापविजयम्- याज्ञिक, मूलशंकर माणिकलाल,प्रभात शास्त्री(सम्पादक), देवभाषा प्रकाशन,इलाहाबाद ,द्वितीय संस्करण,वि०स० २०२६.
३. मूलशंकर नाट्यत्रयी- याज्ञिक, मूलशंकर माणिकलाल, राजेन्द्र नाणावटी (सम्पादक), राष्ट्रीयसंस्कृतसंस्थानम्, नव देहली, प्रथम संस्करण, २०१०.
४. आधुनिक संस्कृत नाटक- उपाध्याय, रामजी,संस्कृत परिषद्,सागर,१९७७.
५. काव्यप्रकाश-मम्मटाचार्य, संपादक शास्त्री, श्री निवास,साहित्य भण्डार मेरठ, दशम संस्करण,१९८९.
६. नाट्यदर्पण (प्रथम भाग)-रामचन्द्र गुणचन्द्र, गायकवाड ओरियन्टल सीरिज बडौदा, १९२९.
७. निरुक्त- यास्काचार् (दुर्गा टीका सहित), गवर्नमेंण्ट सेन्ट्रल प्रेस, बम्बई, प्रथम संस्करण, १९१८.
८. नाट्यशास्त्र-भरतमुनि (अध्याय १-७) (अभिनवभारती टीका सहित) (खण्ड १) - नागर, रविशंकर,दिल्ली परिलम पब्लिकेशन,१९८१.
९. संस्कृत साहित्य का समीक्षात्मक इतिहास, द्विवेदी,कपिलदेव,रामनारायणलाल विजयकुमार,इलाहाबाद,संस्करण-२०१५.


[183] प्रतापविजय,सप्तम अंक, पृष्ठ संख्या ११३
[184] प्रतापविजय,द्वितीय अंक, पृष्ठ संख्या ३५
[185] प्रतापविजय, २/९
[186] प्रतापविजय, द्वितीय अंक, पृष्ठ संख्या ३९.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039


१०. संस्कृत नाटकों में समाज चित्रण-चित्रा शर्मा, मेहरचंद लछमनदास, १९६९.

११. अर्वाचीन संस्कृत साहित्य में राष्ट्रीय भावना-दिक्षित, हरिनारायण,देववाणी परिषद्,दिल्ली,१९८३.

१२. वीर शिरोमणि महाराणा प्रताप-ओझा, आर०बी० गौरीशंकर हीराचंद, राजस्थानी ग्रंथागार, जोधपुर, दशवां संस्करण, २०१६.

१३. मराठों का इतिहास-डफ ग्राण्ट, (अनुवादक कमलाकर तिवारी), इतिहास प्रकाशन संस्थान, इलाहाबाद, प्रथम संस्करण, १९६५.

१४. मराठों का नवीन इतिहास (प्रथम खण्ड) - सरदेसाई, गोविंद सखाराम (अनुवाद- अग्रवाल, राघेय मोहन),शिवपाल अग्रवाल एण्ड कम्पनी,आगरा,१९७६.

१५. शिवाजी-सरकार जदुनाथ, हिन्दी ग्रन्थ रत्नाकर कार्यालय, गिरगांव, बम्बई, १९४०.

१६. छत्रपतिसाम्राज्यम् का नाट्यशास्त्रीय अध्ययन-पाण्डेय, रत्नप्रभा,वीर बहादुरसिंह पूर्वाचंल विश्वविद्यालय-जौनपुर,२००५.

१७. छत्रपतिसाम्राज्यम्: एक परिशीलन-तिवारी, दया शंकर, विद्यानिधि प्रकाशन, दिल्ली,प्रथम संस्करण,२०१२.

१८. छत्रपतिसाम्राज्यम्: एक समीक्षात्मक अध्ययन-चन्द्र, जगदीश, हिमाचल प्रदेश विश्वविद्यालय, शिमला,२०१०.

१९. राजसूय यज्ञ: सिद्धान्त और परंपरा एक अध्ययन-सुभाष, महर्षि दयानंद विश्वविद्यालय रोहतक, २००९.

२०. शिवाजी विषयक संस्कृत नाटक-शौकीन, कमलादेवी, दिल्ली विश्वविद्यालय, दिल्ली, १९८१.

२१. श्री मूलशंकर माणिकलाल याज्ञिक कृत संस्कृत नाटकों का समीक्षात्मकाध्ययन-उर्मिला, महर्षि दयानंद विश्वविद्यालय रोहतक, २००९.

२२. Nation and nationalism in the vedic literature: A study, Shiva, Achrya, Gauhati university, 2000.

२३. अंग्रेजी हिन्दी कोश-फादर कामिल, कैथोलिक प्रेस,रांची, द्वितीय संस्करण,१९७४.

२४. वाचस्पत्यम् (द्वितीय भाग)- चौखंबा संस्कृत सीरीज औफिस,वाराणसी,१९६२.

२५. संस्कृत हिन्दी कोश-वामन शिवराम आप्टे,मोतीलाल बनारसीदास,दिल्ली,द्वितीय संस्करण,१९८४.




Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

# श्रीभिक्षुमहाकाव्ये उदारवादिचिन्तनम्

गणेशनारायणस्वामी

**कूटशब्दा:-** उदारवाद:, श्रीभिक्षुमहाकाव्ये, लोककल्याणभावना, जैनमुनिः श्रीनत्थमल, आचार्यमहाप्रज्ञ:, शुभभावना, स्वतन्त्रता, अहिंसा, उदारवादिचिन्तनम्

**शोधसारः-**

उदारवाद: मानवस्वतन्त्रताया: मानवाधिकाराणाञ्च संरक्षणस्य एका शासनव्यवस्था विद्यते या प्रत्येकं जनं स्वतन्त्रतापूर्वकं स्वकीयव्यक्तित्वस्य विकासार्थं प्रेरयति। उदारवाद: मानवजीवनस्य प्रत्येकस्मिन् क्षेत्रे वैयक्तिकप्राधान्यं स्वीकरोति । उदारवाद: स्वकीयहितसाधने सामाजिकहितसाधने च सामञ्जस्यं स्थापयति ।

श्रीभिक्षुमहाकाव्ये सत्य-अहिंसा-अपरिग्रहादीनां उपदेश:, शुभभावनया स्वकीयस्य कल्याणेन सह लोककल्याणभावना, उत्तमाचरणस्य माध्यमेन स्वकीयस्योद्धारपूर्वकं तदाचरणस्य शिक्षामाध्यमेन सम्पूर्णसंसारस्य कल्याणस्य मार्ग: प्रशस्त:, कल्याणमार्गस्य सत्यमार्गस्य च पथस्य उपदेश:, प्राणिनां कल्याणाय संकल्प:, हिंसाप्रवृत्ते: निन्दा, विश्वहितचिन्तनस्य भावना, मोहादिकस्य त्याग: येन कल्याणमार्ग: आश्रयते, स्वतन्त्रताया: प्रतिष्ठापना, अहिंसायुक्तस्य मार्गस्य अनुसरणस्य उपदेश: इत्यादय: उदारवादिचिन्तनसन्दर्भा: प्राप्ता: ।

**'आचार्य महाप्रज्ञ'** इति नाम्ना विश्रुतः जैनमुनिः श्रीनत्थमलः 1959 तमे विक्रमीयाब्दे वैशाखमासस्य शुक्लपक्षे त्रयोदश्यां तिथौ राजस्थानप्रदेशस्य मेवाडक्षेत्रस्य बागोरनामके ग्रामे जनिं प्राप्तः । श्रीनत्थमलस्य जनकः श्री हमीरमलः जननी च चाहीदेवी आसीत् । एकादशवर्षस्यावस्थायां मुनिनथमलस्य केचन परिवारजना: अकालमृत्यु प्राप्ताः एतस्मादेव कारणात् तस्य मनसि यथार्थचिन्तनस्य वैराग्यस्य चाविर्भावः जातः । तस्मिन् समये एव तेरापन्थधर्मसंघस्य श्रीछबीलमुनिना सह तस्य सम्पर्कः अभवत् । तेरापन्थस्याष्टमाचार्यश्रीकालूगणीमहोदयस्य प्रभावात् बालकः नत्थमलः त्रयोदशवर्षस्यावस्थायामेव पालीनगरे प्रव्रज्यां गृहीतवान् । कविहृदयः श्रीनत्थमलः बाल्यकाले एव जैनधर्मग्रन्थानां, व्याकरणन्यायसाहित्यादिशास्त्राणां अध्ययनमकरोत् । श्रीनत्थमलः संस्कृतभाषायां अत्यधिकाभिरूचिकारणात् तद्भाषासाहित्ये ज्ञाने च निष्णातः जातः । त्ता मुनिनत्थमलस्य संस्कृतलेखनप्रतिभा तेषां महाकाव्य-खण्डकाव्य-स्फुटरचनादीनां माध्यमेन विशिष्टरूपेणाभिव्यक्ताभवत् । श्रीनत्थमलस्य रचनासु श्रीभिक्षुमहाकाव्यम्, सम्बोधिः, रत्नपालचरित्रम्, तुला-अतुला, मुकूलम्, अश्रुवीणा इत्याद्यः संस्कृतकृतयः उल्लेखनीयाः सन्ति। श्रीभिक्षुमहाकाव्यम् तेरापन्थस्य आद्यप्रवर्तकाचार्यश्रीभिक्षोः जीवनदर्शनस्योपर्याधारितं चरित्रमहाकाव्यमस्ति । 1960 तमे ईसवीयाब्दे लिखितं श्रीभिक्षुमहाकाव्यं अष्टादशसर्गेषु निबद्धमस्ति यत् शब्दसौष्ठवार्थगाम्भीर्ययोः युक्तं विशिष्टं महाकाव्यमस्ति। सम्बोधि षोडशाध्यायेषु 669 श्लोकेषु निबद्धा कृतिरस्ति। एषा रचना योग-प्रक्रियायाः विश्लेषणात्मकं स्वरूपं प्रदर्शयति । रत्नपालचरित्रम् जैनपौराणिकाख्यानेष्वधारितं पञ्चसर्गेषु निबद्धं खण्डकाव्यमस्ति । कल्पनायाः आधिक्येन भावविन्यासस्य शब्दसौष्ठवस्य च अभूतपूर्वसामञ्जस्ययुक्तमिदं खण्डकाव्यं संस्कृतसाहित्यस्य उत्कृष्टकलानिधिः सञ्जाता। आचार्यमहाप्रज्ञस्य न्यायदर्शनयोः क्षेत्रे न्यायपंचविंशतिः, युक्तिवादः, अन्योपदेशः इत्यादयः कृतयः अपि सन्ति।

आचार्यतुलसे: प्रेरणया पं.विद्याधरशास्त्रिमहोदयस्यानुरोधण आचार्य महाप्रज्ञेण (मुनिनत्थमलेन) विविधविधासम्पन्नमिदं महाकाव्यं 2015-16 तमे विक्रमीयाब्दे विरचितम् 2017 तमे विक्रमीयाब्दे च तेरापन्थस्य द्विशताब्दिसमारोहावसरे स्वगुरुं प्रति समर्पितम्। एतस्मिन् महाकाव्ये अष्टादशसर्गाः सन्ति । प्रत्येकं सर्गः पृथक् पृथक् छन्दे निबद्धः । आचार्यभिक्षोः जीवनचरित्रस्य प्रकाशके महाकाव्येस्मिन् 2600 परिमिताः श्लोकाः सन्ति । एतस्मिन् प्रकृति-वर्णनं, अरावलीपर्वतमालायाः विस्तृतविवेचनं, मेवाडशासकानां परिचयः, तत्कालिकीनां सामाजिक- राजनैतिक-धार्मिकपरिस्थितीनामतीव सजीवचित्रणं कृतमस्ति। आचार्यभिक्षुरेवास्य महाकाव्यस्य नायकः अस्ति । तस्य बाल्यकालः, शरीराङ्गादिकस्य फलकथनं भावीजीवनस्य फलकथनं, तस्य यौवन, परिणयः, पत्नीवियोगः, आचार्यरघुनाथद्वारा भागवतीदीक्षा इत्यादयः एतस्य महाकाव्यस्य प्रमुखाः विषयाः सन्ति। एतस्य महाकाव्यस्य विषयसूची संक्षिप्तरूपेण एवमस्ति-

1) प्रथम: सर्ग:- मंगलाचरणम्, काव्यकारस्यात्मनिवेदनम्, मरुधरदेशस्य जोधपुरस्य च वर्णनम्, कटालियाग्रामे बालकस्य भिक्षो: जन्म, प्रभातादिकस्य वर्णनम्, बालकस्य आकृतिरूपादिकस्य वर्णनम् , बालकस्य भिक्षो: नामकरणम् , बालकस्य शैशवकालीन लीला:, विद्या-अध्ययनम् , बालक्रीडा:

2) द्वितीय: सर्ग:- बालकस्य भिक्षो: यौवनम् , पितु: दिवङ्गति:, बालकस्य सामाजिक-प्रतिष्ठा, भिक्षो: विवाह:, भिक्षो: दाम्पत्यजीवनम्, उत्कटविरक्ति: गुरोरावश्यकता च,

धर्मस्य ह्रास:, हिंसाडम्बरपूर्णप्रवृत्तीनां प्रचलनम्, मुनिजनानां यात्रा, जैन-शासनस्याभ्युदयस्य कारणानि, आचार्यरघुनाथस्य जैनशासनम्, भिक्षुना रघुनाथस्य गुरुरूपे स्वीकरणम्, पतिपत्नयो: ब्रह्मचर्यव्रत:

3) तृतीय: सर्ग:-भार्याया: अकालमृत्यु:, नगर-जनै: पुनर्विवाहस्य प्रेरणा भिक्षोश्चास्वीकृति:, दीक्षायै मातु: अनुमति:, मातृमोहस्य निवारणम्, जनन्या: प्रव्रज्यायै स्वीकृति:, दीक्षास्वीकृत्या भिक्षो: प्रसन्नता,

4) चतुर्थ: सर्ग:-भिक्षोरभिनिष्क्रमणम्, भिक्षो: दीक्षा, प्रथम: चत्वार: चातुर्मास:, मेवाड़देशस्य वर्णनम्, बागोरनगरस्य वर्णनम्, पञ्चम: षष्ठश्च चातुर्मास:

5) पञ्चम: सर्ग:- राजनगरस्य सौन्दर्यवर्णनम्, राजनगरस्य श्रावकानां स्थित्या आचार्य रघुनाथस्य व्यथा, श्रावकेषु विघटनम्, मुने: भिक्षो: तत्रागमनम्, अरावलिपर्वतमालाया: वर्णनम्, भिक्षो: श्रावकान् निदर्शनम्, श्रावकों द्वारा पुनश्चिन्तन की प्रेरणा

6) षष्ठ: सर्ग:- जिनेश्वरदेवस्य स्तुति:, मिथ्याप्ररूपणाया भिक्षो: मन:स्थिति:, सूर्यास्तवर्णनम् , शीतज्वरप्रकोप:, भिक्षा: सहनशीलता, मुने: भिक्षो: कल्याणमार्गानुसरणस्य प्रतिज्ञा, शुभभावनया शीतज्वरस्यापनयन

7) सप्तम: सर्ग:- सूर्योदयस्य वर्णनम्, ज्वरमुक्तवस्थायां मुने: भिक्षो: चिन्तनम्, भिक्षा: अन्तरालोकस्योपलब्धि:, राजनगरवासिशंकाशीलश्रावकानां समक्षं सत्यस्योद्घाटनम्, राजनगरस्याष्टम: चातुर्मास:

8) अष्टम: सर्ग:- भिक्षो: प्रस्थानम्, अवसरप्रतीक्षा, जिज्ञासानां समाधानार्थं निवेदनम्, गुरुप्रतीति:, राजनगरवासिश्रावकानां मन:स्थिति: विचारोद्वेलनञ्च

9) नवम: सर्ग:- आचार्यरघुनाथस्य भिक्षुना सह संवाद:, शिवपथस्यानुसरणस्य निवेदनम् , श्रद्धाया: स्वरूप:, प्रशस्तयोग: अप्रशस्तयोगश्च, आज्ञाधर्म: अनाज्ञाधर्मश्च, विश्वासोत्पत्ति:, मेड़ताचातुर्मासाय प्रस्थानम्, तत्वचर्चा, संघविच्छेद: स्थानकाच्च बर्हिगर्मनम्, अस्पृष्ट: मुनि: भिक्षु:, आचार्यरघुनाथस्य भयप्रदर्शनम् , अभीतस्य भिक्षो: दृढ़ता , आचार्यजयमलेन सह वार्तालाप:, हिंसा-अहिंसा-दया-दान-सावद्य-निर्वद्य-पुण्य-पापादीनां चर्चा, मुने: भिक्षो: कष्ट-सहिष्णुता, काव्यकारस्यात्मनिवेदनम्

10) दशम: सर्ग:- मुने: भौरीमलस्य योग्यताया: वर्णनम्, भिक्षुना सह द्वादशमुनिनामभिधानम्, तत्त्वचर्चा, मेवाडप्रस्थानम्, महाराणाप्रतापस्य मानसिंहस्य च चरित्रवर्णनम् , केलवानगरस्य वर्णनम्, तेरापंथस्योदयस्य प्रासंगिकता, मुनिना भिक्षुना नवीनाया: दीक्षाया: ग्रहणम्, हर्षोल्लास:

11) एकादश: सर्ग:- राजनगरवासिनां श्रावकानां आशान्विती, अंधेरीओरीस्थाने चातुर्मास:, बालमुने: भारीमालस्य सर्पोपद्रव: भिक्षो: निवारणम्, रात्रिकाले यक्षेण सह साक्षात्कार:, तेरापंथस्य नामकरणम्

12) द्वादश: सर्ग:- आचार्यरघुनाथस्याक्रोश:, भिक्षो: सामाजिक: प्रतिबन्ध:, भिक्षो: मातु: सह रघुनाथस्य वार्तालाप:, भिक्षो: विरोधसहनम्

13) त्रयोदश: सर्ग:- आचार्यभिक्षुं प्रति जनानुरक्ति:, मुनिद्वयस्य आत्मनिवेदनम् , आचार्यभिक्षो: जन-प्रतिबोध:, अनुयायिनां वृद्धि:

14) चतुर्दश: सर्ग:- जनोपदेशा:, अनेकान्तस्याभिव्यक्ति:, आचार्यभिक्षो: प्रबोधशैली

15) पञ्चदश: सर्ग:- विविधोपदेशा:, धर्मसंघे त्रय: एव तीर्था:, दयामहिमा, अष्टादशपापानां त्याग:, दानविषयकं स्पष्टीकरणम्, त्यागाहिंसादीनां स्पष्टीकरणम्, दयादानादिकस्य स्वरूपम्, उपदेशस्य लक्ष्यम्, राग-द्वेषस्य परिचय:, विवेकयुक्तं दानम्, सुमार्ग: कुमार्गश्च, अभयदानस्य माहात्यम्

16) षोडश: सर्ग:- आचार्यभिक्षो: महती क्रान्ति:, विनयमूलक: धर्म:, हठधर्मिता न स्यात्, श्रद्धाज्ञानचरित्रादीनां लक्षणम्, निन्दाया: स्वरूपम्

17) सप्तदश: सर्ग:- सिरियारीनगरस्य वर्णनम्, अन्तिम: चातुर्मास:, अतिसाररोगस्याक्रमण: तस्य प्रतीकार:, संवत्सरीपर्व:, भारीमलस्य गुणवर्णनम्, मुनिरायचन्दं मोहविसर्जनस्योपदेश:, मुने: भारीमलस्यात्मनिवेदनम्, शिष्य-संपदा, क्षमायाचनोपक्रम

18) अष्टादश: सर्ग:- जनभावानां पवित्रीकरणम्, अनश्वस्य प्रशंसा, आचार्यभिक्षो: चतस्र: वार्ता:, अवधिज्ञानम्, तिसृणां वार्तानां यथार्थता, चतुर्थी वार्ता अस्पष्टा, ध्यानावस्था, सौचिककथनम्, ध्यानावस्थायामेव स्वर्गगमन्, अन्त्येष्टिवर्णनम्

उपर्युक्ताया: विषयसूच्या: अन्तर्गते उदारवादिचिन्तनस्य सन्दर्भा: अधुना अस्माभि: द्रष्टव्या: । एतन्महाकाव्यमेकं जैनमहाकाव्यमस्ति अत: स्वभावत एव एतस्मिन् सत्य-अहिंसा-अपरिग्रहादीनां सम्मतानां उपदेशानां बाहुल्यं प्राप्स्यते । द्वितीये सर्गे यदा युवक: भिक्खण: (भिक्षु:) सत्याचरणपूर्वक व्यापारकार्यं करोति स्म तदा स: जनानां एतां भ्रान्तिं दूरीकृतवान् यस्या: अनुसारं ते मन्यन्ते यत् असत्याचरण-अस्तेय-वञ्चनादिभि: विना व्यापारं न प्रभवितुं शक्नोति। द्रष्टव्योऽयं श्लोक:-

**लञ्चामृषास्तेयविवञ्चनाद्ये-**
**विना न वाणिज्यमिति प्रवक्तु: ।**
**तेभ्य: पृथग् भूय निदर्शितं**



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

**नाऽसत्यं यतस्तत्र रमानिवास: ।।**[187]

षष्ठे सर्गे भिक्षुमुनिना कृत शुभभावनया तस्य ज्वरस्य अपहारस्य घटना वर्णिता अस्ति यस्मिन्नुक्तं यत् दया-न्याय-सत्यादिभि: युक्तायां शुभभावनायां अमोघा शक्ति: भवति यस्या: प्रभावेण स्वकीयस्य मनसि अपूर्वानन्दस्यानुभूति: भवितुं शक्यते –

**अहो तत्सामर्थ्यं कियदियदमोघं शुभमते,**
**यतो यत्सवृत्ते ह्युदत्तरदकस्माज्ज्वर इयान् ।**
**ततोऽपूर्वाश्चर्य: सदयनयसत्यैकनियमो,**
**महानन्दोद्भेदं विलसतितरां भिक्षुरमलम् ।।**[188]

एतादृशी एव भावना सप्तमसर्गस्य निम्नलिखितयो: श्लोकयो: प्राप्यते यत्र महतां पुरुषाणां श्रेयमार्गे विवेकयुक्तबुद्धया प्रवर्तमानस्थिते: वर्णनं कृतमस्ति-

**किन्तु महोच्चतमा: पुरुषा ये,**
**भिन्नैर्नुन्ना अप्यतुषा ये ।**
**आन्तरनिर्मललोचनललिता:,**
**सामस्त्यै: श्रेय:सङ्कलिता: ।।**
**परवशतां ते नैव भजन्ते, हठराभस्यं नैव नयन्ते ।**
**लोचं लोचं पदमेकैक, प्रणिदधते ते प्रणयविवेकम् ।।**[189]

उत्तमाचरणस्य माध्यमेन स्वकीयस्योद्धारपूर्वकं तदाचरणस्य शिक्षामाध्यमेन सम्पूर्णसंसारस्य कल्याणस्य मार्ग: प्रशस्त: भवेत् इतिभावनायुक्त: उपदेश: सप्तमे एव सर्गे एवं प्राप्यते-

**हेय: शिथिलाचारविचार:, श्रेय: श्रेयानात्मोद्धार: ।**
**निस्तरणीयो भवजलपार:, तत्र भव त्वं कर्णाधार: ।।**[190]

नवमे सर्गे एक: उपदेश: प्राप्यते यस्मिन् कल्याणार्थं कल्याणमार्गस्य सत्यमार्गस्य चैव पथस्यनुसरणमुपदिष्टम्-

**संस्पृष्टा नो वयमनुमिते: किन्तु सत्च्छ्रद्धनाभि-**
**र्मिथ्यामार्गै: स्खलितचरणा नष्टनष्टा: सुमार्गात् ।**
**तस्मात् त्यक्त्वाऽभ्युपगतहठं साम्प्रतं साम्प्रतं यं,**
**सत्यं शुभ्रं शिवपुरपथं संश्रयाम: शिवार्थम् ।।**[191]

नवमे सर्गे एव वसन्तऋतुवर्णनप्रसङ्गे वसन्तस्य भिक्षवे उपदेश: आसीत् यत् यथा जलादीनामभावे अहं सम्पूर्णां भूमिं पुष्पितं पल्लवितं शस्ययुक्तञ्च करोमि तथैव त्वमपि एकाकी भूत्वापि प्राणिनां कल्याणाय समर्थोऽसि ।

**क्वाम्भ: सेकस्तदपि मुकुलं मेदिनीमण्डलास्यं,**
**फुल्लोत्फुल्लं हरितभरितं कल्पयामि प्रकृत्या ।**
**एकोपि त्वं वितनु सुतरां श्रायसं मद्वदेव,**
**व्याहतुर्ं तं सुरभिरभित: सम्भ्रमैबम्भ्रमच्च ।।**[192]

नवमे सर्गे अनेका: श्लोका: अहिंसाप्रवृत्ते: निन्दास्वरूपे प्रस्तुता: । तत्रोक्तं यत् हिंसाप्रवृत्त्या सह हिंसायां सहायकोऽपि समानमेवापराधको भवति। एक: श्लोक: द्रष्टव्य:-

**रक्षानाम्ना त्वहह ! कियती रक्ष्यजन्तो: परेषां,**
**हिंसा तस्याप्यविरतिभवैन: प्रबंधत्वतश्च ।**
**तस्माद्धिंसाशयविरमणं तत्त्वत: सा ह्यहिंसा,**
**नो चेत् सर्वाऽनवनवशत: सर्वथाऽहिंसक: क्व ।।**[193]

विश्वहितचिन्तकरूपस्य विश्वहितचिन्तनस्य च पुष्टिकारकस्य जैनधर्मस्योपदेशानां रक्षार्थं आचार्य: भिक्षु: दृढनिश्चयं कृतवानैतस्या: भावनाया: समर्थकोऽयं श्लोक: द्रष्टव्य:-

**एतद्विश्वजनीनपीननिरघं श्रीजैनधर्मं मुदा,**
**गोप्तुं गोप इवावदातसुमनो वाङ्काययोगान्वित: ।**
**सज्जोहं प्रबुभूषुरेष सुतरामाजन्म जैनं जगत्,**
**सूर्याचन्द्रमसाविवोत्तमपदा प्रद्योतितुं श्रेयसे ।।**[194]

अहिंसायुक्ताचरणस्य पालनाय आचार्यभिक्षो: जीवनचरित्रं आदर्शममासीत् । आचार्यभिक्षु: समदृष्टियुक्त: आसीत् । तस्य चरित्रस्य निदर्शकं श्लोकद्वयं द्रष्टव्यम्-

**कर्तुर्यतोऽयमिहकारयितुस्तथाऽनु**
**मन्तुस्ततत्रिकरणत्रिकयोगरूपा ।**
**साक्षात् परीक्षितुमियं सदसन्नृभावान्**
**संस्थापिता स्फुटतरा कषपट्टिकैव ।।**[195]

आचार्यभिक्षो: चरित्रनिदर्शकोऽयं श्लोक: अपि द्रष्टव्य: यस्मिन् एष: उल्लेख: प्राप्यते यत् सः सर्वेषु जीवधारिषु तुल्यदर्शी, सङ्गत्यक्तः, प्रशान्तः अस्ति यः नौकासदृशं स्वयमपि तरति परांश्चापि तारयति, सत्यं वदति शिवं वदति -

**सर्वाऽसुमत्सु भगवानिव तुल्यदर्शी,**
**सङ्गं कुसङ्गमिव यस्त्यजति प्रशान्त: ।**
**य: पोतवत्तरति तारयते परांश्च,**
**योऽर्हद्गिरां प्रवदते गुणभृद्वदेव ।।**[196]

187 भिक्षुमहाकाव्यम्, 2/48
188 भिक्षुमहाकाव्यम्, 6/134
189 भिक्षुमहाकाव्यम्, 7/22-23
190 भिक्षुमहाकाव्यम्, 7/103
191 भिक्षुमहाकाव्यम्, 9/5
192 भिक्षुमहाकाव्यम्, 9/76
193 भिक्षुमहाकाव्यम्, 9/145
194 भिक्षुमहाकाव्यम्, 10/42
195 भिक्षुमहाकाव्यम्, 11/105
196 भिक्षुमहाकाव्यम्, 11/114

Since 2009
ISSN- 0976-8645
UGC RN-41039

आचार्यस्योपदेश: अस्ति यत् जिनशासने येन ज्ञानेन मोहादिकस्य त्याग: भवति, येन कल्याणमार्ग: आश्रयते, येन सर्वै: सह मैत्री स्थाप्यते तज्ज्ञानमेव वास्तविकं ज्ञानमस्ति-

**येन रागा विरज्जन्ते, येन श्रेयसि रज्यते ।**
**येन मैत्री भवेत् सर्वैस्तज्ज्ञानं जिनशासने ।।**[197]

उदारवादिचिन्तनस्य मुख्यतत्वं 'स्वतन्त्रता' इत्यस्य प्रतिष्ठापनं सप्तदशसर्गस्यास्मिन् श्लोके भवति-

**स्वतन्त्रता सर्वकृते यथार्थे, नियन्त्रणं तस्य कदाग्रहस्य ।**
**न चेन्निजाचार्यसमै: कथं स, तथा प्रवर्तेत चरित्रनाथ: ।।**[198]

सम्पूर्णमहाकाव्ये विशिष्टरूपेण तूत्तरार्द्धे आचार्यभिक्षो: प्रश्नजिज्ञासादीनामुपदेशानाञ्च प्रसङ्गेषु अहिंसायुक्तस्य मार्गस्य अनुसरणस्य एव उपदेश: कृत: । अत: एते सर्वे प्रसङ्गा: जनकल्याणस्योदारवादिचिन्तनस्य प्रतिष्ठापका: सन्ति ।

.............................................................................................

## सन्दर्भग्रन्थसूची

१. श्रीभिक्षुमहाकाव्यम्, शासनस्तम्भमुनिनत्थमल:, जैनविश्वभारतीलाडनूं, राजस्थानम्, 1997
२. आधुनिक संस्कृत साहित्य का इतिहास, सम्पादक:- देवर्षि: कलानाथशास्त्री, वर्धमानमहावीरमुक्तविश्वविद्यालय: कोटानगरम्, प्रथमसंस्करणम्-मार्च-2010
३. राजस्थान की संस्कृत सम्पदा, डॉ. शंकरलालशास्त्री, राष्ट्रियसंस्कृतसाहित्यकेन्द्र, जयपुर, 2009
४. राजस्थान के प्रमुख संस्कृत महाकाव्य, सं.-डॉ. प्रभाकरशास्त्री, राजस्थानसंस्कृताकादमी, जयपुर, 1998
५. राजस्थान के संस्कृत कृतिकार, शंकरलाल शास्त्री, राष्ट्रीय साहित्य केन्द्र, 29-ए, माली कॉलोनी, चांदपोल बाजार, जयपुर, 2004

# सर्वदर्शनसङ्ग्रह में पदार्थ निरूपण

डॉ॰राज किशोर आर्य[199]

.............................................................................................

**कूटशब्द-**पदार्थ, द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, अभाव

.............................................................................................

**शोधसार-**
सर्वदर्शनसङ्ग्रह में लेखक का प्रमुख मन्तव्य उस काल तक प्रवर्तित समस्त भारतीय दर्शनों के संक्षिप्त रूप में निदर्शन तथा उन पर व्याख्यात्मक विवेचन प्रस्तुत करना था। इसीक्रम में वैशेषिक-दर्शन का विवेचन किया गया है। इसमें नौ द्रव्यों का लक्षण जाति को आधार मानकर प्रस्तुत किया गया है। सभी द्रव्यों के पूर्वापर प्रसंग की तर्कसंगत व्याख्या की गई है। गुण और कर्म का विवेचन संक्षिप्त में किया गया है तथापि सिद्धान्त की दृष्टि से महत्त्वपूर्ण है। पर, अपर, परापर सामान्य को त्रिविध विभाजित किया गया है। विशेष, समवाय नामक पदार्थ का वैशेषिक दर्शन की पदावलि में व्याख्या प्रस्तुत की गई है। अन्त में अभाव का विवेचन है।

.............................................................................................

भारतीय दर्शन की परम्परा में सङ्ग्रहग्रन्थों का महत्त्वपूर्ण स्थान है । सङ्ग्रहग्रन्थों में सर्वदर्शनसङ्ग्रह भी परिगणित है । सर्वदर्शनसङ्ग्रह के रचयिता माधवाचार्य हैं। इसमें सोलह अध्याय हैं। इनमें क्रमशः चार्वाक-दर्शन, बौद्ध-दर्शन, जैन-दर्शन, रामानुज दर्शन, विशिष्टाद्वैतपूर्णप्रज्ञ, द्वैतवेदान्त, नकुलीश-पाशुपत, शैव प्रत्यभिज्ञा, काश्मीरी शैव दर्शन, रसेश्वर-दर्शन, औलुक्य दर्शन, अक्षपाद दर्शन, जैमिनी दर्शन, पाणिनि-दर्शन, साङ्ख्य-दर्शन, पातञ्जल दर्शन, शाङ्कर दर्शन। माधवाचार्य का समय १२९५ ई. से १३८५ ई. तक माना गया है।[200]

[197] भिक्षुमहाकाव्यम्, 16/65
[198] भिक्षुमहाकाव्यम्, 17/64
[199] सहायक आचार्य, श्री वेंकटेश्वर महाविद्यालय, दिल्ली विश्वविद्यालय, दिल्ली
[200] ऋषि, उमाशङ्करशर्मा (सं.), माधवाचार्यकृत स. द. सं., प्रस्तावना, चौखम्बा विद्याभवन, वाराणसी, २००६, पृ.४२




Since 2009
ISSN- 0976-8645
UGC RN-41039

**सर्वदर्शनसङ्ग्रह की टीकाएं –** सर्वदर्शनसङ्ग्रह पर एक संस्कृत टीका, एक अंग्रेजी अनुवाद, एक मराठी अनुवाद प्राप्त होता है –

**दर्शनाङ्कुर-** यह वासुदेवशास्त्री कृत टीका है। जिसका प्रथम प्रकाशन भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पूना से १९२४ से हुआ था। दर्शनाङ्कुर टीका प्रारम्भ करने से पूर्व ग्रन्थकार ने सम्पूर्ण सर्वदर्शनसङ्ग्रह के सभी मतों पर विस्तृत भूमिका लिखी है, जिससे विषय को समझना सरल हो जाता है। प्रत्येक मत पर सरल भाषा में अन्य ग्रन्थों को उद्धृत करते हुए प्रत्येक पद की व्याख्या प्रस्तुत की है।

**E.B. Cowell & A.E Gough – English Translation – Notes** - यह सर्वदर्शनसङ्ग्रह का अंग्रेजी अनुवाद है। इसमें वेदान्त मत का अनुवाद प्रस्तुत नहीं किया गया है। अन्य सभी मतों का अनुवाद किया गया है। इसके सम्पादक के.एल. जोशी है तथा यह परिमल पब्लिकेशन्स दिल्ली से २००६ में इसका चतुर्थ संस्करण प्रकाशित हुआ है।

**र. पं. कंगले – सटीप मराठी भाषान्तर –** यह मराठी अनुवाद महाराष्ट्र राज्य साहित्य संस्कृति मंडल, मुंबई से सन् १९८५ ई. में प्रकाशित हुआ है। इसमें प्रथम संस्कृत रखा गया है उसके नीचे मराठी भाषा में अनुवाद है।

**सर्वदर्शनसङ्ग्रह में प्रतिपादित द्रव्य-** सर्वदर्शनसङ्ग्रह में वैशेषिक-दर्शन को 'औलूक्य-दर्शन' कहा गया है। इसे विवेचन के क्रम में 'रसेश्वर-दर्शन' के बाद दसवें स्थान पर रखा गया है। इसके प्रारम्भ में दुःखों का अन्त शिव के साक्षात्कार से होगा, इस विषय में बताया गया है। वैशेषिक सूत्रों की विषयवस्तु तथा उद्देश्य, लक्षण, परीक्षा का भी कथन किया गया है। सर्वदर्शनसङ्ग्रह में माधवाचार्य ने वैशेषिक-दर्शन के प्रारम्भ में पदार्थ छः ही स्वीकार किए हैं - द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय - **तत्र द्रव्यगुणकर्मसामान्यविशेषसमवाया इति षडेव ते पदार्थाः।**[201] यद्यपि अन्त में अभाव का भी वर्णन प्राप्त होता है।

वैशेषिक-दर्शन में पदार्थों के विभाजन के सन्दर्भ में यहाँ एक क्रम प्राप्त होता है जिसके विषय में यहाँ विस्तार-पूर्वक चर्चा प्राप्त होती है। माधवाचार्य कहते हैं कि सभी पदार्थों का आधार होने के कारण द्रव्य का कथन पहले किया गया है। **समस्तपदार्थायतनत्वेन प्रधानस्य द्रव्यस्य प्रथमुद्देशः।**[202] सभी द्रव्यों में पाये जाने वाले गुण को गुणत्व जाति के कारण द्वितीय स्थान पर रखा है।

सर्वदर्शनसङ्ग्रह के हिन्दी भाष्यकर्त्ता उमाशङ्कर शर्मा ने गुण का अर्थ गौण किया है। द्रव्य की अपेक्षा गुण गौण होता है अतः इसे द्वितीय स्थान पर रखा गया है। **अनन्तरं गुणत्वोपाधिना सकलद्रव्यवृत्तेर्गुणस्य।**[203]

सर्वदर्शनसङ्ग्रह में गुण के बाद कर्म को रखते हैं, क्योंकि द्रव्य, गुण, कर्म तीनों में सामान्य की सत्ता रहती है। द्रव्य पर गुण और कर्म आश्रित रहते हैं, अतः द्रव्य को प्रथम रखा गया है, गौण होने से गुण द्वितीय स्थान पर रखा गया है। शेष कर्म रहता है अतः तृतीय स्थान पर कर्म को रखा गया है। **सामान्यवत्त्वसाम्यात्कर्मणः।**[204]

चतुर्थ स्थान में सामान्य को रखते हैं। सामान्य द्रव्य, गुण, कर्म में रहता है, अतः ये तीनों आधार हैं तथा सामान्य आधेय है। अतः इसे तीनों के बाद चतुर्थ स्थान पर रखा गया है। **पश्चात्तत्त्रितयाश्रितस्य सामान्यस्य।**[205]

पञ्चम क्रम में विशेष को रखते हैं क्योंकि विशेष आधार है। आधार पर ही आधेय रहता है अतः विशेष को पहले अर्थात् पञ्चम स्थान में रखते हैं। **तदनन्तरं समवायाधिकरणस्य विशेषस्य**[206] अन्त में आधेय रूप समवाय को रखते हैं। **अन्तेऽवशिष्टस्य समवायस्येति।**[207]

सर्वदर्शनसङ्ग्रहकार प्रश्न करते हुए कहते हैं कि पदार्थ छः ही क्यो हैं ? अभाव भी तो पदार्थ है। पुनः स्वयं ही उत्तर में कहते हैं कि पदार्थ दो प्रकार के हैं –

१. भावरूप

[201] सर्वदर्शनसंग्रह, पृ. ३४२
[202] सर्वसिद्धान्तसंग्रह, पृ.३४३
[203] सर्वसिद्धान्तसंग्रह, पृ.३४४
[204] सर्वसिद्धान्तसंग्रह, पृ.३४३
[205] सर्वसिद्धान्तसंग्रह, पृ.३४३
[206] सर्वदर्शनसंग्रह, पृ.३४३
[207] सर्वदर्शनसंग्रह, पृ.३४३

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

२. अभावरूप

भाव पदार्थ छः ही हैं। शक्ति और सादृश्य का इन्हीं भावरूप पदार्थों में ही अन्तर्भाव हो जाता है।[208]

**द्रव्य** – द्रव्यत्व जाति से युक्त ही द्रव्य है अर्थात् जिसमें द्रव्य समवाय सम्बन्ध से रहता है, उसे द्रव्य कहते हैं। **'तत्र द्रव्यादित्रितयस्य द्रव्यत्वादिजातिर्लक्षणम्।'** [209]

इस लक्षण को और अधिक स्पष्ट करते हुए कहते हैं कि जब गगनारविन्द में आकाश के साथ तथा अरविन्द के साथ अलग-अलग कोई पदार्थ समवेत हो, वह नित्य हो तथा गन्ध के साथ समवेत न हो उसे द्रव्य-सामान्य कहते हैं - **द्रव्यत्वं नाम गगनारविन्दसमवेतत्वे सति नित्यत्वे सति गन्धासमवेतत्वम्।**[210]

**द्रव्य के भेद** – द्रव्य नौ प्रकार का है – **'द्रव्यं नवविधं पृथिव्यापस्तेजोवाय्वाकाशकालदिगात्ममनांसि इति।'**[211]

१. **पृथिवीत्व** – जो पाक अर्थात् अग्नि-संयोग से उत्पन्न रूप समानाधिकरण हो तथा द्रव्य सामान्य के द्वारा सीधे व्याप्त हो, उसे पृथिवीत्व कहते हैं अर्थात् **'पृथिवीत्वं नाम पाकजरूपसमानाधिकरण- द्रव्यत्वसाक्षाद्व्याप्यजातिः।'**[212]

२. **जलत्व** – जो सरिताओं और सागरों में समवेत हो किन्तु ज्वलन से समवेत न हो, उसे अपत्व कहते हैं। **अस्त्वं नाम सरित्सागरसमवेतत्वे सति ज्वलनासमवेतं सामान्यम्।** [213] सरिताओं और सागरों के साथ जल का समवाय सम्बन्ध होता है। इस विशेषण का प्रयोग होने से उन जातियों की व्यावृत्ति होती है जो जलत्व से व्यधिकरण में है। यथा – पृथिवीत्व आदि।

३. **तेजस्त्व** – जो चन्द्र और स्वर्ण के साथ समवेत हो, किन्तु जल से समवेत न हो, उसे तेज कहते हैं अर्थात् **तेजस्त्वं नाम चन्द्रचामीकरसमवेतत्वे सति सलिलासमवेतं सामान्यम्।**[214] चन्द्र व स्वर्ण में तेजस्त्व नामक जाति समवाय सम्बन्ध से रहती है। इतना कहने से पृथिवीत्व व जलत्व आदि जातियों का परिहार हो जाता है, क्योंकि तेजस्त्व जाति केवल तेज में ही समवाय सम्बन्ध से रहती है अन्य के साथ तो संयोग सम्बन्ध होता है।

यहाँ तेज के लक्षण में दो शब्द प्रयोग किये गये हैं – चन्द्र व स्वर्ण। यहाँ यह शङ्का उत्पन्न होती है कि क्या चन्द्र में स्वर्णत्व तथा स्वर्ण में चन्द्रत्व रह सकता है, तो यह सम्भव नही है क्योंकि चन्द्र में चन्द्रत्व समवाय सम्बन्ध से रहता है स्वर्णत्व नही तथा स्वर्ण में स्वर्णत्व समवाय सम्बन्ध से रहता है चन्द्रत्व नही। वैशेषिक-दर्शन के अनुसार जाति और व्यक्ति में समवाय सम्बन्ध होता है।[215]

यहाँ सर्वदर्शनसङ्ग्रहकार द्वारा लक्षण देते हुए तेजस्त्व, वायुत्व आदि शब्दों का प्रयोग किया गया है। जबकि अन्यान्य ग्रन्थों में पृथिवी तथा जल आदि शब्दों का प्रयोग होता है क्योंकि पृथिवी द्रव्य है तथा द्रव्यत्व उसमें रहने वाली जाति है।[216]

**वायुत्व** – जो त्वगिन्द्रिय अर्थात् स्पर्शेन्द्रिय से समवेत तथा द्रव्यत्व के द्वारा सीधे व्याप्त हो उसे वायु कहते हैं। वायु के कारण ही स्पर्श का अनुभव होता है। द्रव्यत्व में वायु भी आता है इसीलिए साक्षात् व्याप्त है। **वायुत्वं नाम त्वगिन्द्रियसमवेतद्रव्यत्वसाक्षाद्व्याप्यजातिः।** [217] आकाश, काल, दिक् इनके विषय में माधवाचार्य कहते हैं कि आकाश, काल व दिक् ये तीनों पारिभाषिक संज्ञायें हैं।[218]

सर्वदर्शनसङ्ग्रह के औलूक्य दर्शन में जिनकी जातियाँ हैं, उन्हीं के लक्षण दिए गए हैं। यथा - पृथिवी - पृथिवीत्व, जल-जलत्व, तेज-तेजस्त्व, वायु-वायुत्व। आकाश में आकाशत्व, काल में कालत्व, दिक् में दिक्त्व होता ही नही है, क्योंकि ये तीनों ही

208 सर्वदर्शनसंग्रह, पृ.३४५
209 सर्वदर्शनसंग्रह, पृ.३४७
210 सर्वदर्शनसंग्रह,, पृ.३४७
211 सर्वदर्शनसंग्रह, पृ.३५२
212 सर्वदर्शनसंग्रह, पृ.३५२
213 सर्वदर्शनसंग्रह, पृ.३५२
214 सर्वदर्शनसंग्रह, पृ.३५४
215 तर्क सङ्ग्रह, पृ.११०
216 सर्वदर्शनसंग्रह, पृ.३५२-३५४
217 सर्वदर्शनसंग्रह, पृ.३५४
218 सर्वदर्शनसंग्रह, पृ.३५४



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

एक – एक हैं। जाति तभी हो सकती है कि जब अनेकता हो। यथा गौ होने पर ही गोत्व का प्रयोग होता है। सामान्य अर्थात् जाति के लिए कम से कम दो व्यक्ति होने चाहिए अन्यथा समानता किसके साथ प्रदर्शित करेंगे।

**आकाश** – सर्वदर्शनसङ्ग्रह में बताया गया है कि संयोग से उत्पन्न न होने वाले तथा अनित्य विशिष्ट गुण के साथ जो विशेष समानाधिकरण है, उसी विशेष का आधार आकाश है अर्थात् **संयोगाजन्यजन्यविशेषगुणसमानाधिकरणविशेषाधिकरणमाकाशम्।**[219] वैशेषिक-दर्शन में विशेष नामक पदार्थ केवल नित्य द्रव्यों में रहता है। अतः आकाश भी नित्य है, इसीलिए आकाश में भी विशेष रहता है। आकाश विशेष का आधार है। इसमें भी विशेष गुण शब्द रहता है। इस शब्द के साथ ही आकाश में अवस्थित विशेष समानाधिकरण है। यहाँ ध्यातव्य है कि शब्द का आधार भी आकाश है। विशेष नामक पदार्थ का आधार भी आकाश है। अतः आधार की समानता के कारण दोनों का समानाधिकरण है।

यहाँ लक्षण में शब्द के दो विशेषण हैं – 'संयोगाजन्य तथा जन्य ' शब्द जन्य अर्थात् उत्पन्न किया जाता है अतः अनित्य है। शब्द संयोग से उत्पन्न नही होता है, अतः नित्य है। सर्वदर्शनसङ्ग्रह में बताया गया है कि वैशेषिक-दर्शन में विभाग से उत्पन्न तथा शब्द से उत्पन्न शब्द की सत्ता स्वीकार की जाती है।

**काल** – जो व्यापक तथा दिक् से असमवेत परत्व के असमवायिकारण का अधिकरण हो, वह काल है। **विभुत्वे सति दिगसमवेतपरत्वासमवायिकारणाधिकरणः कालः।**[220] परत्व दो प्रकार का होता है –

१. स्थानगत
२. कालगत

१. **स्थानगत** – परत्व का दिक् व वस्तु का संयोग असमवायिकारण होता है। इसमें दिक् समवेत रहता है। काल असमवेत रहता है क्योंकि संयोग दो पदार्थों का होता है।

२. **कालगत** – कालगत परत्व का काल और वस्तु का संयोग असमवायिकारण होता है। इसमें दिक् असमवेत रहता है। काल समवेत रहता है।

काल के लक्षण में 'विभु' पद का प्रयोग करने से ज्येष्ठ में अतिव्याप्ति नही होती है, क्योंकि संयोग दो वस्तुओं का होता है। इसलिए काल और ज्येष्ठ वस्तु दोनों में उसकी सत्ता रहती है। अन्तर यह है कि काल विभु होता है, ज्येष्ठ वस्तु विभु नही हो सकती है।

**दिक्** – जो काल न हो, किसी विशेष गुण से रहित हो तथा महती अर्थात् विभु हो, वही दिक् है अर्थात् **अकालत्वे सति अविशेषगुणा महती दिक्।**[221]

काल में अतिव्याप्ति रोकने के लिए 'अकाल' कहते हैं क्योंकि काल भी विशेष गुण से शून्य तथा विभु होता है।

आकाश और आत्मा में अतिव्याप्ति रोकने के लिए 'विशेष गुण से रहित' कहा गया है क्योंकि आकाश का विशेष गुण शब्द है। आत्मा का विशेष गुण बुद्धि आदि है। ये दोनों अकाल हैं तथा विभु हैं किन्तु विशेष गुण से रहित नही हैं।

मन में अतिव्याप्ति न हो इसीलिए इसमें 'महती' कहा गया है। क्योंकि मन अकाल तथा विशेष गुण से रहित है तथा विभु नही है।

**आत्मत्व** – जो मूर्त द्रव्यों में समवेत न हो तथा द्रव्यत्व के द्वारा व्याप्त होती हो, वह आत्मा है। **आत्मत्वं नामामूर्तसमवेतद्रव्यत्वापरजातिः।**[222] पृथिवी, जल, तेज, वायु और मन में यह लक्षण अतिव्याप्त न हो अतः 'अमूर्त समवेत' कहा गया है।

**मनस्त्व** – जो अणु द्रव्य का समवायिकारण नही हो सकते, उन अणुओं में समवेत तथा द्रव्यत्व के द्वारा व्याप्त होने वाली जाति को मनस्त्व जाति कहते हैं। **मनस्त्वं नाम द्रव्यसमवायिकारणत्वरहितागुणसमवेतद्रव्यत्वापरजातिः।**[223]

सर्वदर्शनसङ्ग्रह में बताया गया है कि 'जो अणु द्रव्य का समवायिकारण नहीं हो सकते हैं' यह कहने से पृथिवी, जल, तेज और वायु के परमाणुओं का निरसन हो जाता है क्योंकि

219 सर्वदर्शनसंग्रह, पृ.३५५
220 सर्वदर्शनसंग्रह, पृ. ३५५
221 सर्वदर्शनसंग्रह, पृ.३५५
222 सर्वदर्शनसंग्रह, पृ.३५८
223 सर्वदर्शनसंग्रह, पृ.३५८

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

इनका संयोग होने पर उन द्रव्यों के द्व्यणुक, त्र्यणुक, चतुरणुक आदि बनते हैं तथा वे परमाणु द्व्यणुकादि के समवायि-कारण होते हैं। 'अणु' कहने से आकाश, काल, दिक्, आत्मा में यह लक्षण अतिव्याप्त नहीं होता है।

**गुण** – माधवाचार्य नौ द्रव्य तथा उसके लक्षण देने के बाद द्वितीय पदार्थ गुण के विषय में कहते हैं कि ये चौबीस हैं[224] –

**रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छा द्वेषप्रयत्नाश्च कण्ठोक्ताः सप्तदश, चशब्दसमुच्चिताः गुरुत्वद्रवत्वस्नेहसंस्कारादृष्ट शब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः।**[225]

सर्वदर्शनसङ्ग्रहकार द्वारा द्रव्यों के लक्षण में जाति द्वारा लक्षण दिया गया है उसी प्रकार गुणों के लक्षण में भी जाति का प्रयोग किया गया है। उदाहरण - रूपत्व जाति वह है जो नील से समवेत हो और गुणत्व के द्वारा व्याप्त होती है, वह रूप गुण है।[226]

**कर्म** – यहाँ पर कर्म का लक्षण नहीं दिया गया है। कर्म के पाँच भेद हैं – **कर्म पञ्चविधम्। उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात्।** [227] माधवाचार्य के अनुसार भ्रमण अर्थात् घूमना, रेचन अर्थात् खाली करना आदि क्रियाओं का गमन में अन्तर्भाव किया गया है।[228] भाषा परिच्छेद में इस विषय को और अधिक स्पष्ट किया गया है कि घूमना, खाली करना, प्रवाहित होना, ऊपर की ओर जलना तिरछा चलना आदि क्रियाओं का गमन में ही अन्तर्भाव हो जाता हैं।–

**भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च।**

**तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥**[229]

पाँच प्रकार के कर्मों के भेदों का अर्थ अधोलिखित है -

१. **उत्क्षेपण** – ऊपर की ओर फेंकना

२. **अपक्षेपण** – नीचे फेंकना

३. **आकुञ्चन** – वस्तुओं का वक्र होना या वस्तु के अवयवों का निकटतर आ जाना।

४. **प्रसारण** – वस्तुओं का सीधा हो जाना या उनके अवयवों का दूर हो जाना।

५. **गमन** – चार कर्मों से अतिरिक्त सभी कर्म गमन में आ जाते हैं।[230]

माधवाचार्य ने अपनी शैली के अनुसार यहाँ पर भी केवल उत्क्षेपण का लक्षण दिया है। ऊर्ध्व स्थानों के साथ संयोग के असमवायि कारण अर्थात् कर्म विशेष से समवेत तथा कर्मत्व के द्वारा व्याप्त जाति को उत्क्षेपण कहते हैं।[231]

**सामान्य** - वैशेषिक-दर्शन के अनुसार आधार के बाद आधेय पदार्थ आते हैं। द्रव्य, गुण, कर्म तीनों ही सामान्य के लिए आधार हैं, इसलिए वे सामान्य की अपेक्षा प्रधान हैं। सामान्य इन तीनों के अन्त में आता है अर्थात् पदार्थों के क्रमिक गणना में चतुर्थ स्थान पर आता है।[232]

**'सामान्यं तु प्रध्वंसप्रतियोगीत्वरहितमनेकसमवेतम्'** अर्थात् जो प्रध्वंश अर्थात् विनाश का प्रतियोगी न हो तथा अनेक पदार्थों में समवेत हो उसे सामान्य कहते हैं।[233]

अभिप्राय यह है कि सामान्य का विनाश नही होता है। जिस वस्तु की जाति मानी जाती है, उसके पदार्थों के नष्ट होने पर भी जाति यथापूर्व स्थित रहती है। उसका विनाश नही होता है। यथा भारतीयों के मरने पर भी भारतीयता यथावत् रहती है, घट के नष्ट होने पर भी घटत्व रहता है।[234]

जाति अथवा सामान्य की स्थिति समवाय सम्बन्ध से अनेक

---

224 सर्वदर्शनसंग्रह, औलूक्यदर्शन, पृ. ३५७

225 सर्वदर्शनसंग्रह, पृ. ३५७, रूपरसगन्धस्पर्श संख्या परिमाणानि पृथक्त्वं संयोगविभागौ, परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः।- वैशेषिकसूत्र १/१/५

226 सर्वदर्शनसंग्रह, औलूक्यदर्शन, पृ. ३५७

227 सर्वदर्शनसंग्रह, औलूक्यदर्शन, पृ. ३५८

228 सर्वदर्शनसंग्रह, पृ. ३५८

229 सर्वदर्शनसंग्रह, पृ. ३५८

230 सर्वदर्शनसंग्रह, पृ. ३५९

231 सर्वदर्शनसंग्रह, पृ. ३५९

232 पश्चात्तत्त्वित्रयात्रितस्य सामान्यस्य। - सर्वदर्शनसंग्रह, औलूक्य-दर्शन, पृ.३५०

233 सामान्यं तु प्रध्वंसप्रतियोगित्वरहितमनेकसमवेतम्। - सर्वदर्शनसंग्रह, पृ.३५०

234 सर्वदर्शनसंग्रह, पृ.३५१



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

पदार्थों में रहती है, एक पदार्थ में नही। केवल अविनाशी होने से तो दिक्, काल आदि में भी अतिव्याप्ति हो जाती है। अतः इन्हें व्यावृत्त करने के लिए ही 'अनेकसमवेत' विशेषण का प्रयोग किया गया है।[235] दिक्, काल अनेक पदार्थों में नहीं रहते जबकि घटत्व संसार के सारे घटों में एक ही साथ रहता है।

माधवाचार्य के अनुसार सामान्य दो प्रकार का होता है – '**सामान्यं द्विविधं परमपरं च। परं सत्ता द्रव्यगुणसमवेता। अपरं द्रव्यत्वादि।**'[236]

१. **पर** – पर सामान्य तो सत्ता है। यह द्रव्य और गुण से समवेत है।[237]

२. **अपर** – अपर सामान्य द्रव्यत्वादि हैं। **अपरं द्रव्यत्वादि।**[238]

**विशेष, समवाय** – वैशेषिक-दर्शन के अनुसार विशेष और समवाय में आधार-आधेय सम्बन्ध है। समवाय आधेय है, विशेष आधार है। आधार प्रथम आता है, आधेय बाद में आता है। अतः समवाय के आधार के रूप में अवस्थित विशेष नामक पंचम पदार्थ है। **विशेषो नामान्योन्याभावविरोधिसामान्यरहितः समवेतः।** अर्थात् जो समवाय-सम्बन्ध से अवस्थित हो तथा अन्योन्याभाव का विरोध करने वाले सामान्य से रहित हो वह विशेष है।[239] विशेष के इस लक्षण में अन्योन्याभाव एक पारिभाषिक शब्द है जिसका अर्थ है कि जब एक दूसरे में एक दूसरे का अभाव होता है, घट और पट का पारस्परिक भेद अन्योन्याभाव है। परमाणुओं में जो आपस में भेद है वह भी अन्योन्याभाव है। अन्योन्याभाव का विरोध करने वाले सामान्य इसमें नहीं रहते हैं क्योंकि सामान्य से रहित होने से द्रव्य, गुण, कर्म से इसका पार्थक्य ज्ञात होता है।[240]

विशेष के लक्षण में अन्योन्याभाव का विरोध कहने से सामान्य की व्यावृत्ति होती है, वैशेषिक-दर्शन में सामान्य का सामान्य नहीं होता है क्योंकि सामान्य में सामान्य मानने से अनवस्था-दोष होता है।[241] अभिप्राय यह है कि विशेषों में एक दूसरे के साथ अन्योन्याभाव रहता है, कोई विशेष समान नहीं होता कि एक जाति में उन्हें रख सकें। प्रत्येक विशेष, विशेष होता है। यदि विशेषों की जाति होने लगे, तो विशेषता उनसे छिन जायेगी तथा समानता होने लगेगी। सभी विशेष अन्योन्याभाव की प्रतीति कराते हैं। इसमें सामान्य लेने से उनके इस स्वभाव की हानि होगी, इसलिए विशेषों में सामान्य का अभाव इसी से सिद्ध होता है कि इनमें सामान्य मानने से अन्योन्याभाव की प्रतीति नहीं होगी। अतः विशेष अन्योन्याभाव का विरोध होने के कारण सामान्य से रहित होता है।[242] विशेष अनन्त प्रकार के हैं। **विशेषाणामनन्तत्वात् समवायस्य चैकत्वाद् विभागो न सम्भवति।**[243]

**अभाव** – वैशेषिक-दर्शन में अभाव को सप्तम पदार्थ माना गया है। यह निषेधात्मक प्रमाणों से जाना जाता है। समवाय सम्बन्ध से रहित तथा समवाय से भिन्न हो तो वह अभाव कहलाता है।[244] अभिप्राय यह है कि द्रव्य, गुण, कर्म, सामान्य और विशेष में समवाय सम्बन्ध रहता है। द्रव्यों का समवाय-सम्बन्ध अपने पर आश्रित गुणादि के साथ होता है। गुण और कर्म अपने आश्रय द्रव्य के साथ या अपने पर आश्रित सामान्य के साथ समवाय सम्बन्ध रखते हैं। सामान्य का भी अपने आश्रय स्वरूप द्रव्य, गुण और कर्म क साथ समवाय सम्बन्ध रहता है। विशेष आश्रय स्वरूप नित्य द्रव्यों के साथ समवाय सम्बन्ध रखते हैं। अनित्य द्रव्य भी अपने – अपने अवयवों से समवेत रहते हैं। समवाय का समवाय इसलिए नहीं होता कि अनवस्था दोष होगा। अतः लक्षण में **'असमवायत्वे सति'** कह कर द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय की व्यावृत्ति कर दी गई है।[245] अभाव दो प्रकार का होता है – १.

---

235 सर्वदर्शनसंग्रह, पृ.३५९

236 सर्वदर्शनसंग्रह, पृ.३५२

237 सर्वदर्शनसंग्रह, पृ.३५९

238 सर्वदर्शनसंग्रह, पृ.३५९

239 सर्वदर्शनसंग्रह, पृ. ३५०

240 पदार्थधर्मसंग्रह, पृ. ३५१

241 पदार्थधर्मसंग्रह, पृ. ३५१

242 पदार्थधर्मसंग्रह,पृ.३५१

243 सर्वदर्शनसंग्रह, पृ. ३५९

244 स चासमवायत्वे सत्यसमवायः।- सर्वदर्शनसंग्रह, वही, पृ. ३८१

245 सर्वदर्शनसंग्रह, पृ. ३८१

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

संसर्गाभाव २. अन्योन्याभाव[246]

संसर्ग का अर्थ सम्बन्ध होता है।[247] संसर्ग को प्रतियोगी मानकर जो निषेध किया जाता है, उसे संसर्गाभाव कहते हैं।[248] एक वस्तु में दूसरी वस्तु के सम्बन्ध का निषेध संसर्गाभाव है। संसर्गाभाव के तीन भेद हैं – १. प्राग्भाव, २. प्रध्वंसाभाव, ३. अत्यन्ताभाव[249]

१. **प्राग्भाव –** प्राग्भाव अनित्य तथा अनादि होता है। यथा – घटोत्पत्ति के पूर्व घट का अभाव।[250]

२. **प्रध्वंसाभाव –** जिसकी उत्पत्ति होती है, किन्तु विनाश नहीं होता है अर्थात् जिसका आरम्भ हो किन्तु अन्त नहीं हो वह प्रध्वंसाभाव है।[251] यथा – घट के फूट जाने पर अभाव का आरम्भ तो हुआ किन्तु इसका अन्त नहीं हो सकता है।

३. **अत्यन्ताभाव –** जो अपने प्रतियोगी में आश्रय ग्रहण करें वह अत्यन्ताभाव है।[252] उदाहरण – 'भूतले घटो नास्ति' यहाँ भूतल में संयोग सम्बन्ध से घट का अभाव है। घटाभाव का प्रतियोगी घट है। अभाव भूतल में है। अतः भूतल घटाभाव का अनुयोगी है जो अत्यन्ताभाव को प्रकट करता है।

४. **अन्योन्याभाव –** जो अत्यन्ताभाव से पृथक् है तथा कालगत अवधि से रहित है, वह अन्योन्याभाव है।[253] अनवधि का अर्थ नित्य है। उदा. घट पट नहीं है या घट में पट का अभाव है। यहाँ घट एवं पट का तादात्म्य नही है। यह अभाव अनादि और अनन्त है।

.................................................................................................

## सन्दर्भग्रन्थसूची

1. ऋषि, उमाशङ्करशर्मा (सं.), माधवाचार्यकृत स. द. सं., प्रस्तावना, चौखम्बा विद्याभवन, वाराणसी, २००६
2. सर्वसिद्धान्तसङ्ग्रह, शङ्कराचार्य, अजय बुक सर्विस, दिल्ली, १९८३
3. तर्कसङ्ग्रह, (तर्कदीपिका टीका), अन्नंभट्ट, सं. कांशी राम, मोतीलाल बनारसीदास, दिल्ली, २०१०
4. तर्कसङ्ग्रहः(स्वोपज्ञसहितम्),अन्नभट्टः,हि.व्या.दयानन्द भार्गव, मोतीलाल बनारसीदास, दिल्ली, प्र.सं.१९७१
5. तर्कभाषा, केशवमिश्र, व्या. आचार्य विश्वेश्वर सिध्दान्तशिरोमणि,चौखम्बा संस्कृत संस्कृत वाराणसी, वि. सं. २०६२,
6. वैशेषिकसूत्रम्, कणाद, सं. नारायण मिश्र, चौखम्बा संस्कृत सीरीज, वाराणसी, १९६६
7. प्रशस्तपादभाष्यम् 'न्यायकन्दली टीकासहितम्, व्या. पं. दुर्गाधर झा शर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी, १९९७
8. प्रशस्तपादभाष्य, प्रशस्तपादः, सं.श्रीनिवासशास्त्री,इण्डो-विजन-प्राइवेट लिमिटेड,गाजियाबाद,प्र.सं.१९८४

246 सर्वदर्शनसंग्रह, पृ. ३८१

247 सर्वदर्शनसंग्रह, पृ. ३८२

248 सर्वदर्शनसंग्रह, पृ. ३८२

249 संसर्गाभावोऽपि त्रिविधः प्राक्प्रध्वंसात्यन्ताभावभेदात्।- सर्वदर्शनसंग्रह, पृ. ३८२

250 अनित्योऽनादितमः प्राग्भावः, सर्वदर्शनसंग्रह, पृ. ३८१

251 उत्पत्तिमानविनाशी प्रध्वंसा, सर्वदर्शनसंग्रह, पृ. ३८१

252 प्रतियोग्याश्रयोऽभावोऽत्यन्ताभावः।- सर्वदर्शनसंग्रह, पृ. ३८१

253 अत्यन्ताभावव्यतिरिक्तत्वे सति अनवधिरभावोऽन्योन्याभावः।– सर्वदर्शनसंग्रह, पृ. ३८१



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

# स्मृतिशास्त्रदृष्ट्या शिक्षकचरितसमीक्षा

Gouranga Show[254]

.................................................................................................

**कूटशब्दाः-**पुरुषार्थः, स्मृतिः, आचार्यः, उपाध्यायः, गुरुः।

.................................................................................................

**शोधसारः-**
विद्या तु धर्मार्थकाममोक्षाणां पुरुषार्थानां लाभस्य अनन्य उपायः। एषा विद्या शिक्षकस्य समीपे एव लभ्यते। शिक्षा दूरीकरोति हृदयान्धकारम्। हृदये आलोकिते आत्मसचेतनता समागच्छेत्। अत एव विद्यादानेन तुल्यं नास्ति किमपि दानम्। शिक्षको हि ज्ञानाञ्जनशलाकया उन्मीलयति शिक्षार्थिनो ज्ञाननेत्रम्। शिक्ष्-धातोः परं ण्वुल्-प्रत्ययेन शिक्षक इति रूपं प्राप्यते। गॄ-धातोः परं कुप्रत्ययेन गुरु इति रूपम्। आपूर्वकात् चर्-धातोः ण्यत्-प्रत्ययेन आचार्य इति रूपम्। उपपूर्वकात् अधिपूर्वकात् इङ्-धातोः घङ्-प्रत्ययेन उपाध्याय इति रूपम्। अधिपूर्वकात् इङ्-धातोः णिच्-प्रत्ययेन ण्वुल्-प्रत्ययेन च अध्यापक इति। अत्र प्रश्नो भवेत् कः शिक्षक आचार्यो वा? वस्तुतः शिक्षां ददाति यः स एव शिक्षकः। आ जन्मनो जनो यस्मात् यस्मात् यत् किमपि शिक्षते विजानाति वा स एव तस्य शिक्षकतया मान्यः। ये तु ऋजुमतयः, विनीताः, वृद्धाः, ज्ञानिनः, अदम्भाः, निर्लोभाश्च ते हि आचार्यपदवाच्याः शिक्षकः, गुरुः, आचार्यः, उपाध्यायः, अध्यापकः, स्मृतिशास्त्रमिति

.................................................................................................

वेदः सर्वासां विद्यानां मूलभूतः। धर्मस्य मूलं वेद एव। शुक्लयजुर्वेदे – यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् इत्यनेन धर्मो रक्षति रक्षित इति मनुवचनेन च धर्मपालनार्थं धर्मरक्षणार्थं च मन्त्रा उपदिशन्ति। धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानं विद्यते। धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमित्युच्यते। धर्मशास्त्रं मुख्यतः पुरुषार्थचतुष्टयं प्रतिपादयति। तेषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्त्तकरूपेण तथा नियन्त्रकरूपेण धर्मस्य प्राधान्यं स्वीक्रियते। जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् परम्परया वा विद्यते। श्रुतिशास्त्रेण यथा वेद इति बोध्यते तथा धर्मशास्त्रेण स्मृतिशास्त्रमिति बोध्यते। अत उच्यते – 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः'। इति । येन शास्त्रेण एव वेदविहितधर्माणां स्मरणं भवति तत् शास्त्रमेव स्मृतिशास्त्रमिति। उच्यते – स्मर्यते देवधर्मोऽनेनेति स्मृतिः इति। मनुयाज्ञ्यवल्क्यादिभिः महर्षिभिः प्रणीतमिदं स्मृतिशास्त्रं समाजस्य उपकाराय एव प्रवर्त्तते। एवं स्मृतिशास्त्रकारैः तु शिक्षकचरितस्य बहूनि वैशिष्ट्यानि उल्लिखितानि।

स्मृतिशास्त्रे शिक्षकस्तु आचार्यः उपाध्यायः गुरुः इति च नाम्ना अभिधीयते। यः ब्राह्मणः शिष्यमुपनीय कल्परहस्यसहितां वेदशाखां सर्वाम् अध्यापयति स आचार्यः। ऋग्वेदस्य 'ब्राह्मणोऽस्य (वेदपुरुषस्य) मुखमासीत्' इत्यादिमन्त्रैः ज्ञायते यत् ज्ञानेन्द्रियमनोबुद्धिसमन्वितः ब्राह्मणः इत्यभिधीयमानः आसीत्। मनुस्मृतौ गीतायाञ्च ब्राह्मणस्य कर्तव्यं निर्दिश्यते। यथा –

**अध्यापनमध्ययनं यजनं याजनं तथा।**
**दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्।।**[255]
**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**
**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।**[256]**इति।**

अध्यापनम्, अध्ययनम्, यजनम्, याजनम्, दानम्, प्रतिग्रहः, शमदमशौचक्षान्तिक्षमार्जवादिगुणयुक्तत्वम्, ज्ञानविज्ञानयोः समुत्कृष्टत्वं च ब्राह्मणस्य कर्तव्यं निर्दिश्यते। एतेषां कर्मणां मध्ये अध्यापनं तु ब्राह्मणस्य प्रधानकर्तव्यम्। अतो य एव ब्राह्मणः उपनीय शिष्यं यज्ञविद्यासहितमुपनिषद्ग्रन्थमध्यापयेत् तमाचार्यं प्रचक्षते। न केवलं छात्रेभ्यो वेदस्य पाठदानं करोति स एव आचार्यः परन्तु यः छात्रान् वेदस्य अर्थं बोधयति सोऽपि आचार्यः। अभिधानकोषे उच्यते – 'विवृणोति च मन्त्रार्थानाचार्यः सोऽभिधीयते'। इति। अपि च यः उपनिषद्ग्रन्थानां ज्ञानं छात्रेभ्यो ददाति स एव आचार्यः। उक्तञ्च मनुना –

254 Guest Lecturer, Department of Sanskrit, Netaji Satabarshiki Mahavidyalaya, 24 Parganas (North), West Bengal

255 मनुस्मृतौ १.८८

256 गीतायाम् १८.४२

Since 2009
ISSN- 0976-8645
UGC RN-41039

**उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।**
**सकल्पं सरहस्यं तमाचार्यं प्रचक्षते।।[257] इति।**

आम्नातञ्च विष्णुस्मृतौ –

**यस्तूपनीयव्रतादेशं कृत्वा देवमध्यापयेत् तमाचार्यं विद्यात्।[258]इति।**

याज्ञवल्क्यसंहितायाम् –

**उपनीय ददद् वेदमाचार्यः स उदाहृतः।[259] इति।**

शङ्खसंहितायाम् –

**उपनीय गुरुः शिष्यं वेदमस्मै प्रयच्छति।[260] इति।**

वेदस्यैकदेशं मन्त्रं ब्राह्मणं च वेदरहितानि व्याकरणादीन्यङ्गानि यो वृत्त्यर्थमध्यापयति स उपाध्याय उच्यते। मन्त्रब्राह्मणयोर्वेदनामधेयमिति आपस्तम्बस्य मतानुसारेण वेदस्य भागद्वयमस्ति - मन्त्रः ब्राह्मणञ्च। मन्त्रस्य अपरं नाम संहिता इति। अतो मन्त्रब्राह्मणयोर्मध्ये यस्य कस्यापि एकस्य यः पाठदानं करोति स उपाध्याय एव। वेदानां सम्यग्रूपेण अर्थावबोधनार्थं तत्स्वराद्यवगमनार्थं तद्विनियोगज्ञानार्थं च वेदाङ्गानां महत्त्वपूर्णस्थानमस्ति। वेदाङ्गानि विना वेदानां यथार्थमभीष्टं च ज्ञानं भवितुं नार्हति। वेदमन्त्राणां सुरक्षादृष्ट्या वेदाङ्गानां ज्ञानमावश्यकमिति प्रतिभाति। मन्त्राणाम् उचितोच्चारणाय शिक्षायाः, कर्मकाण्डस्य अनुष्ठानाय कल्पस्य, शब्दानां रूपज्ञानाय व्याकरणस्य, अर्थज्ञानाय निरुक्तस्य, वैदिकच्छन्दसां परिज्ञानाय छन्दसः, एवम् अनुष्ठानोचितकालनिर्णयार्थं ज्योतिषशास्त्रस्य उपयोगो वर्तते। अत उच्यते शिक्षायाम् –

**शिक्षाकल्पव्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।[261] इति।**

एतानि वेदाङ्गानि यः छात्रान् पाठयति स एव उपाध्यायः। वस्तुतो यः छात्रान् मन्त्रब्राह्मणयोः मध्ये एकमपि, षड्वेदाङ्गानि च पाठयति स एव उपाध्यायः। उपाध्यायस्तु पाठदानेन एव जीविकार्जनं करोति। अत उच्यते मनुना -

**एकदेशं तु वेदस्य वेदाङ्गानि वा पुनः।**
**योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते।।[262] इति।**

विष्णुस्मृतावुच्यते –

**यस्त्वेनं मूल्येनाध्यापयेत् तमुपाध्यायमेकदेशं वा।[263] इति।**

शिक्षकस्तु कान् कान् छात्रान् पाठयिष्यति इति विषये विष्णुसंहितायां वर्णना अस्ति। वस्तुतो विद्यालाभे कस्य छात्रस्य अधिकारोऽस्ति अस्मिन् विषये अपि अत्र निर्देशोऽस्ति। यथा –

**नापरीक्षितं याजयेत्।।**
**नाध्यापयेत्।।**
**नोपनयेत्।।**[264] इति।
**अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति।**
**तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति।।**
**धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा।**
**तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे।।**
**विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिस्तेऽहमस्मि।**
**आसूयकायानृजवेऽयताय न मां ब्रूया वीर्यवती तथा स्याम्।।**
**यमेव विद्या शुचिमप्रयत्तं मेधाविनं ब्रह्मचर्योपपन्नम्।**
**यस्ते न द्रुह्येत् कतमश्च नाह तस्मै मां ब्रूया निधिपाय।।[265] इति।**

याज्ञवल्क्यसंहितायाम् –

**एकदेशमुपाध्याय ऋत्विग् यज्ञकृदुच्यते।[266] इति।**

शङ्खसंहितायां –

**भृतकाध्यापको यस्तु उपाध्याय स उच्यते।[267] इति।**

यः शास्त्रविध्यनुसारेण निषेकादीनि कर्माणि करोति। अपि च योऽन्नेन संवर्धयति स विप्रो गुरुरुच्यते। अतः पिता एव गुरुरिति। उच्यते मनुस्मृतौ –

[257] मनुस्मृतौ २.१४०
[258] विष्णुस्मृतौ २९.१
[259] याज्ञवल्क्यसंहितायाम् आचारोऽध्याये ३४
[260] शङ्खसंहितायाम् ३.१
[261] शिक्षायाम्
[262] मनुस्मृतौ २.१४१
[263] विष्णुस्मृतौ २९.२
[264] विष्णुस्मृतौ २९.४-६
[265] विष्णुस्मृतौ २९.७-१०
[266] याज्ञवल्क्यसंहितायाम् आचारोऽध्याये ३५
[267] शङ्खसंहितायाम् ३.१



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

**निषेकादीनि कर्माणि यः करोति यथाविधि।**
**सम्भावयति चान्नेन स विप्रो गुरुरुच्यते।।[268] इति।**

गुरुः सच्छिश्यक्षेत्रे विद्याबीजवपनं करिष्यति। शिष्यस्तु प्रत्यहं वेदाध्ययनस्य प्रारम्भे, अपि च अन्ते गुरोः पादोपसंग्रहं कुर्यात्। चतुर्वेदस्य अध्ययनद्वारा कानि फलानि लभन्ते, तानि अपि विष्णुस्मृतौ वर्णितानि। यथा-

**तस्मादनध्यायजं गुरुणा ब्रह्मलोककामेन विद्या सच्छिष्यक्षेत्रेषु वप्तव्या।**
**शिष्येण ब्रह्मारम्भावसानयोर्गुरोः पादोपसंग्रहणं कार्यम्।**
**प्रणवश्च व्याहर्तव्याः।**
**तत्र च यदृचोऽधीते तेनास्याज्येन पितृणां तृप्तिर्भवति।**
**यद्यजुंषि तेन मधुना।**
**यत्सामानि तेन पयसा।**
**यच्चाथर्वणं तेन मांसेन।**
**यत्पुराणेतिहासवेदाङ्गधर्मशास्त्राण्यधीते तेनास्यान्नेन।[269] इति।**

याज्ञवल्क्यसंहितायां –

**स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति।[270] इति।**

अपि च

**उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्।**
**वेदमध्यापयेत् एनं शौचाचारांश्च शिक्षयेत्।।[271] इति।**

शङ्खसंहितायामपि उच्यते –

**प्रयतः कल्यमुत्थाय स्नातो हुतहुताशनः।**
**कुर्वीत प्रयतो भूत्वा गुरूणामभिवादनम्।।[272] इति।**

आचार्यः पुनर्वेदज्ञो भवेत्। स माणवकस्य यां जातिं साङ्गोपनयनपूर्वकसावित्र्यनुवचनेन उत्पादयति सा जातिः सत्या अजरामरा च। "तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति"[273], "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन"[274], "सत्यं ज्ञानमनन्तं ब्रह्म"[275], "ब्रह्म वेद ब्रह्मैव भवति"[276], "तदात्मानमेवावेदहं ब्रह्मास्मीति"[277] इत्यादिश्रुतिवाक्यानुसारैः वक्तुं शक्यते यद् वेदस्य ग्रहणात् परं तथा वेदस्य अर्थावगमनेन धर्मार्थकाममोक्षरूपं पुरुषार्था लभ्यन्ते। अतो वेदज्ञानेन एव स्वर्गप्राप्तिः तथा मोक्षप्राप्तिर्भवति। मोक्षादिप्राप्तीनां कारणं तु आचार्य एव। अत आचार्यात् प्राप्तं जन्म एव श्रेष्ठम्। माणवकस्य वारद्वयं जन्म भवति, मातृजन्म तथा उपनयनसंस्काररूपजन्म। उपनयनसंस्काररूपजन्म मातृजन्मनः अपेक्षया अधिकं गुणातिशय्यात्। उपनयनद्वारा यदा जन्म भवति तदा मृत्युजरयोः भ्रान्तिज्ञानं न सम्भवति। वेदज्ञ आचार्य उपनयनसंस्कारेण यज् जन्म ददाति तज्जन्म कल्याणकारकं भवति। उत्पादकरूपपितुः वेदाध्यापकरूपपितुः च द्वयोर्मध्ये वेदाध्यापकरूपपिता श्रेष्ठः। यतो हि ब्रह्मजन्म एव इहलोके परलोके च उभयत्र स्थायि भवति। मातापितरौ कामवशात् बालकस्य उत्पादनं कुरुतः। किन्तु वेदज्ञ आचार्यः यथाविधि उपनयनपूर्वकसावित्र्यनुवचनद्वारा बालकस्य पुनः जन्मदानं करोति। एतज् जन्म सत्यम् अजरं अमरं च। उक्तञ्च मनुना –

**आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः।**
**उत्पादयति सावित्र्या सा सत्या साऽजरामरा।।[278] इति।**

आम्नातञ्च विष्णुसंहितायाम् –

**उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।**
**ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम्।।**
**कामान्माता पिता चैनं यमुत्पादयतो मिथः।**
**सम्भूर्तिं तस्य तां विद्याद् यद् योनाविह जायते।।**
**आचार्यस्य यां जार्तिं विधिवद्वेदपारगः।**
**उत्पादयति सावित्र्या सा मत्या साजरामरा।।**
**य आवृणोत्यवितथेन कर्णाविदुःखं कुर्वन्नमृतं संप्रवच्छन्।**
**तं वै मन्येत् पितरं मातरञ्च तस्मै न द्रुह्येत् कृतमस्य जानन्।।[279] इति।**

यो वेदविषये वेदाङ्गविषये शास्त्रान्तरविषये तर्कविषये तथा कलाशास्त्रविषये च शिष्यान् अल्पं बहु वा ज्ञानदानं करोति स एव गुरुरिति। अतो यः शिष्याणां

[268] मनुस्मृतौ २.१४२
[269] विष्णुस्मृतौ ३०.३१-३८
[270] याज्ञवल्क्यसंहितायाम् आचारोऽध्याये ३४
[271] याज्ञवल्क्यसंहितायाम् आचारोऽध्याये १५
[272] शङ्खसंहितायाम् ३.२
[273] वृहदारण्यकोपनिषदि ४.४.२२
[274] मुण्डकोपनिषदि १.२.१२
[275] तैत्तिरीयोपनषदि २१.१
[276] मुण्डकोपनिषदि ३.२.९
[277] वृहदारण्यकोपनिषदि १.४.१०
[278] मनुस्मृतौ २.१४८
[279] विष्णुस्मृतौ ३०.४४-४७

Since 2009
ISSN- 0976-8645
UGC RN-41039

पाठदानेन अल्पं बहुं वा उपकारं करोति स एव गुरुरिति। उच्यते मनुस्मृतौ –

**अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।**
**तमपीह गुरुं विद्याच्छ्रुतोप्रक्रियया तया।।[280] इति।**

गुरुरेव पिता इत्युच्यते। मन्त्रग्रहणं वेदोपलक्षणार्थं यो वेदमध्यापयति व्याचष्टे वा स पिता। अतो यो वेदं पाठयति अपि च वेदस्यार्थं बोधयति स एव गुरुः पिता इति। यथा मनुनोक्तम् –

**अज्ञो भवति वै बालः पिता भवति मन्त्रदः।**
**अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम्।।[281] इति।**

माणवकस्य त्रिविधं जन्म भवति। मातुः सकाशादादौ पुरुषस्य जन्म। द्वितीयं मौञ्जिबन्धने उपनयने। तृतीयं ज्योतिष्टोमादियज्ञदीक्षायां वेदश्रवणात्। यथोक्तं मनुना मनुसंहितायां –

**मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने।**
**तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात्।।[282] इति।**

एतेषु त्रिषु जन्मसु मध्ये यदेतद्ब्रह्मग्रहणार्थं जन्मोपनयनसंस्काररूपं मेखलाबन्धनोपलक्षितं तत्र माणवकस्य सावित्री माता, आचार्यश्च पिता मातृपितृसम्पाद्यत्वाज्जन्मनः। अतः पुनराचार्यः पिता एव। उच्यते मनुना मनुस्मृतौ –

**तत्र यद् ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम्।**
**तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते।।[283] इति।**

उपाध्यायः छात्राणां गृहं गत्वा तानुपदिशति किन्तु आचार्यः गुरुकुलस्य कुलपतित्वेन सर्वोच्चासनासीनो भारतीयायां संस्कृतौ चर्चितोऽस्ति। स विधिवदुपनीतानेव शिष्यानुपदिशति। यथोक्तं मनुसंहितायां –

**मुनीनां दशसहस्रं योऽन्नपानादिपोषणात्।**
**अध्यापयति पिप्रर्षिरसौ कुलपतिः स्मृतः।।[284] इति।**

प्राचीनकाले मनुष्यो बाल्यावस्थायां ज्ञानार्जनाय कस्यापि गुरोः शरणं समित्पाणिः भूत्वा गच्छति स्म। तत्रैव आश्रमे सदाचारपूर्वकमुशित्वा आश्रमस्य दैनिककार्याणि कुर्वन् गुरोः सेवां च श्रद्धया अकरोत्। भिक्षाटनं कृत्वा यानि खाद्यवस्तूनि आनयति स्म तानि सर्वाणि प्रथमं स्वगुरोः समक्षे प्रस्तौति स्म। गुरुर्यदपि अददत् तेनैव सन्तोषेण स स्वक्षुधायाः शान्तिमकरोत्। ईदृशेभ्यो योग्यविनम्यसेवाभाविशिष्येभ्य एव गुरुणा वेदवेदाङ्गानां सरहस्यं ज्ञानं दीयते स्म। यथा कश्चिन्मनुष्यः खनित्रेण भूमिं खनन् जलं प्राप्नोति एवं गुरौ स्थितां विद्यां गुरुसेवापरः शिष्यः प्राप्नोति। यथोक्तं मनुना

**यथा खनन् खनित्रेण नरो वार्यधिगच्छति।**
**तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।।[285] इति।**

गुरुणा प्रदत्तेन एकाक्षरस्यापि ज्ञानेन मानवस्य जीवनं सफलं भवति, स तस्य गुरोः ऋणी भवति। एतदस्माकं धर्मशास्त्रेष्वपि प्रतिपादितमस्ति –

**एकमप्यक्षरं यस्तु गुरुः शिष्ये न्यवेदयेत्।**
**पृथिव्यां नास्ति तद् द्रव्यं यं दत्त्वाऽनृणी भवेत्।। इति।**

यः शिष्यो जीवनस्य समाप्तिकालपर्यन्तं गुरोः सेवां करोति, यः गुरुं परिचरतु स विप्रो तत्त्वतो ब्रह्मणः सद्म रूपमविनाशि प्राप्नोति। स ब्रह्मणि लीयत इत्यर्थः। यथोक्तं मनुना –

**आसमाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम्।**
**स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम्।।[286] इति।**

मनुसंहितायां शिष्याणां बहूनि कर्तव्यानि निरूपितानि। आचार्येण प्रेरितो न प्रेरितो वा स्वयमेव प्रत्यहमध्ययने, गुरुहितेषु चोद्योगं कुर्यात्। शरीरं, वाचं, बुद्धीन्द्रियमनांसि च नियम्य प्राञ्जलिः गुरोः सुखं वीक्षमाणः तिष्ठेत्। सर्वदा गुरुसमीपे गुर्वपेक्षया त्वपकृष्टान्नवस्त्रप्रसाधनो भवेत्। गुरोश्च प्रथमं रात्रिशेषे शयानादुत्तिष्ठेत्, प्रदोषे च गुरौ सुप्ते पश्चाच्छयीत। आसनोपविष्टस्य गुरोराज्ञां ददतः स्वयमासनाद् उत्थितः, तिष्ठतः गुरोरादिशतस्तदभिमुखं कतिचित्पदानि गत्वा यथा गुरुरागच्छति तथापि

[280] मनुस्मृतौ २.१४९
[281] मनुस्मृतौ २.१५३
[282] मनुस्मृतौ २.१६९
[283] मनुस्मृतौ २.१७०
[284] मनुस्मृतौ
[285] मनुस्मृतौ २.२१८
[286] मनुस्मृतौ २.२४४



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

अभिमुखं गत्वा यदा तु गुरुर्धावन्नादिशति तदा तस्य पश्चाद्धावन्प्रतिश्रवणसंभाषे कुर्यात्। पराङ्मुखस्य वा दिशतः संमुखस्थो दुरस्थस्य गुरोः समीपमागत्य, शयानस्य गुरोः प्रणम्य प्रह्वो भूत्वा, निकटे अवतिष्ठतः गुरोरादिशतः प्रह्वीभूयैव प्रतिश्रवणसंभाषे कुर्यात्। गुरुसमीपे चास्य गुरुशय्यासनापेक्षया नीचे एव शय्यासने नित्यं स्याताम्। यत्र च देशे समासीनं गुरुं पश्यति न तत्र यथेष्टचेष्टां चरणप्रसारादिकां कुर्यात्। परोक्षमपि अस्य गुरोः केवलं नाम न उदाहरेत्। गतिभाषितचेष्टितमेव च न अनुकुर्वीत। यत्र देशे गुरोः परिवादो निन्दा वा वर्तते तत्र स्थितेन शिष्येण कर्णौ हस्तादिना पिधातव्यौ। तस्माद्वा देशान्तरं गन्तव्यम्। यानासनस्थश्च शिष्यः यानासनादवतीर्य गुरुम् अभिवादयेत्। प्रतिवाते अनुवाते च गुरुणा सह न आसीत, गुरोः असंश्रवे एव च किञ्चिदपि न कीर्त्तयेत्। बलीवर्दयाने, घोटकप्रयुक्ते याने, उष्ट्रयुक्तयाने, रथकाष्ठादौ, प्रासादोपरि, कटे, शिलायां, फलके च नौकायां गुरुणा सह न आसीत। गुरोः गुरौ सन्निहिते गुरुवद्वृत्तिं समाचरेत्। गुरुणा च अनिसृष्टस्वान् गुरून् न अभिवादयेत्। विद्यागुरुषु स्वयोनिषु अधर्मात् च प्रतिसिध्यत्सु हितञ्च उपदिशत्सु अपि नित्या एवमेव वृत्तिः। आर्येषु च गुरुपुत्रेषु गुरोः स्वबन्धुषु एव च नित्यमेव गुरुवद्वृत्तिं समाचरेत्। बालः गुरुसुतः समानजन्मा वा यज्ञकर्मणि शिष्यो वा अध्यापयन् गुरुवत् मानमहर्ति। सवर्णाः गुरुपत्न्यः गुरुवदाज्ञाकरणादिना पूज्या भवेयुः। असवर्णाः पुनः प्रत्युत्थानाभिवादनैः सम्पूज्याः। गुरुपत्न्याः अभ्यञ्जनं, स्नापनं, गात्रोत्सादनम्, केशानां प्रसाधनं च न कार्याणि।

आचार्यो वेदान्तोदितस्य ब्रह्मणः परमात्मनो मूर्तिः, पिता हिरण्यगर्भस्य, माता च धारणात् पृथिवीमूर्तिः, भ्राता च स्वः सगर्भः क्षेत्रज्ञस्य। तस्माद् देवरूपा एता नावमन्तव्याः। अतएव देवतारूपेण पूज्या उपास्या अनुसरणार्हाश्च। तथा चोक्तं मनुना मनुस्मृतौ –

**आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः।**
**माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः।।[287] इति।**

सर्वदा तयोः मातापित्रोः प्रत्यहमाचार्यस्य च प्रीतिमुत्पादयेत्। यस्मात्तेष्वेव त्रिषु प्रीतेषु सर्वं तपश्चान्द्रायणादिकं फलद्वारेण सम्यक्प्राप्यते। तेषां त्रयाणां शुश्रूषा परं तपः उच्यते तै अनभ्यनुज्ञातः अन्यं धर्मं न समाचरेत्। ते एव मातापित्राचार्याः त्रयो लोकाः लोकत्रयप्राप्तिहेतुत्वात्। ते एव ब्रह्मचर्यादिभावत्रयरूपा आश्रमाः गार्हस्थ्यपाद्याश्रयत्रयप्रदायकत्वात्। ते एव त्रयः वेदाः वेदत्रयजपफललाभोपायत्वात्। ते एव हि त्रयः अग्नयः अभिहिताः त्रेतासंपाद्ययज्ञादिफलदातृत्वात्। यथा उच्यते मनुना –

**त एव हि त्रयो लोकास्त एव त्रय आश्रमाः।**
**त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः।।[288] इति।**

गुरुरग्निरूपेणापि विभूषितो भवेत्। पितैव गार्हपत्याग्निः, माता दक्षिणाग्निः, आचार्य आहवनीयाग्निः। एतेषामग्नीनामाहवनीयस्तथा आचार्यः श्रेष्ठः। मनुनोक्तं यथा –

**पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः।**
**गुरुराहवनीयस्तु साग्नित्रेता गरीयसी।।[289] इति।**

प्राचीनाः आचार्याः स्वकीयैः लोकप्रियङ्करगुणैः, तपोभिः, त्यागैः, ज्ञाननिधिभिः शिष्याणां कल्याणस्य परमकामनाभिश्च गौरवास्पदमासन्।

य इहलोके विद्यालाभं कृत्वा तद्द्वारा जीविकार्जनं करोति, तस्य परलोके विद्या फलप्रदा न भवेत्। अपि च यो विद्याप्रवाहेण परकीययशः विनष्टं करोति तस्यापि परलोके विद्या फलप्रदाना न भवेत्। आम्नातञ्च विष्णुस्मृतौ –

**यश्च विद्यामासाद्यास्मि लोके तया जीवेन्न सा तस्य**
**परलोके फलप्रदा भवेत्।**
**यश्च विद्यया यशः परेषां हन्ति।।[290] इति।**

सम्मतिं विना अपरस्य अध्ययनश्रवणद्वारा विद्याग्रहणं नोचितम्। लौकिकं वैदिकं वा आध्यात्मिकज्ञानं यस्माल्लभते, तस्य कदापि अपकारं न कुर्यात्। उक्तञ्च विष्णुस्मृतौ –

**अननुज्ञातश्चान्यस्मादधीयानन्न विद्यामादद्यात्।**

[287] मनुस्मृतौ २.२२७
[288] मनुस्मृतौ २.२३०
[289] मनुस्मृतौ २.२३१
[290] विष्णुस्मृतौ ३०.३९-४०

**तदादानमस्य ब्रह्मस्तेयं नरकाय भवति।**
**लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा।**
**आददीत यतो ज्ञानं न तं द्रुह्येत् कदाचन।।**[291] **इति।**

यो वेदचर्चायाः निविष्टः, धर्मविषये अभिज्ञः, सद्वंशजातः, नित्यवेदाध्यायी, शरीरे मनसि च पवित्रः, स्ववेदशाखाविषये पारदर्शी, आलस्यहीनतया कर्मरतः स ब्राह्मणः आचार्यो भवेत्। उक्तश्च व्याससमृतौ –

**वेदैकनिष्टं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम्।**
**स्वशाखाज्ञमनालस्यं विप्रं कर्तारमीप्सेत्।। इति।**

यो विद्वान्, सत्कुलोद्भूतः, चरित्रवान्, तपस्यया यस्य सर्वपापकार्यं दूरीभूतं स एवाचार्यः। शौनकेनोक्तं -

**कुमारस्योपनयनं श्रुताभिजनवृत्तवान्।**
**तपसा धूतनिःशेषपाप्मा कुर्याद्विजोत्तमः।। इति।**

महर्षिहारीतस्य मते यः स्वचरत्रे न तु दृढः, स कदापि याजनकर्मणि न नियोजनीयः, तं कोऽपि गुरुरूपेण न वरयिष्यति। यथा उक्तं तेन -

**न याजयेद् वृत्तिहीनं वृणुयाच्च न तं गुरुम्। इति।**

स्मृतिकारयमस्य मते आचार्यो भवेत् सत्यवादी, धीसम्पन्नः, सर्वसत्कर्मणि कुशलः, सर्वप्राणिषु दयाशीलः, ईश्वरविश्वासी, वेदपाठे नियुक्तः, वेदस्याध्यापने रतः, चरित्रवान् जितेन्द्रियः च। उक्तश्च –

**सत्यवाग् धृतिमान् दक्षः सर्वभूतदयापरः।**
**आस्तिको वेदनिरतः शुचिराचार्य उच्यते।।**
**वेदाध्यापनसम्पन्नो वृत्तिमान् विजितेन्द्रियः।। इति।**

स्मृतिशास्त्रे शिक्षकस्तु आचार्य उपाध्यायो गुरुश्च इति नाम्ना अभिधीयते। यो ब्राह्मणः शिष्यमुपनीय कल्परहस्यसहितां वेदशाखां सर्वाम् अध्यापयति स एव आचार्यः। वेदस्य एकदेशं यः अध्यापयति स एव उपाध्यायः। यः शिष्याणां पाठदानेन अल्पं बहुं वा उपकारं करोति स एव गुरुः। अस्मिन् शास्त्रे पितुः मातुः च गुरुः श्रेष्ठः। विद्यालाभे कस्य छात्रस्य अधिकारः अस्ति अस्मिन् विषये अपि अत्र निर्देशः अस्ति। स्मृतिशास्त्रमते यः सत्यवादी, धीसम्पन्नः, सर्वसत्कर्मकुशलः सर्वप्राणिनः प्रति दयाशीलः, ईश्वरविश्वासी, वेदपाठे नियुक्तः, वेदस्य अध्यापने रतः, चरित्रवान्, जितेन्द्रियः स आचार्यो भवेत्। वस्तुतः शिक्षकः खलु ईदृशो जनो यः केन प्रकारेण व्यवहारः कर्तव्यः समाजे इति शिक्षां ददाति सर्वेभ्यो जनेभ्यः। अनेनैव गुरुः शिक्षको वा सदैव पूज्यः श्रद्धेयः च भवति। अस्माकं शास्त्रेषु गुरोः स्थानं भगवत उपरि कथितम् –

**गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।**
**गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः।।**[292] **इति**

.................................................................................

## सन्दर्भग्रन्थसूची

१.आङ्गलसंस्कृतकोशः, चतुर्थसंस्करणात्मकः, भुवनगिरि-आनन्दशर्मा-शारदा-जयगोविन्द-सम्पादितः, २००८-खृष्टाब्दे न्यु दिल्ली-स्थाने संस्कृतभारती-प्रकाशितः।

२.ऊनविंशतिसंहिता, द्वितीयसंस्करणीया, श्रीयुक्तपञ्चाननतर्करत्नसम्पादिता, १३१६-वङ्गाब्दे कलिकातायां श्रीनटवरचक्रवर्तिना प्रकाशिता।

३.गुरुतत्त्व ओ गुरुगीता, प्रथमसंस्करणात्मकः, स्वामिरघुवरानन्द-सङ्कलितः, १९७३-खृष्टाब्दे एप्रिलमासे कलिकातायाम् उद्बोधनकार्यालयप्रकाशितः।

४.मनुस्मृतिः (द्वितीयोऽध्यायः), सान्वयानुवाद-मनुभाष्य-भासिका-भावावगाहिनी-भाषाटीकोपेता, ड.श्रीमत्यूर्मिलारुस्तगिसम्पादिता, २००५-खृष्टाब्दे दिल्ल्यां जे.पी.पाब्लिशिङ्ग-हाउस-प्रकाशिता।

५.मनुसंहिता(द्वितीयोऽध्यायः) द्वितीयसंस्करणात्मिका, ड.गुरुचरणदासेन सम्पादिता, १४१८-वङ्गाब्दे

[291] विष्णुस्मृतौ ३०.४१-४३

[292] गुरुगीतायाम् २६





कलिकातायां पुस्तकाभाण्डार-प्रकाशिता।

६.शब्दकल्पद्रुमः, राजाराधाकान्तदेव-बाहादुरेण विरचितः, २००१-खृष्टाब्दे वाराणस्यां चौखम्बा-संस्कृत-सीरीज-अफिस-प्रकाशितः।

७.सुभाषितरत्नभाण्डागारम्, नारायण-राम-आचार्येण सम्पादितम्, २००३-खृष्टाब्दे वाराणस्यां चौखम्बा-संस्कृत-सीरीज-अफिस-प्रकाशितम्।

८.A New Trilingual Dictionary, Govindagopala Mukhopadhyaya, Sanskrit Book Depot.

९.The student's Sanskrit-English Dictionary, Vaman Shivram Apte, 2010, New Delhi, Rashtriya Sanskrit Sansthan.

# हिमाचलस्य पर्वतीयभाषायां प्राकृतप्रभावः

डॉ. योगेश अत्रिः[293]

.................................................................................

**कूटशब्दाः-**भारतीयाः, प्राकृतं, शौरसेनी

.................................................................................

**शोधसारः-**
भारतीयाः दैनन्दिनव्यवहारे प्रयुज्यमाणानां स्वभाषोपभाषादेशिभाषाणां प्रयोगकाले बाहुल्येन तत्समतद्भवदेशीविदेशिभाषाणां शब्दानां प्रयोगं कुर्वन्तीति लोकप्रमाणात्सिद्धम्। किन्तु भारतीयैरपि स्वप्राचीना भाषा या परम्परातः प्राप्ता साऽपि पूर्णरूपेण न परित्यक्ता। तद्भाषा संस्कृतं प्राकृतञ्च।

डॉ. कपिलदेव द्विवेदीमहोदयानुसारं मध्यकालिक्या: भारतीयार्यभाषायास्त्रयोभेदा: कर्तुं शक्यते। प्राचीनप्राकृतं पालि वा (प्रथमप्राकृतम्), मध्यकालिकप्राकृतम् (द्वितीयप्राकृतम्), परकालिकप्राकृतम् अपभ्रंश: वा। तृतीयशताब्दीईस्वीपूर्वात् प्रथमशतीं यावत् शिलालेखा:, पालिबौद्धग्रन्था:, प्राचीनजैनसूत्राणां भाषा, आरम्भिकनाटकस्य भाषा यथा अश्वघोषनाटकस्य प्राकृतम्, अवशेषोऽयं मध्यएशियायां समुपलभ्यते। इदमेव प्रथमं प्राकृतम्। प्रकृति: संस्कृतं तत्र भवं तत आगतं वा प्राकृतम्। एवं बहव: व्युत्पत्तय: सन्ति। नाटयशास्त्रकारेण भरतमुनिना प्रतिपादितं यत् संस्कृतशब्दानां विकृतरूपं परिवर्तितरूपं वा प्राकृतभाषा। तथाहि -

**'एतदेव विपर्यस्तं संस्कारगुणवर्जितम्।**
**विज्ञेयं प्राकृतं पाठ्यं नानाऽवस्थाऽन्तरात्मकम्**[294]**'।।**

### क. पालिप्रभाव:

[293] संस्कृत अध्यापकः, राजकीयमाध्यमिकविद्यालयः, जोनागे, किन्नौरः, हिमाचलप्रदेशः

[294] डॉ.कपिलदेवद्विवेदी, भाषाविज्ञान एवं भाषाशास्त्र, पृ. ४३३, विश्वविद्यालय प्रकाशन वाराणसी २००८।

Since 2009
ISSN- 0976-8645
UGC RN-41039

१.पाल्यां स्वरद्वयमागतम्। ऍ, ऑ। अयमेव पर्वतीयभाषायामपि आगतम्।

२.पाल्यां द्विवचनं नास्ति। तद्प्रभाव: पर्वतीयभाषास्वपि विद्यते[295]।

३.पाल्यां तद्भवशब्दानामाधिक्यं देशजविदेशजशब्दा: न्यूना:। अत्र तद्भवदेशजविदेशजशब्दानामाधिक्यं तत्समस्य न्यूनता वर्तते।

**पर्वतीयभाषा मध्यकालिकप्राकृतञ्च**

अस्यापरं नाम **साहित्यिकप्राकृतं** वर्तते। कालेऽस्मिन् साहित्यिकरूपे विकसिताऽभवत्। भौगोलिकभेदत्वात् अनेके प्रभेदा अभवन्। नाट्यशास्त्रकारभरतमुनिमते सप्त मुख्या: प्राकृता:, सप्त च गौणप्राकृता:[296]। वररुचिमते प्राकृतं चतुर्द्धा। महाराष्ट्री, मागधी, पैशाची, शौरसेनीति भेदेन[297]। मागधी द्विधा। मागधी, अर्धमागधी च। एवं प्राकृतं पञ्चधा।

**शौरसेनीप्रभाव:**

शूरसेनदेशोद्भवै: पुरुषै: परस्परं व्यवह्रियमाणा शूरसेनानां भाषा शौरसेनीति कथितम्। पञ्चसु प्राकृतेषु पैशाची मागधी च शौरसेनीविकृति:, प्रकृति: शौरसेनीत्युभयत्र दर्शनात् ज्ञायते। शौरसेनी संस्कृतविकृति: प्राकृतवत्। पालिभाषाया: स्थानीयरूपात् शौरसेनीप्राकृता विकसिताऽभूत्। तस्य कालस्य व्याकरणसाहित्याधारेभ्य: भाषेयं परिनिष्ठितभाषा स्वीकृता आसीत्। यथा भासकालिदासराजशेखरादिकवीनां गद्यभाग: शौसेनीप्राकृते। अत्र सरलता, सरसता, श्रवणोच्चारणं सुखदम् एतदर्थं लोकप्रियतां प्राप्तवती। मैक्समूलरानुसारं महाराष्ट्री पद्याय, शौरसेनी च गद्याय प्रयुज्यते। अस्या: वैशिष्ट्यमित्थम् -

१.शौरसेन्यां यस्य जकारोच्चारणं भवति। प्रवृत्तिरियं पर्वतीयभाषायामपि प्राप्यते। यथा यम:<जम,जौं। यात्रा<जातरा। यजमान:< जजमान। संयोग:<संजोग। सूर्य:< सूरज,सूर्ज।

२.**शषो: स:**[298] इति नियमेन शकारषकारयो: सकारो भवति। शिमलासिरमौरौ परित्यज्य सोलनजनपदस्य धुन्दनक्षेत्रात् अग्रे बिलासपुरे अयं ध्वनि: श्रूयते। शनि:<सनि। शोक: < सोग। कुशा< कुसा। ऋषि: <ऋसि। मूषक:< मूसा। दोष:/षी <दोस/सी। विषम्< बिस। नख: नस।

३.**अनादावयुजोस्तथयोर्दधौ**[299] इति सूत्रेण अनादौ वर्तमानयोरसंयुक्तयो: तस्य दकार:, थस्य धकारो भवति। प्रभावोऽयं त्रिषु जनपदेषु दृष्टिगोचरी भवति। यथा लिखति<लिखदा। खेलति <खेलदा। हसति <हसदा। दन्त: <दान्द। सक्रान्ति: <संक्रान्द।

४.**नोण:सर्वत्र**[300] इत्यनेन सर्वत्र णकार: नस्य स्थाने। जानाति <जाणदा। लिखनम्< लिखणा। दर्शनम्< देखणा। दानम्< दाण। चालनी< चालणु/णो। पानीयम्< पाणि/णी। रानी< राणी। नियमोऽयं त्रयाणां जनपदानां सर्वेषु संस्कृतमूलकशब्देषु न व्यवहरति। अपवाद: पैशाच्यां दीयते।

५.क्षकारं क्खरूपे परिवर्तनं जायते। कुक्षि: < कुक्ख। अक्षि< आक्ख/खी। मक्षिका< माक्खी।

६.पबवकाराणां लोप: कुत्रचित्। यथा पवनम्<पौण। रावण:<रौण। दिवस:<दौस। भवति< ओन्दि/दा।

[295]द्रष्टव्य: डॉ.कपिलदेवद्विवेदी, भाषाविज्ञान एवं भाषाशास्त्र, विश्वविद्यालय प्रकाशन वाराणसी २००८।

[296]प्राकृत प्रकाश:, श्री वररुचि,प्राकृतभाषाभेद:।मागध्यवन्तिजा प्राच्या शूरसेन्यर्द्धमागधी।बाह्लीकादाक्षिणात्या च सप्त भाषा: प्रकीर्तिता:।। शबराभीरचण्डालसचरद्रविडोद्रजा:।हीना वनेचराणां च विभाषा नाटके स्मृता:।।

[297]प्राकृत प्रकाश:,श्री वररुचि,प्रस्तावना। डॉ.कपिलदेवद्विवेदी, भाषाविज्ञान एवं भाषाशास्त्र, पृ. ४३४।

[298]प्राकृत प्रकाश:, श्री वररुचि,२.४३, पृ. ४५।

[299]प्राकृत प्रकाश:, श्री वररुचि,१२.३, पृ. २३९।

[300]प्राकृत प्रकाश:, श्री वररुचि,२.४२, पृ. ४४।




Since 2009
ISSN- 0976-8645
UGC RN-41039

७.**अत ओत् सो:**[301] अकारान्तप्रातिपदिकात् परस्य प्रथमैकवचनस्य सुप्रत्ययस्य ओकारादेशो भवति। एषा प्रवृत्ति: सोलनजनपदे नैव केवलं शिमलासिरमौरयो: श्रूयते। यथा करणम्< कौरनो। लिखनम्< लिखणो। बुक्कनम्< बुक्कणो। जिमनम्< जिमणो। तारा<तारो। पूर्व<पूरबो। पश्चिम:<पश्चमो,पच्छमो। तनु:<तन/नो। जटा<ज़ौटो।

८.**सन्ध्या** इति शब्दस्य ध्यस्थाने झकारादेशो भवति। संझा।

प्राकृतप्रकाशस्य द्वादशपरिच्छेदान्तमवलोक्य **शेषं महाराष्ट्रीवत्** इति नियमेनाऽन्यानि उदाहरणान्यपि पर्वतीयभाषासु दरीदृश्यन्ते।

९.चतुर्दशी<चोद्दश/शी,चौद्दश/शी। चतुर्थी<चोत्थ, चौत्थ/थी। **चतुर्थीचतुर्दश्योस्तुना**[302] इति प्राकृतसूत्रेण चतुर्थीचतुदशी इत्येतयो: तुना सह आदेरत ओत्वं भवति वा।

१०.दोला <डोळा। दण्ड: <डण्डा। **दोलादण्डदशनेषु ड:**[303] इत्यनेन आदेर्वर्णस्य डकारो भवति।

११.मयूर: <मोर/रो। **मयूरमयूखयोर्य्वा वा**[304] इति मयूर इत्यस्य यूशब्देन सहादेरत ओत्वं वा भवति।

१२.पानीयम्< पाणि/णी। शब्देऽस्मिन्नकारस्य ईकारं इकारो भवति **इदीत: पानीयादिषु**[305] इत्यनेन। यलोप:, नस्य णकार:। एवम् आनीतम् <आणि/णी/णा।

१३.मुष्टि:<मुट्ठि/ट्ठी। **ष्टस्य ठ:**[306] इत्यनेन ष्ट इत्येतस्य स्थाने ठकारो भवति। **शेषादेशयोर्द्वित्वं॰**[307] इति ठस्य द्वित्वम्, **वर्गेषु युज: पूर्व:**[308] इत्यनेन पूर्वठस्य टकार:।

१४.गर्त:<गड्डा/ड्डो। गर्तशब्दे र्तस्य डकारो भवति **गर्ते ड:**[309]। **शेषादेशयो:**[310] इति द्वित्वम्। सोलनजनपदं विहाय **अत ओत्सो:**[311] इति ओत्वम्।

१५.स्तम्भ: <खम्बा/बो,खम्भो। **स्तम्भे ख:**[312] इत्यनेन स्तकारस्य खकारो भवति।

१६.यष्टि: <लट्ठि,लाट्ठी। अत्र यस्य लकारो भवति **यष्ट्यां ल:**[313]इति सूत्रेण।

१७.मृत: <मुआ/ओ। **उदृत्वादिषु**[314] इत्यनेन आदेर्ऋत उकार: स्यात्। पर्वतीये शब्दोऽयमपशब्दरुपेण प्रयुज्यते।

१८.मूल्यम्<मोल। **मूल्यताम्बूलयोस्त्वोत्त्वम्** इत्यनेन ओत्त्वम्। यलोप:।

**पैशाचीप्रभाव:**

अस्य क्षेत्रं पश्चिमोत्तरभारतम् अफगानिस्तानञ्च वर्तते। पिशाचानां जातिविशेषाणां परस्परं व्यवह्रियमाणा भाषा पैशाचीति निगद्यते। अस्या: प्रकृति: शौरसेनी। श्रीपुरूषोत्तमदेवमहोदयानुसारं भाषेयं संस्कृतशौरसेन्यो: विकृति: मन्यते। हार्नेलानुसारमियं द्रविड़ाभाषा। मैक्समूलरानुसारेण पैशाचीभाषा एव नास्ति, अपितु बर्बरजातीनामशुद्धोच्चारणं, प्राकृतस्य एव अपभ्रष्टस्वरूपमिदम्। अस्या: भाषाया: सर्वोत्तमं रूपं महाकविगुणाढ्यस्य वृहत्कथा। अस्या: विकसितं रूपं लहँदा। अस्या: वैशिष्टयानि निम्नाङ्कितानि -

१.लस्योच्चारणंळकाररूपे तथैवाऽत्रापि लभ्यते। देहली<देउळ,दे/दयोळ। अर्गलिका<आगळ,आगोळ। पिप्पल:<पिप्पळ,पीपोळ,पीपळ। काल:<काळ। जंगलम् <जंगळ,ज़ांगळ। फाल:<फाळ/ळा/ळी। तालु:<ताळु।

[301]प्राकृत प्रकाश:, श्री वररुचि,५.१, पृ.१०७।

[302]प्राकृत प्रकाश:, श्री वररुचि,१.९, पृ.७।

[303]प्राकृत प्रकाश:, श्री वररुचि,२.३५, पृ.४२।

[304]प्राकृत प्रकाश:, श्री वररुचि,१.८, पृ. ६।

[305]प्राकृत प्रकाश:, श्री वररुचि,१.१८, पृ. १४।

[306]प्राकृत प्रकाश:, श्री वररुचि,३.१०, पृ. ५२।

[307]प्राकृत प्रकाश:, श्री वररुचि,३.५०, पृ. ६९।

[308]प्राकृत प्रकाश:, श्री वररुचि,३.५१,पृ.७१।

[309]प्राकृत प्रकाश:, श्री वररुचि,३.२५, पृ.५८।

[310]प्राकृत प्रकाश:, श्री वररुचि,३.५०, पृ.६९।

[311]प्राकृत प्रकाश:, श्री वररुचि,५.१, पृ.१०७।

[312]प्राकृत प्रकाश:, श्री वररुचि,३.१४, पृ.५४।

[313]प्राकृत प्रकाश:, श्री वररुचि, २,३२, पृ. ४१।

[314]प्राकृत प्रकाश:, श्री वररुचि, १.२९, पृ. २०।

Since 2009
ISSN- 0976-8645
UGC RN-41039

छलम्<छळ,छोळ। कुलम्<कुळ। पतालम्<प/पाताळ। प्रभावोऽयं त्रिषु जनपदेषु अवलोकयितुं शक्यते। किन्तु कुम्हारसेनपक्षे ड़रूपे श्रूयते। यथा पिप्पल:<पिप्पड़। स्थाली<थाड़ी। कदली<केड़ा। उलूक:<उड्डु। उलूखलम्< ऊखड़। मङ्गलसूत्रम्< माङ्गड़सूतर। मङ्गलवासर: <मुङ्गड़ प्रभृतयः।

३.**णो न:** [315] इति नियमेन णस्य नकारो भवति। प्रवृत्तिरेषा त्रिषु जनपदेषु प्राप्यते। यथा करणम्<कौरना/नो,करना। पण्डित:<पन्डत।लेखनम् <लिखणा।मेलनम् <मिलणा। आणकः <आना/ने/नी। पुण्यम् < पुन प्रभृतयः।

४.यत्र संयुक्ताक्षराणां बाहुल्यं विद्यते, तत्र संयुक्ताक्षरात् पूर्वं ह्रस्वस्वरं दीर्घो भवति। एवं पैशाच्यां न लभ्यते। पर्वतीये तु लभ्यते। यथा सप्त <सात।अष्ट< आठ।

५.**शषो स:** [316] इति विधिना शकारषकारयो: सरूपे परिवर्तते। विषम <विसमो, कुत्रचित् मूर्धन्यषस्य शकारोऽपि जायते। तिष्ठति< चिश्तदि। शस्थाने सकारस्य प्रवृत्तिरेषा शिमलासिरमौरौ परित्यज्य सोलनजनपदस्य धुन्दनक्षेत्रात् अग्रे बिलासपुरे अयं ध्वनि: श्रूयते।

६.पैशाच्या: बह्वीषु उपभाषासु मूर्धन्यदन्त्यस्पर्शव्यञ्जनेषु स्पष्टता नास्ति। लिखितसाहित्येषु विविधलेखका: एकमेव शब्दं क्वचित् दन्त्ये कुत्रचित् मूर्धन्ये लिखन्ति[317]।

७.दरदपैशाच्यां सघोषमहाप्राणा: (घ्,झ्,ढ्,ध्,भ्) न सन्ति [318] । किन्तु हेमचन्द्राचार्य: चूलिकापैशाच्यां घझढादिवर्णानामुल्लेखो कृतोऽस्ति।

८.पैशाच्यां यस्य जकारोच्चारणं न भवति। यथा यदि< यति। अत्र पर्वतीये तथा नास्ति।

अनेन संक्षिप्ताध्ययनेन वक्तुं शक्यते यत् वर्तमानकालेऽपि हिमाचलपर्वतीयभाषासु प्राकृतभाषाया: प्रभावोऽस्ति।

### (ग) पर्वतीयभाषा तृतीयप्राकृतम् अपभ्रंशश्च

प्रथमद्वितीयप्राकृताद्भिन्ना या भाषा सैवाऽपभ्रंशा। पञ्चेभ्य: प्राकृतेभ्य: पञ्चानामपभ्रंशानां विकासोऽभवत्। अनेनाऽपि आधुनिकभारतीयार्यभाषा: विकसिता: अभवन्। अपभ्रंशस्य प्रथम: प्रयोग आचार्यव्याडिना कृतम्। ततश्च भगवता पतञ्जलिनाऽपि निगदितम्। '**एकैकस्य शब्दस्य बहवोऽपभ्रंशा:। तद्यथा गौरित्यस्य शब्दस्य गावी, गोणी, गोता, गोपोतलिकेत्येवमादयोऽपभ्रंशा:**'[319]। अनेन ज्ञातं भवति यत्संस्कृतस्य विकृति अपभ्रंश:। चण्ड: प्रथम: वैयाकरणज्ञ आसीत्। येन भाषारूपेऽपभ्रंशस्य प्रयोग: विहित: परन्तु सर्वप्रथम: हेमचन्द्र एवाऽपभ्रंशं व्याकरणनियमेषु परिवर्तनं कृतमासीत्। हेमचन्द्रानुसारमेव प्राकृतमितिरिच्य एकाऽन्या भाषाऽपि आसीत्। तामेवाऽपभ्रंशं निगद्यते। निम्ना अपभ्रंशा: उट्टिङ्कता:। आभीरी, बाहलिका, पञ्जाबी, शौरसेनी, पश्चिमीहिन्दी मागधी, पूर्वी हिन्दी, औड्री, गौडी, दाक्षिणात्या, पैप्पाली। अस्यां सूच्यां शौरसेन्या: नाम आगतम्। अनेन सुस्पष्टं भवति यत् व्यावहारिकप्राकृस्य उच्चार्यमाणासु भाषासु एव परिवर्तनमागते सति स एवाऽपभ्रंश: कथितोऽस्ति। हेमचन्द्रस्य समय: द्वादशशतीईस्वी स्वीक्रियते विद्वद्भि:। प्राय: तत्पर्यन्तं प्राकृतभाषाया: मृता स्थितिः अथवा भवति स्म। तेन गुजरातराजस्थानयो: मुख्या भाषा आभीरी व्याकरणस्य मानकोऽङ्गी कृत:। भाषेयमपभ्रंशा आसीत्। प्राकृतसर्वस्वे त्रय अपभ्रंशा उक्ता: सन्ति। नागर:, उपनागर:, ब्राचड:। नागर: गुजरातस्य, ब्राचड: सिन्धस्य, उपनागर: द्वयो: मध्ये मन्तव्याऽस्ति। अनेन सुस्पष्टं यत् पश्चिमप्राकृतस्यैव इदं विभाजनं वर्तते। प्रथमद्वितीयप्राकृताद्भिन्ना

[315]प्राकृत प्रकाश:, श्री वररुचि, १०.५, पृ. २२६।
[316]प्राकृत प्रकाश:, श्री वररुचि,२.४३, पृ. ४५।
[317] Linguistic Survey of India. Page- १८.
[318] Linguistic Survey of India. Page- १७.
[319]पतञजलि,महाभाष्यम्, प्रथमाह्निकम्।



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

भाषाऽपभ्रंशाऽस्ति। नागरापभ्रंशे सर्वाधिका साहित्यिकरचनाऽभवत्। अपभ्रंशभाषाभ्य: एवाधुनिकभारतीयार्यभाषाणामुद्भव अभूत्। अस्या: वैशिष्ट्यानि निम्नाङ्किंतानि -

१.भाषा श्लिष्टयोगात्मकात् वियोगात्मिकाऽभवत्।

२.संयुक्ताक्षरेषु रकारस्य लोपोऽभवत्। अत्रापि दृश्यतेऽयं प्रभावः। चन्द्र: <चान्द। दात्रिका<दाचि/ची, दौहित्र:/त्री<दोइता/ती,दयोता।

३.प्राकृतस्यापेक्षाऽपभ्रंशे समीकरणं, लोप, आगमादिनां प्रवृत्ति: वर्द्धिता।

४.नपुंसकलिङ्गं समाप्तम्।

५.अपभ्रंशे शब्दानामन्ते उकारप्रवृत्ति: वर्द्धिता। गीतु३, श्यामु३।

६.द्राविडविदेशिभाषाभ्य: बहव: शब्दा आगता: सन्ति।

७.वाक्येषु पदक्रमनिश्चितोऽभवत्। अनेन विभक्तिलोपेनोत्पन्नाऽस्पष्टता न्यूनताऽभवत्। परञ्च पर्वतीयभाषायां पदक्रमनिश्चित◌: नाऽभवत्। अपितु विभक्तिलोपेनोत्पन्नाऽस्पष्टता न्यूनता तु अभवत्।

८.ये स्वरा: प्राकृते लुप्ता:, तेऽपभ्रंशेऽपि यथा ऋ,ॠ,लृ, लृ (दीर्घ:) इत्येता:, किन्तु पर्वतीये तु ऋस्वरस्य श्रवणं जायतेऽन्यस्य न। यथा ऋषि <ऋषि। ऋतु: < ऋतु प्रभृतयः।

९.शषयो: स्थाने प्राय: सकारस्य श्रवणं भवति। एवं पर्वतीये सर्वत्र न श्रूयते।

१0.मूर्धन्यध्वनीनां प्रयोग: बाहुल्येनाऽभवत्। डध्वनि: ड़काररूपे लब्ध:। अयं पर्वतीये श्रूयते।

११.प्राकृते सहायकक्रियाणां प्रयोग आरम्भोऽभवत्। अपभ्रंशेऽयं प्रयोग: वर्द्धित:। भाषा क्रियाविषयत्वात् नामविषयकं प्रति आगच्छन् अस्ति। क्रिया: न्यूना:, संज्ञाशब्दा अधिकप्रयुक्ता अभवन्। संज्ञाशब्दै: साकं सहायकक्रियां सम्मिल्य मूलक्रियाणां ह्रासोऽभवत्।

कापि भाषा स्यात्तस्या अकस्मात् प्रकटनं न जायते। तत्र समय अपेक्षित: भवति। अद्यापि प्रथमद्वितीयतृतीयप्राकृतस्य प्रभाव: पर्वतीयभाषास◌ु अवलोक्यते।

.............................................................................................

## सन्दर्भग्रन्थसूची

1. ऋग्वेद संहिता, आर्य साहित्य मण्डल लि0, अजमेर, 1952
2. The Nighantu and Nirukta, L. Sarup, Motilal Banarsidass, 1967
3. शतपथब्राह्मण, Julius Eggeling, Motilal Banarsidass, Delhi, 1978
4. उपनिषद्संग्रह, सं0-प्रो0 जे0 एल0 शास्त्री, मोतीलाल बनारसीदास, दिल्ली, 1984
5. अष्टाध्यायी, महर्षि पाणिनि, वैदिक पुस्तकालय, अजमेर
6. मनुस्मृति (हिन्दी टीका सहित), भार्गव पुस्तकालय, बनारस
7. Devi-Bhagavata Purana, Manasukharaya Mor, Calcutta, 1960

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

# लोपशास्त्रविधौ 'अतो लोपः' इति सूत्रस्य समीक्षात्मकमध्ययनम्

सैकतचौधुरी[320]

**कूटशब्दाः-** सूत्रम्,लोपविधिः,अतो लोपः, आर्द्धधातुकोपदेशः,

**शोधसारः-**

शब्दानुशासनं नाम व्याकरणम्, यत्र साधुशब्दानाम् असाधुशब्दानां च वैधानिकी विचारधारा प्रवर्त्तते। शब्दानुशासने व्याकरणे वा प्रतिपादितायामेतस्यां विचारधारायां यत् अलौकिकम् अनन्यम् अनुपमम् उपायं साधयति, स्वल्पीयसा आयासेन अल्पीयसा कालेन च याथार्थ्यं प्रतिपादयति। व्याकरणपरिभाषायां तत् 'सुत्रम्' इति पदेनाभिधीयते । तदेव तात्पर्यमुरोरीकृत्य अष्टाध्याय्यां प्रायतः चतुःसहस्रसूत्राण्युपविर्णतानि विद्यन्ते।'सूत्रम्' इति पदस्योपादनं सर्वथा लध्वर्थं हि उद्देश्यम्। एतस्मिन् विधौ पदानां प्रयोगार्हभूतानां च कृते एकं संघटनं सजातीयतामादाय संस्थाप्यते। तत्र प्रयोगविज्ञाने स्वरूपं विचार्य समानतायां क्रियायाः अवलम्बनं विधीयते। शब्दस्य मूलप्रकृतौ कस्मिन् भागे विकाशः विकारः लोपः विश्लेषणं वा अवधार्यते तत् विचार्य सम्पंद्यमानायां क्रियायां समानता अवलम्ब्यते। एवं च किमात्मकं कार्यं तस्य स्वरूपं वा इति विचारपुरःसरं कार्यविधानं साधनं वा निरूप्यते उपदिश्यते च। इदं तत्र अवधेयं यत् समानरूपस्य क्रियमाणस्य कार्यस्य कृते यत्र व्यतिक्रमः लक्ष्यते तदेवोपस्थाप्यते। किमात्मकस्य व्यतिक्रमः, तदपि अवधार्यते। विविधानि कौशलविशेषान्याविष्कृत्य कार्ये कुत्र निषेधः, कुत्र विकल्पः, कुत्र वा उभयविधः, कुत्र लोप इत्यादिकं सर्वं निर्दिश्यते। तेषु कौशलविशेषेषु लोपविधिः पदसाधुत्वोपपत्तये प्रक्रियाकार्यनिर्वाहणार्थं वा उद्दिष्टो जायते। अष्टाध्याय्यां लोपकार्यनिर्वाहणार्थं प्रायतः सप्तत्रिंशत्युत्तरैकशतं सूत्राणि निर्दिष्टानि विद्यन्ते। कुत्रचित् प्रकृतिलोपः, कुत्रचित् प्रत्ययलोपः, वर्णलोपः कुत्रचिच्च अनुबन्धलोपः इत्येवं भावेन लोपसूत्राणां प्रवृत्तिस्थलं निरूप्यते। तेषु सूत्रेषु 'अतो लोपः' (पा.सु.-६/४/४८) इति सूत्रमवलम्ब्यात्र प्रतिपादनं विधीयते। सूत्रस्यास्य पर्य्यालोचनायां पतञ्जलि-भट्टोजिदीक्षित-कात्यायन-नागेश-कैयट-काशिकाकार-न्यासकारादीनां शास्त्रकाराणां मतोल्लेखपुरःसरमेकं समीक्षणमत्र प्रस्तूयते।

संस्कृतवाङ्मयस्य सूत्रप्रथितेषु ग्रन्थेषु पाणिनेः अष्टाध्यायीग्रन्थ अनन्यं स्थानमावहति। तत्र शब्दानां साधुत्वविवेचनार्थं वैज्ञानिकेन उपायेन आविष्कृतेषु कौशलविशेषेषु लोपविधिः अन्यतमः। यद्यपि पदसाधुत्वोपपत्तये प्रक्रियाकार्यनिर्वाहणार्थं वा लोपविधेः प्रयोगः वैदिककालादेव दरीदृश्यते, तथापि प्रयोगार्हभूतस्य पदस्य शास्त्रीयप्रक्रियासाधने अस्य लोपविधेः विशेषविधानम् अष्टाध्याय्याम् प्रथमतया परिलक्ष्यते। अष्टाध्याय्यां लोपकार्यनिर्वाहणार्थं प्रायतः सप्तत्रिंशत्युत्तरैकशतं सूत्राणि निर्दिष्टानि विद्यन्ते। कुत्रचित् प्रकृतिलोपः, कुत्रचित् प्रत्ययलोपः, वर्णलोपः कुत्रचिच्च अनुबन्धलोपः इत्येवं भावेन लोपसूत्राणां प्रवृत्तिस्थलं निरूप्यते। तेषु सूत्रेषु 'अतो लोपः' (पा.सु.-६/४/४८) इति सूत्रमन्यतमम्।

अतः सूत्रस्यास्य समीक्षणे पतञ्जलि-भट्टोजिदीक्षित-कात्यायन-नागेश-कैयट-काशिकाकार-न्यासकारादीनां शास्त्रकाराणां मतानि उल्लिख्य तद्विषये विचारः यथामति अत्र प्रतिपाद्यते।

विचारः -

'अतो लोपः' (पा.सु.-६/४/४८) इत्यस्मिन् सूत्रे पदद्वयं विद्यते। 'अतः" इति षष्ठ्यन्तं पदं,'लोपः" इति प्रथमान्तं पदम्। सूत्रे आर्धधातुके, अङ्गस्य इति पदद्वयमनुवर्तते। अकारान्तस्याङ्गस्य आर्धधातुके परतो लोपो भवतीति

[320] शोधच्छात्रः, संस्कृतविभागः, राञ्चीविश्वविद्यालयः



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

सूत्रस्यास्यार्थः। उदाहरणं यथा – चिकीर्षिता, चिकीर्षितुम्, चिकीर्षितव्यम्, धिनोति, कृणोति इत्यादि।

भट्टोजिदीक्षितेन सूत्रस्यास्य वृत्तौ उक्तं यत् आर्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोपः स्यादार्धधातुके परे। गोपायांचकार। गोपायांबभूव।

बालमनोरमाकारेण वासुदेवदीक्षितेन सूत्रस्यास्य व्याख्यानं विधाय आर्द्धधातुकोपदेश इति पदस्य प्रयोजनं चिकीर्षितम् इत्यत्र अल्लोपस्य साधनार्थं प्रतिपादितम्। तथैव आर्द्धधातुको ग्रहणस्य प्रयोजनं उदाहरणानां सूत्रानुसारी-व्याख्यानम् इत्येवंभावेन सविस्तरं स्वकीयं व्याख्यानं प्रतिपादितम् । यथोक्तं तत्र– 'अतो लोपः"। 'अनुदात्तोपदेशवनती' (पा.सु.-६/४/३७)त्यत उपदेशग्रहणमनुवर्तते। आर्द्धधातुक इत्यधिकृतम्। तदिह आवर्तते। एकमुपदेशे अन्वेति। द्वितीयं तु लोपे परनिमित्वम्। तदाह– आर्द्धधातुकोपदेश इत्यादिना। आर्द्धधातुकोपदेश इति किम्?। अय पय गतौ, आभ्यां क्विपि,'लोपो व्योर्वलि" (पा.सु.-६/१/६६) इति लोपे , 'ह्रस्वस्य पिति किति तुक्' (पा.सु.-६/१/७१) इति तुकि, अपृक्तलोपे अत् पत् इतीष्यते। अत्र यलोपे सति अतोलोपो न भवति, आर्द्धधातुकोपदेश काले धातोर्यकारान्तत्वात्। 'आर्द्धधातुकोपदेश'इत्यत्र आर्द्धधातुकग्रहणाऽभावे 'चिकीर्षित'मित्यत्र अल्लोपोन स्यात्, सन् उपदेशकाले नकारान्तत्वात्। आर्द्धधातुकग्रहणे तु न दोषः, अनुबन्धविनिर्मुक्तात्सन्प्रत्ययादेव क्त प्रत्ययस्य आर्द्धधातुकस्योत्पत्तेः। आर्द्धधातुके पर इति किम्?कथयति। चुरादावदन्तोऽयम्।

अत्र उपधावृद्धिर्नभवति,'अचः परस्मिन्' (पा.सु.-१/१/५७) इत्यल्लोपस्य स्थानिवत्त्वात्। आर्द्धधातुके परे इत्यनुक्तौ त्ाु अल्लोपस्य परनिमित्वकत्वाऽभावात्स्थानिवत्त्वं न स्यात्। तथा च प्रकृते 'गोपाय+आमि'ति स्थिते अतो लोपे गोपायामिति सिध्यति। यद्यपि सवर्णदीर्घेणाप्येतत्सिद्धं,तथापि न्याय्यत्वादतो लोप उपन्यस्तः। आयप्रत्ययाऽभावपक्षे आह-जुगोपेति। पित्त्वे न कित्त्वाऽभावाल्लघूपधगुणः। जुगुपतुरिति। कित्त्वान्नगुणः। ऊदित्त्वाद्वेडिति।'थलादा'वितिशेषः। जुगुपिव-जुगुप्व। जुगुपिम-जुगुप्म। क्रादिनियमस्तु नञ्प्राप्तस्यैवाऽभावस्य, न तु विभाषादि लभ्यस्येति षिघूशास्त्र इत्यत्रोक्तम्। गोपायितेति। लुटि आयप्रत्ययपक्षे नित्यमिट्। आयप्रत्ययाऽभावपक्षे इड् विकल्पः। ऊदित्त्वस्य केवले चरितार्थत्वात्। तदाह-गोपितागोप्तेति। गोपायिष्यति गोपिष्यति गोप्स्यति। गोपायतु। अगोपायत्। गोपायेत्। आशीर्लिङि आयप्रत्ययपक्षे अतो लोपे रूपमाह-गोपाय्यादिति। आयप्रत्ययाऽभावे आह-गुप्यादिति। लुङि सिचि आयप्रत्ययपक्षे आह-अगोपायीदिति। आयत्त्ययाऽभावपक्षे इटि रूपमाह-अगोपीदिति। 'इट ईटि' (पा.सु.-८/२२/८) इति सिज्लोपः। 'नेटी' ति (पा.सु.-७/२/४)हलन्तलक्षवृद्धेर्निषेधः। इडभावे तु इटः परत्वाऽभावान्नसिज्लोप इत्याह-अगौप्सीदिति। 'वदव्रजे'ति वृद्धिः। अगोपायिष्यत् अगोपिष्यत् अगोप्स्यत्। धूपसंताप इति। 'गूपूधूपे'त्यायः। आर्द्धधातुकेतद्विकल्पः। षप समवाय इति। षोपदेशोऽयम्। चुप मन्दायामिति। चवर्ग प्रथमादिरयम्। चवर्ग द्वितीयादिस्त्वनिट्कः। तुपतुम्पेति। अष्टावप्युदुपधाः,तृतीयचतुर्थौ सप्तमाष्टमौ च रेफवन्त इति मूले स्पष्टीभविष्यति। 'तुमुम्पतु'रित्यत्र नलोपमाशङ्क्याह-संयोगादिति। आर्शीलिङि विशेषमाह-किदाशिषीति। प्रात्तुम्पताविति। श्तिपा निर्देशोऽयम्। प्रात्-प्रेत्युपसर्गात्-तुम्पधातौ परेसुट् स्त्यावि कर्तरि सतीत्यर्थः। तुपधातोः सुट् आद्यवयवः। सुड्विधावस्मिन्तुम्पतावितिश्तिपा निर्देशस्य प्रयोजनमाह-यङ्लुकिनेति। 'शपाऽनुबन्धे'त्युक्तेरिति भावः। षृभुषृम्भु इति। ऋदुपधौषोपदेशौ। सृभ्यादिति। आशीर्लिङि अनिदित्त्वान्नलोपः। षिभुषिम्भु इत्येक इति। आद्यइदुपधो, द्वितीयो मोपधः। शुभशुम्भेति। द्वितीयस्य आर्शाrलिङि अनिदित्त्वान्नलोपः। इति 'गुपू'इत्यादयः पवर्गीयान्ताः परस्मैपदिनोगताः। कम्यन्ता इति। 'कमु कान्तौ'इत्येतत्पर्यन्ता इत्यर्थः। घुणघूर्णेति। द्वितीयस्य

दीर्घपाठ: स्पष्टार्थ:, 'उपधायां च' (पा.सु.-८/२७/८)इत्येव दीर्घसिद्धे:। केचित्तुघुणेतिह्रस्वमेवपठन्ति। स्तुतावित्येवेति। न तु व्यवहार इत्येवकारार्थ:। पृथङ्िगर्देशादिति। अन्यथा 'पणपन व्यवहारे स्तुतौ चे'त्येव निर्दिशेदितिभाव:। यद्यपि पृथङ्िनर्देशो यथासङ्ख्यनिवृत्त्यर्थ इत्यपि वक्तुं शक्यं, तथापि संप्रदायानुरोधादेवमुक्तम्। पनिसाहचर्यादिति। पनधातु: स्तुतावेव वर्तते, तत्साहचर्या◌ुपूधूपविच्छेत्यत्र पणधातुरपिस्तुत्यर्थक एव गृह्यते, न तु व्यवहारार्थक:। अत: स्तुतार्वव पणधातोरायप्रत्ययो न तु व्यवहारे इत्यर्थ:। क्रेतव्यद्रव्यस्य मूल्यनिर्धारणाय प्रश्नप्रतिवचनात्मको व्यवहार:। ननुस्तुतौ पणयतीति रूपं वक्ष्यमानमनुपपन्नं, पणधातोरनुदात्तेत्त्वेनात्मनेपदापत्ते:। न च आयप्रत्ययान्तस्यानुदात्तेत्त्वं नेति शङ्क्यं, पणधातौ श्रुतस्यानुदात्तेत्त्वस्य 'आनर्थक्यात्तदङ्ग'न्यायेन आयप्रत्ययान्तेऽन्वयोपपत्तेरित्यत आह-स्तुनाविति। अनुबन्धस्य अनुदात्तात्मकस्य इत:,-य आर्द्धधातुकविषये कदाचिदायप्रत्ययविनिर्मुक्ते चरितार्थत्वादायप्रत्ययान्तादात्मनेपदं नेत्यर्थ:। एवं च तुल्यन्यायत्वादेकाच उपदेशे इति निषेधोऽपि नेति सूचितम्। क्षमूष्सहन इति। 'षिद्भिदादिभ्योऽ' (पा.सु.-३/३/१०४)ङित्यर्थं षित्त्वम्। ऊदित्त्वादिङ्िवकल्पंमत्वाह-चक्षमिषे चक्षंस इति। इडभावपक्षे 'अनुनासिकस्य क्विझलो' (पा.सु.-६/४/१५)रितिदीर्घस्तुनभवति, क्िसाहचर्येण तिङ्िभन्नस्यैव झलादेस्तत्रग्रहणात्। वहिमह्योरिडभावपक्षेविशेषमाह-भ्वोश्च। 'मोनो धातो'रित्यनुवर्तते। तदाह-मान्तस्येति। णत्वमिति। षात्परत्वादट्कुप्वाङिति नकारस्य णत्वमित्यर्थ:। कमुकान्ताविति। 'उदितोवे' (पा.सु.-७/३/५६)ति त्कायामिङ्िवकल्पार्थमुदित्त्वम्। कान्तिशब्दस्य प्रभापरत्वभ्रमं वारयति-कान्तिरिच्छेति। 'स्वर्गकाम'इत्यादौ कमेरिच्छायां प्रयोगबाहुल्यदर्शनादिति भाव:।

'कामोऽभिलाषस्तर्षश्चे'त्यमर:।

कात्यायनेन केवलमेकेन वार्त्तिकेन सूत्रस्यास्य विचार: साधित:। यथा –

१.ण्यल्लोपावियङ्ण्गुणवृद्धिदीर्घत्वेभ्य: पूर्वविप्रतिषिद्धम्।

अत्र आशयस्तु 'णि'लोपात् 'य'लोपात्, 'गुण''वृद्धि'लोपात्, 'दीर्घत्व'लोपात् अल्लोपात्वापूर्वं विप्रतिषेध: कर्तव्य: इति। णिल्लोपस्यावकाश: - कार्यते, हार्यते। इयङादेशस्यावकाश:-श्रियौ श्रिय:, यणदेशस्यावकाश:-निन्यतु: निन्यु:, वृद्धेरवकाश:- सखायौ सखाय:, गुणस्यावकाश:- चेता स्तोता । णिलोपस्यावकाश:-आटिटत् आशिशत्, दीर्घत्वस्यावकाश:- चीयते स्तुयते। णिल्लोपस्य स एव अत्र णिलोपो भवति विप्रतिषेधेन।

भाष्यकार: सूत्रस्यास्य विचारप्रसङ्गे 'ण्यल्लोपावियङ्ण्गुणवृद्धिदीर्घत्वेभ्य:

पूर्वविप्रतिषिद्धम्'इति एकं वार्त्तिकं समुपपाद्य सिद्धान्तम् उपपादितवान्। 'णि'लोपस्य 'यण'लोपस्य इयङादेश लोपस्य गुण लोपस्य। वृद्धि लोपस्य दीर्घत्वस्य वा लोपस्य प्रतिषेधानदोषान् 'विप्रतिषेधे परं कार्यम्' इति न्यायेन स्वसमाधानं प्रतिपादितवान्। यथोक्तं तत्र - ' ण्यल्लोपावियङ्ण्गुणवृद्धिदीर्घत्वेभ्यो भवत: पूर्वविप्रतिषेधेन। णिलोपस्यावकाश:-कार्यते हार्यते। इयङादेशस्यावकाश:- श्रियौ श्रिय:। इहोभयं प्राप्नोति आटिटत् आशिशत्।। ननु चात्र यणादेशेन भवितव्यम्।। इदं तर्हि अततक्षत् अररक्षत्।। यणादेशस्यावकाश: निन्यतु: निन्यु:। णिलोपस्य स एव। इहोभयं प्राप्नोति- आटिटत् आशिशत्।। वृद्धेरवकाश:-सखायौ सखाय:। णिलोपस्य स एवाइहोभयं प्राप्नोति-कारयते: कारक:। हारयते:-हारक:।। गुणस्यावकाश:-चेता स्तोता।णिलोस्यावकाश:-आटिटत् आशिशत्। इहोभयं प्राप्नोति कारयते:- कारणा, हारयते:- हारणा।। दीर्घत्वस्यावकाश:-चीयते स्तूयते। णिलोप स्य स एव। इहोभयं प्राप्नोति- कार्यते हार्यते। णिलोपो भवति





विप्रतिषेधेन।। स तर्हि पूर्वविप्रतिषेधो वक्तव्य:?।। न वक्तव्य:। सन्त्वत्रैते विधय:, एतेषु विधिषु कृतेषु स्थानिवद्भावाण्णिग्रहणे न ग्रहणाण्णिलोपो भविष्यति।। नैवं शक्यम्। इयङादेशेहिदोष: स्यात्। अन्त्यस्य लोप: प्रसज्येत।। अल्लोपस्यावकाश:- चिकीर्षितुम्। इहोभयं प्राप्नोति-चिकीर्षक: जिहीर्षक:। गुणस्याल्लोपस्य च नास्ति संप्रधारणा। दीर्घत्वस्यावकाश: अपिकाक: श्येनायते। अल्लोपस्य स एव। इहोभयं प्राप्नोति चिकीर्ष्यते जिहीर्प्यते। अल्लोपो भवति विप्रतिषेधेन।। स तर्हि पूर्वविप्रतिषेधो वक्तव्य:?।। न वक्तव्य:। इष्टवाची परशब्द:। विप्रतिषेधे परं यदिष्टं तद्भवतीति"।।

नागेश: भाष्यकारस्य पक्षपाती। 'णि'लोपस्य 'यण्' लोपस्य 'इयडादेश' लोपस्य 'गुण'लोपस्य 'वृद्धि'लोपस्य 'दीर्घत्वस्य'वा लोपस्य प्रतिषेधानां दोषाणां समाधानं 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' (परि. ५२) इत्यादि परिभाषया परत्वात् वर्णमात्रा क्षयत्वात् च विहितम्। गुणणिलोपयो: अन्तलोप: प्रसज्यते इति च दोष:। भाष्यकारस्य वचनमवलम्ब्य प्रदर्शित: तत्र समाधानरूपेण भाष्यकारस्य इयम् उक्ति: एकदेशमुक्ति: तेन प्रतिपादिता, वृद्ध्यादिद्थानीकारवृत्तिणित्त्वस्य ' भोभगो" (पा.सु.-८/३/१७) इति सूत्रे वक्ष्यमाणभाष्यरीत्याऽल्विधित्वेन स्थानिवद्भावेनणित्त्वाऽलाभावात्। यथोक्तं तत्र – 'अतो लोप:" इति। शास्त्रातिदेशेति। तत्पक्षे हि सखायावित्यादावचो ञ्णितीत्येव वृद्धि: प्रवर्त्तते। तस्या एव च कारक इत्यादौ प्राप्ति:। कार्यातिदेशे तु कारक इत्यादौ प्राप्ताया 'अचोञ्णिती" (पा.सु.- ७/२/११५) ति वृद्धेर्नायमवकाश: स्यादिति भाव:। कार्यातिदेशेऽपि वृद्धिशासनकर्तृत्वं तस्यैवेति भाष्याल्लभ्यत इत्यन्ये। नन्वाटिटदित्यादौ यण: प्राप्ते: कथमयं णिलोपाऽवकाशोऽत आह -यण इति। एवं गुणणिलोपयो: स्पर्द्धायामवकाश एवेति भाव:। तद्भक्ष्यति - एकैकेन सहेति। ननु चात्रापीति। एवं च गुणस्यैव कथमिदं स्पर्द्धास्थानमिति भाव:। समाधत्ते-परत्वादिति। अन्तरङ्गत्वादिति। वर्णमात्राथयत्वादिति भाव:। अत्र सन्त्वत्रैते इत्यादि, अन्त्यलोप: प्रसज्येतेत्यन्तं

भाष्यमेकदेश्युक्ति:। वृद्ध्यादिस्थानीकारवृत्तिणित्त्वस्य ' भोभगो" इति सूत्रे वक्ष्यमाणभाष्यरीत्याऽल्विधित्वेन स्थानिवद्भावेन णित्त्वाऽलाभात्। किं च णेरनिटीत्यस्य ण्यन्ताङ्गस्य निर्दिश्यनानो योऽन्त्यस्तस्य लोप इत्यर्थ इत्येकाच इति सूत्रभाष्याल्लभ्यते। एवं चेयङि अन्त्यस्य निर्दिश्यमानधर्मावच्छिन्नत्वाऽभावात्समुदायस्य चन्त्याऽलूत्वाऽभावेन

लोपाप्राप्त्याऽस्यैकदेश्युक्तित्वमेवोचितमिति दिक्। णिलोपपूर्वविप्रतिषेधे चाऽनिटीति ज्ञापकम्। परत्वा◌ुणादीनां बाधकत्व इडादावपिगुणे न बाधे सिद्धे तद्वैयर्थ्यं बोध्यम्। नन्वत्राप्यतो लोप प्राप्ते: कथमयं वृद्धेरवकाशोऽत आह-अनार्द्धधातुकत्वादिति। तत्र हेतु: - धातोरविधानम्।

प्रदीपकारेण कैयटेन 'णेरनिटि" (पा.सु.-६/४५/१) इत्यनेन 'णि'लोपस्यावकाश यद्यपि उपन्यास्त: तथापि 'वर्णादाङ्गं वलीयो भवति' (परि.५५) इति परिभाषामाश्रित्य समाधानं विहितम्। यथोक्तं तत्र – अतो लोप इति। यणादेशेनेति। 'एरनेकाच' (पा.सु.-६/४८/२) इत्यनेन। ततश्च यणा वाधनादियङ: संप्रधारणगोचरत्वाऽभाव:। सखायाविति। 'सख्युरसंबुद्धा' (पा.सु.-७/१/९२)विति शास्त्रातिदेशपक्षे वृद्धेरयमवकाशो नतु कार्यातिदेशपक्ष इत्यवसेयम्। णिलोपस्यावकाश आटिटदिति। यणो णिलोपेनबाधितत्वादितिभाव:। कारणेति। ननु चात्रापीयङोऽपवाद 'एरनेकाच' इति यण् प्राप्नोति। परत्वात्तस्य गुणेन बाधर्ना◌ुणस्यापि पूर्वविप्रतिषेधाण्णिलोपेनेत्यदोष:। एकैकेन सह णिलोपस्य विचारदियङादीनामन्यतमविषयोऽपि णिलोपस्यावकाश उपन्यस्यते। सन्त्वन्नैते इति। ननु 'कारणा''कारक' इत्यादौ गुणवृद्ध्यो: कृतयोरन्तरङ्गत्वादयायो: कृतयोन्त्यस्य णिलोप: प्राप्नोति। 'वार्णादाङ्गं बलीयो भवति'(परि.५५)इत्ययायौ बाधित्वाणिलोपोभविष्यतीत्यदोष:। प्रापयतीति। प्रियस्य प्रादेशे वृद्धौ च पुगागम:।

अनार्द्धधातुकत्वाण्णेर्धातोविधानादतो लोपस्याऽत्राऽप्रसङ्ग:।

तत्त्ववोधिन्याम् अपि सूत्रस्यास्य प्रतिपदं व्याख्यानं विधाय आर्द्धधातुकोपदेशकाले यत् अकारान्तं तस्याकारस्य लोप: स्यात् आर्द्धधातुकेपरे इत्यर्थ: उदाहरणमुखेन सविस्तरं प्रतिपादित:। सूत्रे उपदेश इति पदस्य प्रयोजनं अय: पय गतौ इत्यादौ 'अतो लोप'इत्यनेन लोपवारणार्थं साधितम्। एवं प्रकारेण आर्द्धधातुके परे इति पदस्य प्रयोजनमिति तेन सविश्लेषणं साधितम्। यथोक्तं तत्र- 'अनुदात्तोपदेशे'ति सूत्रादुपदेश इत्यनुवर्तते। तदाह-आर्द्धधातुकोपदेशेत्यादि। उपदेशे इति किम्?। अय पय गतौ। आभ्यां क्विपि 'वेरपृक्तलोपाद्वलिलोप: पूर्वविप्रतिषेधेने'तिवार्तिकात् 'लोपो व्यो'रिति यलोपे 'अतोलोप:'इति लोपो माभूत्। अत्। पत्। इह 'ह्रस्वस्य पिती'ति तुक्। आर्द्धधातुके पर इति किम्?। कथयते। वृद्धौ कर्तव्याया ं'अच: परिस्मिन्नि'तिस्थानिवत्त्वं यथा स्यात्। गोपायामिति। नन्विह आयप्रत्ययस्याऽदन्ततामाश्रित्य लोपकरणे फलाऽभावादुच्चारणार्थ एव तत्राकारोऽस्त्विति चेत्। अत्राहु– 'गोपायतं न:'इत्यत्र गोपयशब्दस्य धातुत्वाद्धातोरन्त उदात्तो भवति। तत: शवकारेणैकादेशेऽपि 'एकादेश उदात्तने'त्युदात्त एव, तकाराऽकारस्तु 'तास्यनुदात्ते न्ङिददुपदेशात्'इत्यनुदात्त:। ततश्च 'उदात्तादनुदात्तस्ये'ति स्वरितो भवति। 'स्वरितात्संहितायामनुदात्ताना'मिति 'न'इत्यस्य एकश्रुति:। आयप्रत्ययस्य अनदन्तत्वेतुनेदमिष्टं सिध्यतीति। स्तुतावेवेति। भट्टिस्तु व्यवहारेऽपि आयं प्रायुङ्क्त- 'न चोपलेभेवणिजां पणाया'मिति। वणिजां व्यवहारमित्यर्थ:। 'अ प्रत्यया'दित्यायप्रत्ययान्तादकारप्रत्यये टाप्। चक्षंसइति। इह 'अनुनासिकस्य क्विझलो'रित्युपधादीर्घो नकृत:, संज्ञापूर्वकविधेरनित्यत्वादिति स्थितस्य गतिमुत्प्रेक्षयन्ति।

काशिकावृत्तौ सूत्रस्यास्य 'आर्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोप: स्यादार्धधातुके परे' इति सिद्धान्तकौमुद्यां प्रतिपादिताया: वृत्ते: संक्षेपेन उच्यते यत् – अकारान्तस्य आर्धधातुके लोपो भवति। चिकीर्षिता।चिकीर्षितुम्।चिकीर्षितव्यम्। धिनुत:। कृनुत:। अत: इति पदस्य प्रयोजनं निरूप्य उक्तं यत्- अत: इति किम्? चेता। स्तोता। अत: इत्यत्र तपरकरणस्य प्रयोजनं निरूप्र वृक्षत्वं , वृक्षता इत्यादीनि रूपाणि सूत्रेऽस्मिन् आर्धधातुकपदोपपादेन साधितानि जायन्ते इति प्रतिपादितानि। ण्यल्लोपावियङ्ण्गुणवृद्धिदीर्घत्वेभ्यो भवत: पूर्वविप्रतिषेधेन– इति भाष्य वचनस्य तात्पर्यम् उपपाद्य स्पष्टीकरणरूपेण विशेषत: वृद्धि, दीर्घत्व इत्यस्योपरि उक्तं च तेन वृद्धिदीर्घाभ्याम् अतो लोप: पूर्वविप्रतिषेधेन। चिकीर्षक:। जिहीर्षक:। चिकीर्ष्यते। जिहीर्ष्यते।

समीक्षा:- सूत्रेणानेन आर्द्धधातुकोपदेशकाले यत् अकारान्तं तस्य 'अ'कारस्य लोप: विधीयते आर्द्धधातुके परे। यथा- गोपायाञ्चकार। गोमायांवभुव। गोमायामाश। युगोपयुगुपतु:।

अत्र शास्त्रकारा: सूत्रस्यास्य विचारप्रसङ्गे आर्द्धधातुकोपदेशे इति ग्रहणस्य आवश्यकतेति विषये स्व-स्व मतं परिपोषयन्ति। भाष्यकारेण सूत्रास्यास्य आलोचनाप्रसङ्गे 'ण्यल्लोपावियङ्ण्गुणवृद्धिदीर्घत्वेभ्यो पूर्वविप्रतिषिद्धम्' इति वार्त्तिकवचनेन तत्र 'णि'लोपस्य आवकाश: - कार्यते, हार्यते। इयङादेशस्यावकाश: - श्रियो श्रिय: यणादेशस्य अवकाश: निन्यतु:. निन्यु: वृद्धेरवकाश: सखायौ सखाय: 'णि'लोपस्यावकाश: आटिटत्, आशिशत् गुणास्यावकाश: चेता स्तोता दीर्घत्वस्य अवकाश: - चीयते, स्तूयते , अल्लोपस्यावकाश: - चिकीर्षितुं इत्येवं भावेन विचार: साधित:। पुन: तत्रोभयं प्राप्नोतीति संसाध्य 'णि'लोपे, यणादेशे च आटिटत्, आशिशत् इति पदद्वयं वृद्धेरवकाशे 'णि'लोपे च उभयं प्राप्नोति इति प्रतिपाद्य कारयते कारक: हारयते हारक:, कारयते: कारणा, हारयते: हारणा इत्येवं भावेन तत्र प्रतिपादितम्। तत्रापितत्प्रतिषेध: वक्तव्य: इत्याशङ्काया: खण्डनं विधाय 'विप्रतिषेधे परं कार्यम् “ इति न्ययमाध्यमेन,





इष्टवाची परशब्द: इति वचनेन च समाधानं विहितम्।

सूत्रस्यास्यानुशीलनेन प्रतिभाति यत् सूत्रे आर्द्धधातुक इति पदं यदि ग्रहणं न स्यात् तर्हि चिकीर्षितम् इत्यत्र अल्लोप: न स्यात्, सन् उपदेशकाले नकारन्तत्वात् । अतएव सर्वै: शास्त्रकारै: सूत्रे आर्द्धधातुकग्रहणं स्वीकृतम्। अतएव उक्तञ्च - 'आर्द्धधातुकग्रहणे तु न दोष:। अनुबन्धविनिर्मुक्तात् सन् प्रत्ययात् एव 'त'प्रत्ययस्य आर्द्धधातुकस्य उत्पत्ते:“ उपदेशे इति पदस्य ग्रहणं तु अय-पय-गतौ इत्यत्र वेरपृक्तलोपाद्वलि 'लोप: पूर्वप्रतिषेधेन'इति वार्त्तिकात् 'लोपव्योर्वलि'इति 'य'लोपे 'अतो लोप:'इत्यनेन लोपवारणार्थं विद्यते। आर्द्धधातुके परे इति पदस्य प्रयोजनं तु कथयति इत्यादौ अल्लोपस्य परनिमित्तकत्वाभावेऽपि स्थानिवत्वं यथा स्यात्। येन प्रकृतसूत्रेण गोपाय + आम् इत्यावस्थायाम् 'अतो लोप:'इति सूत्रेण 'गोपायम्'इति सिद्ध्यति। यद्यपि तत्र 'अक: सवर्णे दीर्घ:' (पा.सु.- ६/१/१०१) इत्यनेन सिद्धमासीत् तथापि न्यायत्वात् अत्र 'अतो लोप:'इति उपन्यस्त:।

समीक्षणेन प्रतिभाति यत् 'अत्'इत्यत्र तपरकरणं विषये जीनेन्द्रबुद्धि: कात्यायन-पतञ्जलि-नागेश-ज्ञानेन्द्रसरस्वती-वासुदेवदीक्षितादिभिः चर्चा साधिता। परन्तु जिनेन्द्रबुद्धि-जयादित्यवामनौ-प्रभृतिभि: विषयस्यास्य विचार: साधित:। विषयास्यास्य चर्चां संसाध्योक्तवान् यत् - अथ तपरकरणं किमर्थम्, यावता धातेत्यत्र माभूत्? ननु च 'आतो लोप इटि च' (पा.सू.- ६/४६/४)इति नियमार्थ भविष्यति-आकारस्येटेवाजादौ क्ङिति नान्यस्येति। तथा च चिकीर्षितेत्यत्र न स्यात्। तस्माद्? विपरीतनियमसम्भावनानिवृत्त्यर्थ तपरकरणम्। विस्पष्टार्थं वा। काशिकावृत्तावपितपरकरणविषये उच्यते यत् तपरकरणं किम्?याता।वाता। भाष्यकारस्य मतमनुसृत्य न्यासकारेण स्वमतानि परिपुष्टानि। 'अचोऽञ्णिति' इत्यस्यावकाश – कारयति,हारयति,अतो लोपस्यावकाश:-चिकीर्षिता,जिहीर्षितेति;इहोमयं प्राप्नोति-चिकीर्षक:, जिहीर्षक इति, अतो लोप एव भवति पूर्वविप्रतिषेधेन। अतः नागेश: भाष्यकारस्य पक्षपाती। तेन भाष्यकारस्य मतमनुसृत्यैव स्वकीयः विचारः साधितः।

.................................................................................................

पादटीकाः –

1. . पा.सु.-६/४/४८
2. . पा.सु.-६/४/४८
3. . पा.सु.-६/४/४८
4. . पा.सु.-६/४/३७
5. . पा.सु.-६/१/६६
6. . पा.सु.-६/१/७१
7. . पा.सु.-१/१/५७
8. . पा.सु.-८/२२/८
9. . पा.सु.-७/२/४
10. . पा.सु.-८/२७/८
11. . पा.सु.-३/३/१०४
12. . पा.सु.-६/४/१५
13. . पा.सु.-७/३/५६
14. . म.भा. - ६/४/४८
15. . परि.शे. परि. ५२
16. . पा.सु.-८/३/१७
17. . पा.सु.- ७/२/११५
18. . पा.सु.-६/४५/१
19. . परि.शे. परि.५५
20. . पा.सु.-६/४८/२
21. . पा.सु.-७/१/९२
22. . म.भा. - ६/४/४८
23. . पा.सु.- ६/१/१०१
24. . पा.सू.- ६/४६/४
25. .अष्टा.-७.२.११५

.................................................................................................

Since 2009
ISSN- 0976-8645
UGC RN-41039

## सन्दर्भग्रन्थसूची

1. Williams, M., Monier, A Dictionary English and Sanskrit, Motilal Baranasidas Publishers Private Limited, Delhi: 2012 (Reprint), print. Kolkata: 1954 (1st ed.) , print.
2. Bhattacharya, Srimohan and Bhattacharya, Dinesh Chandra, Bharatiya Darsana Kosa (Vedanta), Calcutta: (Kolkata), Sanskrit College, (Vol.3, Part 1,1981) (Calcutta Sanskrit College Reserch Series No.121) (Vol.3 Part 2, 1983) (Calcutta Sanskrit College Reserch Series No.124), print.
3. Banerji, Sures Chandra, ACompanion to Sanskrit Literature, MLBD, Delhi:1989 (2nd ed.), print

# पञ्चस्वरवैशिष्ट्यम्

डा. हरिनारायणधरद्विवेदी[321]

.................................................................................................

**कूटशब्दाः-** पञ्चस्वराः, अरिष्ट-मृत्युविचारः, शुभाशुभ-फल-विवेचनम्।

.................................................................................................

**शोधसारः-**

‘‘पञ्चस्वराः’’ नाम पञ्चस्वरसम्बद्धगन्थः। गन्थेऽस्मिन् पञ्चस्वर-माध्यमेन ज्यौतिष-शास्त्र-दृष्ट्या शुभाशुभ-फल-विवेचनं भवति। अतः फलविवेचनत्वात् सिद्धान्त-शिरोमणौ ज्यौतिष शास्त्रमिदं पुराणगणैरादेश इति उच्चयते। अतः एव आदेशात्म·-शास्त्रम्। अत्र विशिष्टतया अन्य-ग्रन्थेभ्यः अरिष्ट-मृत्युविचारः प्रतिपादितः। तस्माच्च ग्रन्थोयम् अद्वितीयः अरिष्ट-मृत्यु विचारे। साम्प्रतन्तु सर्वज्ञतायाः अभावे विसेषज्ञता सर्वोत्·ृष्टा दृस्यते। तस्मात ग्रन्थेऽस्मिनपि अरिष्टमृत्युविशेष- ज्ञतायाः सर्वोत्कृष्टा दृश्यते। तस्मात् ग्रन्थेऽस्मिनपि अरिष्टमृत्युविशेषज्ञतायाः वर्तते। अतः विशेषज्ञतामधि·ृत्य प्रजापतिदासः स्वप्रतिपाद्यविषयं स्वल्पत्वं ·थयन् ग्रन्थोद्देश्यशास्वतपदत्वं प्रस्तौति यथा-

पञ्चस्वराभिधानां च ग्रन्थं निधनसश्रयम्।
·िञ्चिदुद्देश्यगम्यञ्च स्वल्पं वक्ष्यामि शाश्वतम्।।
पञ्च.- श्लो· (५)।

अरिष्टमृत्युनिर्णयमहत्वं प्रतिपादयितुं यथोक्तमपि ग्रन्थ·ारेण-

अपाश्यमरणं जीवं प्रपश्यन्ति शुभाशुभम्।
मरिष्यति यदा दैवात् ·ो भुङ्क्ते तच्छुभाशुभम्।।

तस्मात्सर्वं प्रयत्नेन आयुः स्थानं विचिन्तयेत्।
बालस्य जन्ममात्रेण जन्मारिष्टं विचारयेत्।।
(पञ्च.-श्लो· 7/8)

ननु ग्रन्थारम्भप्रयोजनं ·िम्?

·ोऽपि जनः यावत् समयं जीवति तावत् समयं यावत एव शुभाशुभफलविचारो भवितुं शक्नोति। अतः शुभाशुभफलाय अरिष्ट-मृत्यु-विचारः एव पञ्चस्वरा ग्रन्थे ग्रन्थ·ारेण प्रतिपादितः। तत्रादौ ग्रन्थेऽस्मिन् पञ्चस्वरा एव गृहीताः। स्वर-व्यञ्जनयोः प्रादुर्भावः समवेतत्त्वेन प्रोच्यते। स्वाराणां प्रतिष्ठा व्यञ्जनापेक्षया सर्वाधि·ा यतोहि स्वतन्त्रः स्वरो भवति। अर्थात् स्वरोच्चारणं स्वतन्त्रतया सम्भवति। परञ्च व्यञ्जनोच्चारणं स्वरेण सम्भवति। अस्य व्युत्पत्तिः यथा (स्व + रा + ·) स्वेन नान्याधिनत्वेन राति ददाति वा प्र·ाशयतीति स्वरः। अथवा स्वृधातोः ·र्तरि, स्वरति राजते इति विग्रहे, इतर-साहाय्यं विना स्वयं राजमानः स्वरः।”

अर्थात्-

अन्यवर्णसाधनं विना ये उच्चारयन्ते ते स्वराः स्वर-वर्णैस्तु दृश्यादृश्यपदार्थानां अभिधानज्ञानं प्रत्यक्षं भवति एव। तथा च वैदि· तान्त्रि· पौराणि· - ·र्मेषु यथा ओं·ारस्य स्वरस्य प्रयोगो दृश्यादृश्यपदार्थान् प्रत्यक्षी·रोति।

ननु पञ्चैव स्वराः ·थं गृह्यन्ते। स्वरास्तु मुख्यरूपेण नव भवन्ति। तर्हि ऋ·ार-लृ·ारौ नपुंस·ौ उच्येते। ऐ·ारौ·ारयोः अन्तरभावात् (अ, इ, उ, ए, ओ) ऐते पञ्च स्वराः अवशिष्यन्ते। एतेषां माध्यमेनैव जात· -शुभाशुभफल विवेचनं ग्रन्थेऽस्मिन् प्रतिपादितम्। अतः फलितज्यौतिषस्य (स्वरशास्त्रारिष्टभेदपर·ः) एषः ग्रन्थः पञ्चस्वराः इति।

एतेषां स्वराणां ·्रमशः उदितादि संज्ञाः प्रोक्ताः यथा-

उदितं भ्रमितं भ्रान्तं सन्ध्याऽस्तं तदनन्तरम्।
जन्म ·र्म तथाऽऽध्यानं पिण्डं छिद्रं ततः परम्।।
पञ्च बालादि·ावस्था नामद्यक्षरतस्तथा।
आद्यो बालः ·ुमारश्च युवा वृद्धौ मृतोपि वा।।
पञ्च.-59-60

ननु संज्ञा ·थन फलं ·िम्। तदर्थं ग्रन्थ·ारेण प्रतिपाद्यते-

उदिते विजयो नित्यं भ्रमिते लाभ एव च।
भ्रान्ते च सिद्धिमाप्नोति सन्ध्यास्ते मरणं ध्रुवम्।।
पञ्च.-61

ग्रन्थावलो·नेन ज्ञायते यत् ग्रन्थ·ारेण मङ्गलाचरणपूर्व· अरिष्टम्टत्युविचारः ·्रमशः प्रतिपादितः

इष्टदेवं नमस्·ृत्य गोपालं ·ुलदैवतम्।
श्रीप्रजापतिदासेन ·्रियते ग्रन्थसङ्गहः।।
नवग्रहान्नमस्·ृत्य देवीं सरस्वतीं तथा।
प्रणिपत्य गुरुं ·िञ्चिज्ज्योतिः शास्त्रं निरुप्यते।।
(मङ्गलाचरणम्)

तत्रादौ मङ्गलाचरणे ग्रन्थ·ारो गोपालं स्मरति गोपालमेतदर्थं स्मरति यतोहि अरिष्टात् रक्षण·र्ता गोपालो वर्तते। यतोहि गवां पाल·ः गोपालः इति शब्दार्थेन ज्ञायते यत् यदि सः गोपालः गवां पालनं तदरिष्टनिवारणङ्करोति तर्हि सर्वयोनिप्रमुखमनुष्यजीवनमपि तदपेक्षया सम्य·्रूपेण अरिष्टात् पालयितुं शक्नोति। अतः प्रजापतिदास·ृतगोपालस्मरणमिदमेव ज्ञापयति यदत्रास्मिन् ग्रन्थेऽरिष्टज्ञानं प्रजापतिदासेन विशिष्टतया इष्टदेवगोपालम्प्रपूज्य अवाप्षीत् अस्तु साम्प्रतं तज्ज्ञानश्रेष्ठतामन्यग्रन्थापेक्षया संसाध्यते। लघुजात·े यथा-

षष्ठेष्टमेऽपि चन्द्रः सद्यो मरणाय पापसन्दृष्टः।
अष्टाभिः शुभदृष्टो वर्षैर्मिश्रैस्तदर्धेन।। लघु जा.-(7-1)
राश्यन्तस्थैः पापैः सन्ध्यायां हिममयूखहोरायाम्।
मृत्युः प्रत्ये·स्थैः ·ेन्द्रेषु शशाङ्कपापैश्च।। (7-03)

इत्यादिवबह्वरिष्योगानुक्तत्वान्ते ए· श्लो·ः यथोक्तः-

योगे स्थानं गतवति बलिनश्चन्द्रे स्वं वा तनुगृहमथवा।
पापैर्दृष्टे बलवति मरणं वर्षस्यान्तः ·िल मुनिगदितम्।।
(7-11)

अर्थात् प्रोक्तयोगाः येषां ·ाल-निर्णयो न ज्ञायते तदरिष्टं तदा भवति यदा सर्वग्रहेषु बलवान् ग्रहः यस्मिन् राशौ भवति तत्र तस्मिन् राशौ चन्द्रो यदा प्राप्नोति तदा जात·स्य मृत्युः भवति तथा च चन्द्रो यस्मिन् राशौ तस्मिनेव पुनः यदा प्राप्नोति अथवा लग्ने यदा प्राप्नोति तदा वर्षस्यान्ते मरणं भवति परञ्च चन्द्रः पापैर्दष्टस्स्यात्। चन्द्रः प्रोक्तस्थितौ मासान्तरेषु वर्षान्तरेषु अपि प्राप्तुमर्हति। अत्रास्मिन् ग्रन्थे तावत् अरिष्टज्ञानसमयनिश्चितिः न भवति यतोहि ·ुत्रचित् उक्तं यत् (वर्षैमिश्रैस्तदर्धेन) तथा च (मासेन मरणदाः स्युः पापजितो लग्नपश्चास्ते) इति। परञ्च पञ्चस्वराग्रन्थे तु सूक्ष्मारिष्ट ·ालज्ञानमपि विहितम्। तच्चाग्रे प्रतिपादयिष्यते।

एवञ्च जात·पारिजाते-

अष्टौ बालारिष्टमादौ नाराणां योगरिष्टं प्राहुराविंशतिः स्यात्।
(जात·पा. 10-4-3)

एवञ्चात्र विहितमस्ति यत् ·स्मिन् वर्षे मृत्युः भवति।

तदपि द्वात्रिंशद्वर्षे ·थं मरणन्तदाह-

अष्टामाधिपतौ ·ेन्द्रे लग्नेशे बलवर्जिते।
त्रिंशद्वर्षमितायुष्मान् द्वात्रिंशद्वत्सरे मृतिः।।
क्षीणे शशाङ्के यदि पापयुक्ते रन्ध्राधिपे ·ेन्द्रगतेऽष्टमे वा।
पापान्विते हीनबले विलग्ने द्वात्रिंशदब्दे निधनं प्रयति।
(जात·पा.-4-66/67)

एवं रीत्यात्र द्वात्रिशंद्वर्षं यावत् मृत्यु-विचारः ·ृतः।
नन्वत्रापि तावत् अरिष्टज्ञानसूक्ष्मसमयनिश्चितिः न जायते।

साम्प्रतं पञ्चस्वराग्रन्थस्यारिष्टविचारो विहितो यथा-

चतुर्विंशतिः वर्षाणि यावद्गच्छन्ति जन्मतः।
तावद्रिष्टं च निश्चित्य आयुर्दायं न चिन्तयेत्।।
(पञ्च.-9)

अर्थात् आयुर्दायस्य विचारः पञ्चविशति-वर्षेभ्यः परम्भवति। तथा च अरिष्टस्य ज्ञानं ततः पूर्वं ·्रियते। तदर्थम् आदौ अं·-पता·ी-च·्र-माध्यमेन ग्रह-दान-पता·ी-च·्रं निर्मीयते। अनेन च·्रेण बालारिष्ट-समयज्ञानंमाह-यथा वेध·र्तापापग्रहोबलवान् तर्हि दिवारिष्टं, मध्यंबलवान् तर्हि मासा-रिष्टं, दुर्बलस्तर्हि वर्षा-रिष्टं

[321] वेदव्यासपरिसरः, राष्ट्रियसंस्कृतसंस्थानम्, हिमाचल प्रदेशः।



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

Since 2009
ISSN- 0976-8645
UGC RN-41039

भवति। जन्मलग्नं निर्बलन्तर्हि गतां·तुल्यदिने बाल·स्य अरिष्टोभवति। तत्रापि च शुभाधि·्यं तर्हि मासे वर्षे च अरिष्टम्। जन्मलग्नं पापदण्डेशयुक्तं वा दण्डेश: बलवान् वा जन्मलग्नं पाप-ग्रह युक्तं तथा च बलि-शुभ-ग्रहो जन्मलग्नं पश्यति तर्हि जन्मलग्नगतां·तुल्येवर्षेषु अरिष्टं भवति।

एवं च गुरुशु·्रौ वर्गोतम-नवांशेभवत: निजोच्चे भूत्वा ·ेन्द्रे वा तिष्ठत: वेध-·ार· ग्रह: बलवान् भवति। तर्हि प्राप्तां·-वर्षसंख्या दिनेषु परिणमति अत: एतज्ज्ञानाय अर्धयामेशान् यथाह-

दिवा षट्··्रमेणैव रात्रौ पञ्च·्रमेण च।।
वारेशादर्धयामानां पतय: ·ीर्तिता: बुधै:।।
(पञ्च.-58)

अहोरात्रे षोडश-अर्धप्रहरा: भवन्ति। ननु अर्धयामेशे दण्डेशानां दिन-·्रममाह

रवेरर्धं भवेद्राहु राहोरर्धं बुधस्तया।
बुधस्यार्धं शशी ज्ञेयश्चन्द्रस्यार्धं दिवामणि:।।
(पञ्च.-57-58)
भौमस्यार्धं तथा सूर्यो गुरोरर्ध हि चन्द्रमा
शु·्रस्यार्ध ·ुजो ज्ञेय: शनेरर्धं तथैव च।।
(पञ्च.-58)

तथा च रात्रौ अर्धयामेशानां दण्डेशानाह-

दिवार्थ प्र·्रमेणैव यामार्धेशाच्च दण्डपा:।
रात्रौ षट् ·्रमेणैव तदीशा यामखण्डपात्।।
(पञ्च.-60)

तथा च यदि मासविषय·ं वा दिवस-विषय·म् अरिष्टमायाति तधा ·स्मिन् दिने तदरिष्टं भवेत् इति जिक्षासायां यस्मिन् वेध·ार·खेटेन सह चन्द्रस्य योगो यदा भवति तदा अरिष्टम्भवति ·र् तुला राशयो: मध्ये ·स्मिन्नपि राशौ स्थित: चन्द्र: वेध·ार· ग्रहेण सह वेधं ·रिष्यति तदा बालस्य मरणं भवति।।

तथा च वर्षफल·थनार्थं वर्ष लग्न माह:-

जन्म लग्नं समारभ्य गतवर्षाणि योजयेत्।
द्वादशस्विह भावेषु ग्रहैर्वाच्यं शुभाशुभम्।।
(पञ्च.-आयु-4)

तत: परम् वर्षारम्भविधिमाह-

·ार्ति·ान्तनवाहानि जन्ममासदिनावधि:।
दिनानि चैव मासाश्च गतवर्षे नियोजयेत्।।
(पञ्च.-आयु-6)

अस्य प्रयोजनम् स्वरज्ञाने प्रयोज्यते-

अथ ·ेतुपता·ी च·्रम् वर्षेशविधि-माह-

रविचन्द्रारसौम्याश्च शनीज्यौ राहु ·ेतव:।
अन्त्ये शु·्रस्त्रिरावृत्या ·ृति·ादि·्रमात् भवेत्।
(पञ्च.-आयु-7)

ऐवम् च ·ेतु-·ुण्डली·ा ज्ञानम् अपि-

अर्·ो बुध: ·ुजो जीवश्चन्द्र: शु·्रस्तथैव च।
राहु: शनैश्चरश्चैव ज्ञातव्या ·ेतु ·ुण्डली।।
ग्रहयोरुभयोर्मध्ये ज्ञातव्या ·ेतु ·ुण्डली।।
अहिर्बुध्न्यादि ऋक्षाणि त्रीणि त्रीणि ग्रहेषु च।।
·ेतोरे·ै·मृक्षं स्याद्यत्र वै जन्मभं भवेत्।। (पञ्च.-आयु-38-40)

तथा च गुरु·ुण्डली·ा ज्ञानमपि प्रोक्तम्।
अत: एतत्त्रयमाध्यमेन फलविचारो यथोक्त:।
वर्षप्रेवेशेषपताक्यधीशास्तेषां तु मध्ये बलवान् भवेद्य:।
ए·ोऽपि वा द्वित्रिगतो यदि स्यात्तस्यैव वर्षे प्रविभावनीयम् (पञ्च.-आयु-57)

एवम्प्र·ारेणात्रास्मिन् ग्रन्थेऽरिष्टज्ञानं सूक्ष्मातिसूक्ष्मप्र·ारेण उक्तम्। पञ्चस्वरज्ञानन्त्वत्रायुर्दायनिमित्तं विशिष्टतयोक्तम् तत्रादौ दशास्वरज्ञानं, तिथ्यादिज्ञानं, नक्षत्रस्वरज्ञानं, राशिस्वरं, संवत्सरस्वरज्ञानं, तेषां फलज्ञानञ्च विशिष्टतयात्र प्रतिपादितमस्ति।

तत: परं वर्षगणित-प्र·ारमाह-

वयोराशिस्वराङ्काश्च त्रिधान्यसेत्।
द्विचतुस्त्रिहतं ·ार्यं सप्ताष्टरसभाजितम्।। (पञ्च.-आयु-84)

एवञ्च ·र्मादि·ोष्ठसाद्यमपि आह-

आधाने नव देयानि स्वरे ·र्मणि पञ्च च।
सर्वाङ्कव्यापिता पिण्डे छिद्रे श्रेणी व्यवस्थिता।। (पञ्च.-आयु-85)

तथा च चलच·्रनिर्माणं, तिथिसाधनञ्च प्रोक्तम्।
इदमेव तिथ्यादिज्ञानमेव मृत्युज्ञानाय सुष्ठुज्ञानम्-

षड्भिर्भक्त्वा तिथिग्र्ाह्या वारो ग्राह्यश्च सप्तभि:।
पक्षेन्दुशेषिते लग्नं घटीभिश्च घटीं वदेत्।।
ए·ं देयं तु हेयं वा वर्षेवा इति सङ्ग्रहे।
न देय वा न हेयं वा मध्ये चेच्छुक्ल·ृष्णयो:।।
(पञ्च.-आयु-87-88)

प्रोक्त·थनमाध्यमेनैवेदम्प्रतिभात्यत्र यत् पञ्चस्वराग्रन्थज्ञानमत्र यथा प्रतिपादितं ग्रन्थ·ारेण तावत्तु नान्यैविद्वद्भिस्स्वग्रन्थेषु प्रतिपादितम्। अत: पञ्चस्वराभिधाय·ो ग्रन्थोऽयं माभूतले राराजते साम्प्रतमित्यलम्।।

..............................................................................................




Since 2009
ISSN- 0976-8645
UGC RN-41039

## सन्दर्भग्रन्थसूची

१. डॉ. नागेन्द्र पाण्डेय:, श्री प्रजापति दास:, "पञ्चस्वरा:", वारणसेय संस्·ृत संस्थान सी. 27/164, जगतगंज वाराणसी-221002, सन् 1997-98।

२. पं. श्री मातृप्रसाद शास्त्रि पं. ·पिलेश्वरशास्त्रि, श्री दैवज्ञ वैद्यनाथ, "जात·पारिजात:" चौखम्भा संस्·ृत संस्थान, ·. 37/116 गोपालमन्दिर लेन, वाराणसी-221001 सन्-2008।

३. डॉ. ब्रह्मानन्द त्रिपाठी, डॉ. ·मलान्त पाण्डेय, दैवज्ञवराहमिहिर विरचितं ''लघुजात·म'' चौखम्भा सुरभारती, ·. 37/117 गोपालमन्दिर लेन, वाराणसी-221001 सन्-1989।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 39-40 Vol- I Year 11. Date 08 Jan, 2020.
Since 2009
ISSN- 0976-8645
UGC RN-41039

## CALL FOR PAPERS

# Important dates for next Issue-

- ✓ DEADLINE FOR SUBMISSION- 01.03. 2020
- ✓ NOTIFICATION FOR ACCEPTANCE-15.04.2020
- ✓ INAUGRATION-01.05.2020



## Send your paper



bipinkumarjhaofficialid@gmail.com

jahnavisanskritjournal@gmail.com